Shri Raghunath Temple MSS. Library,
JAMMU

No. 2620 महाभारते

Title भगवद्गीता १८ टीका सहिता
१०मोऽध्याय:

Author श्रीनीलकण्ठः

Extent १५३ Age [illegible]

Subject वेदान्त शास्त्रं

१५३

(महाभारते)

भगवद्गीता ग्रन्था
दशटीकासहिता
दशमाध्यायः

२७२०

2720

F. 1 + 143 + 10 + 154

Doublons: 3, 6, 14, 36, 44, 67, 71, 93, 112, 115

दशमोध्यायः

शंकरभाष्य

आनंदगिरिकृतटीका

स्वामिकृता श्रीधरी

पिशाचभाष्य

रामानुजभाष्य

अभिनवगुप्ती

परमार्थप्रपा

वनमाली

उत्तमवैजयन्ती

मधुसूदनी

सदानंदी

नीलकंठी

आनंदी

रामकंठी

लासिकी

पंचोली ॥

भाषा अनुवाद ॥

श्री·
गी· टी·
द·

नुवाच भूयएवेति महांतोनुग्राहादिस्वधर्मानुष्ठानेमहत्यारिवर्यांचक्रशालीवा
हूयस्तहेमहावाहोभूयएवपुनरपि मेवचः शृणुकथंभूतंपरमंपरमार्थनि
ष्ठमद्वचस्तगश्रमृतेनेवप्रीतिंप्राप्नुवतेतुभ्यंहितकाम्ययाहितेच्छयायदहंवक्ष्या
मितत् १॥

शांकरभाष्यटीका

एवमर्जुनायविज्ञानसहितंज्ञानंसाक्षान्मोक्षसाधनमुपदिश्यपरिस्पष्टदानीयेषुभा
वेषुचिंतनीयोभगवांस्तेभावाभगवत्तत्वंचप्राणुक्तमपिदुर्विज्ञानत्वात्पुनर्वक्त
व्यमितिकृत्वाभगवानुवाच भूयएवभूयोपिमहावाहोशृणुश्राकर्णयमेमम
परमंश्रेष्ठंवचनंयदहंतेतुभ्यंप्रियमाणायमत्प्रीयमाणायवक्ष्यामिअभिधास्या
मिहितकाम्ययाहितेच्छया १॥

रामानुजभाष्यटीका

भक्तियोगः सपरिकरउक्तः इदानींभक्त्युत्पत्तयेतद्विवृद्धयेचभगवतोनिरंकुशैश्व
र्यादिकल्याणगुणगणानंत्यंकृत्स्नस्यजगतस्तच्छरीरतयातदात्मकेनतत्प्रव
र्तित्वंचप्रपंच्यते श्रीभगवानुवाच भूयएवेतिममभाहात्म्यंश्रुत्वाप्रीयमाणायतेम
द्भक्त्युत्पत्तिविवृद्धिरूपहितकामनयाभूयोममभाहात्म्यप्रपंचविषयमेवपरमंव
चोयद्वक्ष्यामितदवहितमनाः शृणु १॥

श्रीलनवयुग्मकृतटीका ९

प्राक्तनैर्नवभिरध्यायैर्ययवार्थोलक्षितः सएवप्रतिपदपाठेरस्मिन्नध्यायेअना
नेनथाचाह भूयएवेत्यकमेवार्थोविस्पष्टीकृतंपुनः कथ्यमानंश्रुतिविनिग्रज्ञेनो
एवमेवाभिधास्यामिभूयः कथय इत्यध्यायतात्पर्यं शिष्टंनिगंतव्याख्यात
मितिकिंपुनरुक्तेनसंदिग्धंयन्निर्णीयते १॥ दि४

परमार्थप्रपाटीका ८

एवंद्वितीयाध्यायमारभ्याध्यायाष्टकेक्रमेणदेहादिव्यतिरिक्तात्मस्वरूपदर्शा
नपूर्वकंतत्प्राप्त्युपायभूतंकर्मनैष्कर्म्याभ्यासभक्तियोगात्मपरिचर्याकारेणस्वनिरू
पितंलस्तत्प्रपंचमिथ्यात्वदर्शनप्रसंगेनस्वसत्यत्वंचप्रकटयनमुख्यप्राणापरपा
र्यायमपंचीकृतभूतविग्रहंहिरण्यगर्भात्मकंस्वस्वरूपंनिरूपितमिदानीमप्यप्रा
णापरपर्यायपंचीकृतभूतविग्रहंस्थूलव्यष्टिसमष्ट्याकारविराड्रूपात्मकस्वरूपंद
र्शयितुंदशमैकादशाध्याययोः प्रवृत्तिः तत्रदशमेव्यष्टिपरपर्यायविभूतिनि

श्रीभगवानुवाच भूयएवमहावाहोशृणुमेपरमंवचः यत्तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया १

रूप्यते तत्रालौकिकसामर्थ्यवतीश्वरस्यैव विभूतिः साच विश्वरूपिणो भूतदे
वदेवर्षिगंधर्वसिद्धदानवयक्षादिसमयच्छेदः पशुमनुष्यादिराहत्यादिरूपैरनंता
स्तिनवश्रुतिप्रसिद्धाः किंतासां विदर्शयिषं भगवानुपक्रमते भूय इति महा
दू॰ बाहो इति संबुध्यः श्रीमत्स्वात्मानो भूतब्रह्मपंचावये परमगुह्यार्थाभिधानत
मुक्ते भूय एव पुनरपि मे वचः शृणु भूयः पदेन तत्र समनवमस्योक्ताः काश्चि
द्विभूतयः संतीति सूचितं किंभूतं वचः परमं परमार्थनिरूपकं यदहं तेपा
मेते तुभ्यं प्रियमाणाय प्रीतिं प्राप्नुवते हितकाम्यया हितेच्छया वक्ष्यामि १ ॥

वनमाली टीका ८

सहतेन विभूतीनां भेदात्तव्यवीतिका
भक्तिविह्वलहृदयेषु दयामेकरुणानिधिः सर्वेषु मनसौतेनासुकेन सगुणमेषि
य्यत एतत्र षष्ठे प्रजन्नेवमित्यादिनानंतविभूतिमनोहरेष्वानंत्यकेवलमेव भगा
रमोहमित्यादि विभूतिविशेषाउक्ताः नवमेप्यहं क्रतुरित्यादिनोक्ता भगा
वतत्र सप्तानि दुर्वैषवान् पुनरपि ध्यानायज्ञानायच विभूतयो निरूप्यंते तथा
दौ परमहृदयाय हृद्याय्यर्जुनेनसास्मिन् पि प्रीतिमंतमत्वानः सर्वोयावाचमपिति
रतिशायतिरेकुशेष्यर्थवक्तव्यस्य तदुपरि प्रमत्तता प्रकटयन्नर्जुनं प्रोत्साहया
निभूय इति भूयः पुनरपि मे परमं सर्वोत्कृष्टममृतसंदोहं वचः शृणु यत्ते
तुभ्यं प्रियमाणाय सहवचनादमृतपानादिव प्रीतिं प्राप्नुवते परमात्मोहं तव हि
तकाम्यया हस्ताभीक्ष्णयावक्ष्यामि १ ॥

वैजयंती टीका ९

सगुणमहितो विभूतीन् ... दशमे सविभूतीनकरुणामहितोऽर्जुन नी॰
महात्मना एतेन सयाहृदयेच महात्मना दशमे सविभूतिनारुणा समकि
पंवसममादिषु ध्यायेषु सेष्यवर्णितेन पार्थसारथिनासपरिकरः स्वभक्ति
योगः समिश्रायोपदिष्टइदानीं तत्पोत्पन्नयेन हि हृदयेच पूर्ववत्संदेहमेणोका
स्वविभूतिविस्तरेण वदंत्यार्थसारथिर्भगवानुवाच भूय एवेति हे महाबाहो
प्रजानुभुजेत्वनेनतत्व प्रकृतबलत्वाणासम्यक्त्वात्तेनाभवमुक्तिप्रवणाधिकारी
त्वमिति सूचितं भूय एव पुनरपि मे ममपरमतिगुह्यं शास्त्रसारभूतं दिव्यं
नान्यदिति सूचितं भूय एव पुनरपि मे मम परमं यात्तवचनं शृणु श्रवणीकरु श्रुणां वा
मद्विभूतिविषयं यतदोनित्यसमं यात्तहृवोवचनं शृणु श्रवणोत्करुश्रुणां वा
नं प्रतिश्रुणीवत्वाक्किसमतुपदेश्यमर्थसावधानतया विचारयेति सूचयति
सावधानेप्रकृष्टेन सर्वश्रुतेन नष्टं भवति नहुक्तं विक्षेपेणाश्रुतनाष्टं प्रति ना
प्रसावधानेप्रकृष्टेन सर्वश्रुतेन नष्टं भवति

श्री॰ हेसमग्रेइयतिनेनहेवाक्यमशृणवति अनात्मनिश्रुतेनहेनहेद्रतमनग्निकमि
गी॰टी॰ तियद्वचः प्रीयमाणायमन्माहात्म्यंवारंवारंशृणतापितृनः अवणेः मृतपा
नादिवप्रीतिमुत्पादयतेतस्मादहंसर्वंरहस्यंवक्ष्यामिकिंविवक्षितेनाकथया
मि कथयेत्यपेक्षायामाह हितकाम्ययातवैवमदनुग्रहेणतदृष्टिहेतुवहितेन ति४
सर्वांकयानतुकिंचित्प्रयोजनसिद्धिवांछेयमर्थः १ ॥

मधुसूदनीटीका १

एवंसप्तमाष्टमनवमैस्त्वत्पदार्थस्यभगवतस्तत्त्वंसोपाधिकंनिरुपाधिकं
चदर्शितं तस्यचविभूतयःसोपाधिकस्यध्यानेनिरुपाधिकस्यज्ञानेचो
पायभूतारसोहमप्सुकौंतेयेत्यादिनासप्तमेअहंक्रतुरहंयज्ञइत्यादि।
नानवमेसंक्षेपेणोक्ताः अथेदानींतासांविस्तरोवक्तव्योभगवतोध्याना
यतत्त्वमपितुविज्ञेयमात्मनस्तस्यवक्तव्यत्तानायेतिदशमोध्यायआर
श्रीभगवानुवाच भ्यते तत्रप्रथमंअर्जुनंप्रोत्साहयितुं भूयएवपुनरपिहेमहाबाहोशृ
णुमेपरमंप्रकृष्टंवचः यत्तेतुभ्यंप्रीयमाणायमद्वचनादमृतपानादि
वप्रीतिमनुभवतेवक्ष्याम्यहंपरमात्मा तववहितकाम्ययाहितप्राप्तीच्छ
या १ ॥

आनंदीटीका १

पवित्रंश्रीभूमिंसकलगुणलक्ष्मीनिधिनिधिंसविशेषनर्थंयेविमल।
ग१ मतिसेव्यगतिंतिं येनारायणीशायीशंनिखिलजगदीशंकृतयतिविधीशे
शंश्रीशंभजजनमंजुंदंस्फातिपदं समस्मादिवयेणोकेसोपाधिनिरु
पाधिके श्रीमद्भगवतस्तत्त्वेतत्पदार्थस्यवैकृते १ सविशेषस्यतस्यध्या
नध्यानोपायाविभूतयः निर्विशेषस्यतस्यैवज्ञानोपायास्तथेरिताः २
अथेदानींपुनस्तासांवक्तव्योविस्तरोयतः इतिवेत्त्यपरेतत्त्वंश्रीमद्भगव
तोहरेः ३ अतोज्ञानायतत्त्वंतद्ध्यानायविभूतयः दशमेसंप्रपंच्यंते।
समस्तानांहितायच ४ प्रोत्साहयितुंसमाद्यौश्रोतारंहरिरब्रवीत भा।
नरथ्यत्रशृणुमेप्रकृष्टंवचआदरात् ६ यत्तेभ्यंप्रीयमाणायसुधापा।
नादिवात्मन प्रीतिंप्राप्नुवतेनित्यमज्ञाकादतवमम वक्ष्याम्यहंपरो
पायंतत्त्वाभीष्टसंवांछया २ १ ॥

नीलकंठीटीका १२

सप्तमेतत्पदवाच्योर्थोनिरूपितः तदुपासनाचक्रमप्राप्तकिंचित्प्रोक्तं।

२८

नवमेऽध्ये दत्तसार्थैरुक्तास्तत्राध्याये च विभूतयो मयैवं सर्वत्र भगवद्भावभा
वनात्मके भगवद्भजने मुक्ते नष्टरागद्वेषकल्मषितमनसा मया कथमि
ति मत्वा नो भगवांस्तत्र हृदये स्वविभूतीः केषुचिदेव पदार्थेषु भगवा
दृष्टिविधानार्थास्ताव दर्शयति दशमे तत्फलभूतं विश्वतोमुखस्यो
पासनं तेन च विश्वरूपदर्शनमेकादशे द्वादशे पुनस्तत्फलद्वयस्या
व्यक्तस्योपासनं तदुपासकलक्षणानि चोक्त्वा उपासनाकांडं तत्पदार्थ
शोधनार्थं समापयिष्यति तत्र वात्सल्यातिशयमेव श्रीभगवानुवाच
भूय एवेति हे महाबाहो भूयः पुनरपि शृणु मे परमं निरतिशय
वस्तुनः प्रकाशकं वचः शृणु प्रीयमाणायामृतपानादिव मत्वच
नात्प्रीतिमनुभवते वक्ष्यामि हितकाम्यया तव हितेच्छया १॥

भावदीटीका

एवमीश्वरस्य पुरुषत्वेन नानाविभूतिभेदं दर्शयन् श्रीभगवानुवाच
यद्यपि दिग्दर्शितं तथा रजस्तमसो तथापि त्वं हे केन प्रीतिमेव भज
से त्वं यतः हितकाम्यया यत्ते हं वक्ष्यामि तत्परमं प्रमत्त लक्षणं यत्
दिष्टं तत्त्वमेव च भूय एव शृणु १

रामकंठी भाष्यकी ...टीका

भूय एवेति पूर्वमुक्तमप्यपरोक्षतया विस्पष्टीकर्तुं पुनः कथ्यमानं
परमं परमार्थोपलब्ध्युपायभूतं मम तद्वचः शृणु तत्रहेतुमव
तिवचनीयमिम तदाहतमाह मद्वचसामृतत्त्वेन प्रीयमाणाय
भक्त्यातिशयवशेन प्रीतिं भजते तुभ्यं भक्ताय हितकाम्यया
हितस्य प्राकाम्यसैश्वर्यरूपस्य प्रापणेच्छया श्रहं भक्ताधीनो वक्ष्या
मि उपदिशामि पूर्वो भक्तपरवशस्य ममोक्तिरप्रश्नपूर्वापि नात्र।
यथा १॥

नीलकंठीटीका

एवमपि प्रायेण निरवशेषमुपदेशं वक्तुमिति न प्रतिपादितेन।
याति तदति सूक्ष्मत्वात् परमप्रकृष्टमतीनामपि हृदये फलितमिति स

ॐ एवं नवमाध्यायपर्यन्तग्रन्थग्रथितप्रसन्नगम्भीरभणितिभेदाभिहिततात्त्विकतानादि परमरहस्यरूपा पी
श्रवणादुपजातपरितोषविशेषतामन्तरतरवधार्य परमार्थतादस्यार्थस्यासन्नेष्टहृदयतां चार्जुनस्यो
पलक्ष्य प्रसादातिशयमनुकम्पां चोपगच्छन्ननेकदेशयथोक्तपरतत्त्वसाक्षात्कारकारणभूतनिरति
शयानुग्रहचिकीर्षाविष्कारिवाक्यं भगवानुवाच ॥

ॐ नवमेऽध्याये मयातत्त्वमित्या
क्रमपि भजनीयमैश्वर्यरूपं प
तयार्जुनेनानुभूतप्राय मन्य
त्तथा भगवद्वचनश्रवणेऽभि
दिलदं भक्त्यातिशयसूचकम
विर्भावमर्जुनस्य पश्यन्भक्तानु
कंपया हेतत्तानसर्वस्वं भक्तार्थं
कुर्वाणऐश्वररूपसाक्षात्कारे
भूतं विभूतियोगं तदनेयुक्तम
भक्तिपारवश्येन विवक्षुः श्री
वानुवाच ॥

गी· टी· स·
3

तिष्ठालमनेन इतिभूयो वक्तुनरमेवपूर्वोक्तेनन्मदीयंपरमप्रेमसाधं
मतिपादकमात्म्यकृहेववनमिदमाकर्णीय वक्तुनरवचनकथनेका।
रणमाह यद्वचनेप्रीयमाणायपरितोषभजनेहितकाम्यया त्वन्ति
कातुकुत्सकरणोत्कयानभ्यमितानीमहेकथयिष्यामि किमनेनोक्ते
भवति यावत्प्रकाशान्तरउद्दरमोहविषविषादहारिणाप्रतिपादिता
यंपरमात्मपीयूषरसलेशस्पर्शेनानन्दितेनहृदयेनावकृतः।
प्रीयमाणत्वं प्रतत्स्याविषसहितप्रतरुकनकयानाउद्वेगपवस्मादनः
प्रीयमाणत्वेनाविक्लनशिष्यगुणविशेषायमहितविकीर्षुणास्या
विषहृदयेनदेशिकोनमेनविविवेकिप्रकारैस्तावदुपदेष्टव्यंयाव।
दसौमुग्रहीतार्थंनयानिराकोतत्त्नामापाद्यतइतिभूयोवचनक
ध्यानेनभवनानोहितनीयमितिभगवतोभिप्रेतम् श्रुणवानिद्दंमो
हमयीहृत्स्वसहसैवातःप्रवोधप्रियंतत्वस्यापिंषवोक्तितार्थवि
षयावश्यायमायाथिष्ठ स्वर्योभुषिवपोनरुमाजनितेहेगवमाप।
स्यानेनेषवाभिनवीभवत्स्वभगवदाकेणकेषुननः इहमब्ह्मरूपवि
तानलतत्तणपवार्थोवसनेउक्तव तद्धमत्स्वरूपंगुह्यतममत्वाज्ञातेन
मयत्वेनप्रतिपन्नंप्रतिपाद्यंच अतोवक्तुनरवचनाकर्णनेवहितो
भवयतः १॥

पंडोलीटीका

एवंसप्तमादिभिस्त्रिभिरध्यायैःभजनीयंपरमेश्वरस्यस्वरूपंनि·
रूपितंरसोहमप्सुकौंतेयइत्यादिना नवमेचअहंक्रतुरहंयज्ञइ
त्यादिनाअध्यायद्वयेनतद्विभूतयश्चसंक्षेपतःउक्ताःअथेदा
नींदशमेतांपूर्वविभूतिंप्रपंचयिष्यन् येषुयेषुचभावेषुचिंत्यो·
सिभगवन्तान्तान्सर्वान्भगवतस्तत्त्वंचपूर्वनिरूपितमपि·
प्रतिदुर्विज्ञेयत्वात् भक्तानुकंपयातदपिनिरूपयतिभूयप
वेतिहेमहाबाहोभूयएवशृणुनेरवमेममपरमंपरमात्मस्वरूपं
प्रकाशकंवचःवाक्यंशृणुय दहंतेतुभ्यंप्रीयमाणायमद्वच
नात् प्रीतिंप्राप्नुवतेहितकाम्ययावक्ष्यामि १॥

रणवीरसमिद्धोयिनी ॥

श्रीगणेशायनमः भूपालस्यप्रतापामपाक्केवीरस्यधीमतः
विभूतियोगः स्तानस्यभूतयेकेशवोदितः १ तदेवं सर्वार्थेज्ञानं
प्रतिस्ववर्णोचितप्रवृत्तिरूपकर्मणोपीवधारणसमर्थहृदयंतंप्र
तिपाद्येदानींनिरतिशयानन्दलक्षणस्वधर्मावधारणदृढीकर
णायविभूतीर्वितन्वन्भगवानुवाच भूयएवेति भूयएव बहुतरमे
व महाबाहो महान्तौयुद्धविषये प्रबलौबाहूयस्य तत्संबोधनं मे प
रमंवचः पराकृष्टं सूक्ष्मानातिहीनस्यनेनेतिशुश्रूषयापरममभिमता
र्थप्रतिपादकत्वात्प्रकृष्टं निरुक्तं वा महद्वचनं शृण्वेव यथार्थ किंत
दित्याह यत्तेऽति यत्परमंवचः तेप्रीयमाणाय संजायमान प्रव
र्तिक कर्मानुष्ठानसंतोषाय हितकाम्यया हितमैहिकमामुष्मिकं
च तवैहिकं राज्यसुखमामुष्मिकं स्वर्गादि तस्य काम्ययेच्छया व
क्ष्यामि पूर्वोक्तस्यप्रवृत्तिलक्षणस्यकर्मणः परमार्थसत्तायांवि
सत्तापादकं वचनं त्वां प्रति प्रतिपादयिष्यामीत्यर्थः १॥

मधुभाष्य

उपासनार्थविभूतोविशेषेणकारणत्वंवकेषांचिदनेनध्याये
नाह प्रियमाणायश्रुत्वासंतोषप्राप्नुवते प्रभवं प्रभावं मदीयां
जगदुत्पत्तिंवा तद्भावात्तस्येत्युच्यते यद्यस्ति तर्हि देवादयोजा
नंति सर्वज्ञत्वादतोनास्तीतिभावः अहमादिर्हीतोत्पत्तिरपिय
स्यवशात्कृतस्तस्यजन्मेति ज्ञापनार्थं अहं सर्वस्य जगतः प्रभ
वःप्रलयस्तथेतिवोक्तं उक्तंचैतत्सर्वमन्यत्रापिकोअद्धावेदक
इहप्रवोचत्कुतआजाताकुतइयंविसृष्टिः अर्वाग्देवाअस्यविस
र्जनेनाथाकोवेदयतआबभूवेति नतत्प्रभावमस्यपश्यदेवावि
दुः कुतोन्येऽल्पश्रुतिप्रमाणात्तिस्रवेदाखिलेषु अन्यत्तथोयो
मामजमितिवाकादेवतायते नभयस्तेष्विताप्रादिसमस्तसर्वस्यत्य।

नादिः अजनेनसिद्धेरितरस्य तत्प्रथयति १॥

3/2

भाषाअनुवाद

सप्तम अध्याय सेले कर नवम अध्याय पर्यन्त भगवानने अपनी विभूति।
औ सर्वज्ञ ईश्वर बुद्धिहोनातथा आप आपना परमेश्वरत्व औ यज्ञ आदि सक
लवस्तु मैंही हूं और अपनी अनन्य भक्तिपरमभक्त अर्जुन से संक्षेप रूपक
हा अबदशम अध्यायसे वही अपनी विभूतियोंको विस्तार करि कहते।
हुये स्वभक्तिकी अवश्य कर्तव्यता श्रीभगवानकहतेहै किहेमहाबाहो
अर्जुन तुमफेरि हमारेवचन सुनो परमात्मा विषयक मेरेवचन अमृतओ
से श्रवण करिअतिप्रसन्न प्रीतियुक्त जोतुम सोतुमारी इच्छाकेअनुसा
र तुमारे हित वचनमे कहताहूं तुमश्रवणकरो ।१।

दोहा

भूपति शक्ति प्रतापयुत महावीरमतिवान केशव ताहि विभूति
हित विभूति योगव्याख्यान ॥ १ महाबाहु फिर सुनहु यह परम
वचन जोउमोर पातेहि प्रिय प्रीति तोहिहुं कहहुं हितकरतोर
१॥

नमेविदुःसुरगणाःप्रभवंनमहर्षयः अहमादि।
र्हिदेवानांमहर्षीणांचसर्वशः २॥

शांकरभाष्यटीका १

किमर्थमहं वक्ष्यामीत्यतआह नमेइति नमे विदुर्नजानंति सुरगणाः
किंतेन विदुः मम प्रभवं प्रभावं प्रभुशक्त्यतिशयं अथवाप्रभवं प्रभवनं
उत्पत्तिंवा नापि महर्षयोभृग्वादयोविदुः कस्मात्तेन विदुरित्युच्यते अहमा
दिः कारणंहि यस्माद्देवानां महर्षीणांच सर्वशः सर्वप्रकारैः २॥

आनन्दगिरिकृतटीका २

हितकाम्यया दुर्विज्ञेयं तत्तत्त्वं कश्चिदन्योपि परमं वचोमंय वक्ष्या।
ति तेनच मम तत्त्वज्ञानं भविष्यत्यतो भगवद्वचनमकिंचित्करमिति शं।
कित्वा परिहरति किमर्थमित्यादिना इन्द्रादयोभृग्वादयश्च भगवत्प्रभा
वं॰नविदन्तीत्यत्र प्रश्नपूर्वकं हेतुमाह कस्मादिति निमित्तत्वेनोपादाना।
त्वेन चयतो देवादीनां भगवानेव हेतुरतस्तद्विकारास्तेन तत्प्रभाव
विदुरित्यर्थः २॥

स्वामिकृतटीका ३

उक्तस्यापिपुनर्वचनेदुर्विज्ञेयत्वंहेतुमाह नमेइति मेममप्रभवंप्रभावंजन्म
रहितस्यापिनानाविभूतिभिराविर्भावंसुरगणाअपिमहर्षयोभृग्वादयोपि।
नजानंति तत्रहेतुः अहंहिदेवानांमहर्षीणांचादिकारणंसर्वशः सर्वैःप्र
[a] बुद्ध्यादिप्रवर्तकत्वेन — कारैरुत्पादकत्वेनेषामतोमदनुग्रहंविनामांकेपिनजानंतीत्यर्थः २॥

पैशाचभाष्यटीका ४

नमेविदुः विजानंतिसुरगणाः प्रभवमुत्पत्तिं नमहर्षयः ममोत्पत्तिंसुरगणाः
महर्षयश्चनजानंतीत्यर्थः अहमादिकारणंहियस्माद्देवानांमहर्षीणांसर्व।
शः सर्वेषांयस्माद्देवानांसर्वेषांमहर्षीणांच अहमादिःकारणंतस्माद्देवा।
महर्षयश्चममोत्पत्तिंनजानंतीत्यर्थः २॥

रामानुजभाष्यटीका ५

नमेविदुरिति सुरगणाः महर्षयश्चातीन्द्रियार्थदर्शिनोऽधिकतरज्ञानाअ।
पिमेप्रभवंप्रभावंनविदुः ममनामकर्मस्वरूपस्वभावादिकंनजानंतियत
स्तेषांदेवानांमहर्षीणांचसर्वशः अहमादिः तेषांस्वरूपस्यज्ञानशक्त्यादे।
श्चाहमेवादिः तेषांदेवत्वदेवर्षित्वादिहेतुभूततपःपुण्यानुगुणंमयादत्तंज्ञानं

श्री·
गी·टी·
९·

परिमितं अनंतस्य परिमितज्ञाना मत्स्वरूपादिकं यथावन्न जानंति २ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २ ॥

परमार्थप्रपाटीका ७

अथ स्ववचनस्य स्तुतिरहस्यत्वेन दुर्ज्ञेय-त्वमाह ॥

नमेविदुरिति---मे प्रभवं लीलया प्रादुर्भावं सुरगणास्तथा महर्षयो भृग्वादयोऽपि न विदुर्न जानंति कुतस्तत्राह अहमिति हि यस्मात्कारणादहं सर्वशः सर्वेषां देवानां महर्षीणां चादिः कारणं अनादिसिद्धतया प्राचीनानामतः सकाशाद्देवर्षीणामुत्पत्तिः श्रुतिरपि सुरोऽदित्यादिब्रह्मा ब्रह्मणाद्वा प्रजायतेति तथा सप्तऋषयः प्रविहिताः शरीरादिति मत्यार्कमेतांश्चापि तस्यासनः ऋषयः सप्तैरेवाग्रहमीति भाष्येण तीर्थमुखे समीपे नेत्रश्रोत्रमनासाजिह्वारूपमेंद्रियरूपाः सप्तर्षय इत्यर्थः ॥

वनमाली टीका ८

भगवद्भुक्तमेव किमर्थं पुनर्वक्ष्यामीत्यत आह नमइति प्रभवं प्रभावं प्रभुत्वेनातिशयाद्भुतानंतनिरंकुशैश्वर्यं प्रभवनमुत्पत्तिं निरतिशयानंतनामितात्मविभूतितया प्रकटतयाविर्भावं वा सुरगणा इंद्रादयो महर्षयश्च भृग्वादयः सर्वज्ञा अपि न मे विदुः तेषां तदज्ञाने हेतुमाह अहंहि यतः सर्वेषां देवानां महर्षीणां च सर्वशः सर्वप्रकारैरुत्पादकत्वेन बुद्ध्यादिप्रवर्तकत्वेन चेत्यादि कारणं अतो मदधीनदेहेंद्रियचेतना मद्दत्तज्ञानादिशक्तयश्च मत्प्रभावं न जानंतीत्यर्थः २ ॥

कुसुमवैजयंतीटीका ९

मदनुग्रहं विनैव मज्ज्ञानं दुर्लभमित्याशयेनाह नमे विदुरिति मे सर्वकारणस्य सर्वगुरोः सर्वनियंतुः सर्वेश्वरस्य मम प्रभवं प्रकर्षेण भवनमुत्पत्तिमनंतविभूतिभिराविर्भावं नामकर्मस्वभावादिकं वा यद्वा प्रभावं प्रतापमित्यर्थः यद्वा प्रभवं प्रभुत्वेन भवनमनाद्यनंतत्वादिस्वरूपगुणविभूतिमत्तया वर्तमानं सुरगणाः ब्रह्मादयो न विदुः महर्षयो मरीचिभृग्वादयोऽपि न विदुर्याथात्म्येन न जानंति कुत इत्यपेक्षायामाह अहमादिर्हि यस्मात्सर्वशः सर्वप्रकारैर्जन्मदानतया बुद्ध्यादिदानतयैश्वर्यादिदानतश्च देवानां महर्षीणां च अहमादिः कारणं अनंतस्य परिमितज्ञानाः परिच्छिन्नैश्वर्याः अपरिमितज्ञानम

परिच्छिन्नैश्वर्यः सर्वविदहं मां न जानंति इत्यतो युक्तमेवाह ॥ को
ह्यावेद क इह प्रावोचत् कुत आयाता कुत इयं विसृष्टिः अर्वाग्देवा अ
स्य विसर्जनेनाथ को वेद यत आबभूव नैनं देवा आप्नुवन् पूर्वमर्श
इत्याद्याः ॥ २ ॥ मधुसूदनीटीका ॥ ४ प्रभवं प्रभावं प्रभुशाक्त्यतिशयं प्रभवत

प्रागबहुधोक्तमेव किमर्थं पुनर्वक्ष्यसि तत्राह न मे विदुरिति अनेकवि
भूतिभिराविर्भावं वा सुरगणा इंद्रादयो महर्षयश्च भृग्वादयः
सर्वज्ञा अपि न मे विदुः तेषां तदज्ञाने हेतुमाह अहं हि यस्मात् सर्वे
षां देवानां महर्षीणां च सर्वशः सर्वैः प्रकारैः उत्पादकत्वेन बुद्ध्या
दिप्रवर्तकत्वेन च निमित्तत्वेनोपादानत्वेन चादिकारणं अतो मदि
कार्यास्ते मत्प्रभावं न जानंतीत्यर्थः १ [illegible]
[illegible] ॥ २ ॥

सदानंदीटीका ॥

सु७ अतः पूर्वोक्तमेव त्वं पुनर्वक्ष्यसि चेच्छृणु नानाविभूतिभिर्दिव्यमा
विर्भावं विलक्षणं १ न शक्राद्याः सुरगणा न भृग्वाद्या महर्षयः स
र्वज्ञा अपि मे विभोः प्रभावं ते विदुः परं २ यतस्तेषां हि देवानां महर्षी
णां च सर्वशः उत्पादकतया बुद्धिप्रेरकत्वेन सर्वथा ३ अहमादिर्जगा
कृतीनां तो जानंति मत्कृतां ४ २ ॥

नीलकंठीटीका ॥

दुर्ज्ञेयत्वाच्च मत्स्वरूपस्याहं तावद्ब्रवीमीत्याह न मे इति प्रभवं प्रकृष्टं भव
मैश्वर्यं वियदादिसृष्टिसामर्थ्यं न विदुः न च हेतुः अहमिति अयं भा
वः देहात्मदर्शनं तेषां हि देवादीनां ब्रह्मादित्वाभिमानं चार्वाकीनैव व्याप्त्यादिभिः
स्वात्मनि सामर्थ्यं लीनोऽर्थः परिक्षेत्तुं शक्यत इति पदार्थः स्पष्टः ॥ २ ॥

आनंदीटीका

उत्कर्षमेवाह ॥ सुरगणाः ब्रह्मादयः महर्षयो भृग्वाद्याः प्रभवमुत्पत्तिकारणं म
मत्तिमेव विभूतीनां प्रकृष्टं भवनमाविर्भावं वा न विदुः नास्ति जन्म
मे सर्वकारणमीश्वरोऽहम् मयैव सृष्टास्ते ब्रह्मादयो मत्स्वरूपं क

ये विदुः सुरगणाः प्रभवं न महर्षयः २

रामकंठीटीका

मम परमार्थिनप्रकर्षेण भवनमाविर्भावं मम सप्रभवमुत्पादं प्रभाव
मिति वा पाठे माहात्म्यं सुरगणा ब्रह्मेन्द्रसूर्यादयो देवसमूहा न।
विदुर्न जानन्ति महर्षयो भृग्वादयोऽपि न ये यत्र नहि मन्मायापाशबद्धा।
ज्ञाविनतनत्स्वरूपशक्त्यादि भेदास्तेन स्वाधिकारमत्रातिषुक्ताः प्रा
तिकसंसर्गमलपायनिम्नभावसंबन्धावस्थाजपः अहं तु तेषा।
मादिः प्रथमपदं प्रकर्षगमाकस्मादिदीर्घकालस्थायि।
नोऽपि देवादयो मदीयपरमसत्तापेक्षया न्यूनत्वात् नैव मदीय मा।
यामोहिताः सन्तः स्वाधिकारनिर्वर्तनमात्रपर्यायमस्माम
तोऽमां से मतिन विदन्तीनतः २॥

नतु ब्रह्मादिभिर्भृग्वादिभि लासिकी [illegible]टीका श्वनवैश्वरंरूपं यत्र तत्र वर्णितं ननप

वाव धारयामः किंपुनः प्रनहक्रोत्याशंक्याह॥ ममेश्वरस्य ब्रह्मरूपनयानिरंजनस्यापि सतः प्रभवं मायोपहित
तये श्वररूपाभिव्यक्तिं सुरगणा ब्रह्मादयो महर्षयो भृग्वादयश्च न
विदुर्न जानन्ति तेषां मद्रूपाभिव्यक्तेः पश्चाज्जा विन्वात् पितरमि
व किंपुनरेव प्रवरेनमाह हि प्रसिद्धोऽहमीश्वरो वेदान्ताभिम
तो मायोपाधिकः प्रवृत्तराभिमतः क्रियाशक्त्यादेकप्रकः सर्वेषा
देवानां महर्षीणां चादिः कारणम् तेनो महाभिव्यक्तिं तानेवेदा।
म् नमस्तत्स्वरूपज्ञानेप्रवयनीयं मतत्फलतादिमाह २॥

पंचोलीटीका

उक्तस्यापि परमेश्वरस्य पुनर्वचनेन दुर्विज्ञेयत्वमाह नमइ
ति हे भारत मे मम प्रभवं प्रभावं प्रभुशक्तित्वातिशयाश्चमपि
वसुरगणाः न विदुः महर्षयो भृग्वादयो न विदुः हि यस्मादहं स
र्वशः सर्वप्रकारैः देवानां महर्षीणां चादिः कारणमुत्पत्त्यादि हे
तुः २

रणवीरसमिद्बोधिनी।।

ननु पूर्वार्थसंग्रहेण स्वविभूतयोऽक्ता एव किमर्थं भूयः कथ्यन
मित्यत आह नमे इति मे प्रभवं प्रकृष्टां नानाविभूतिमद्भावादनि
वीक्ष्या मत्प्रभावाक्तिं सुरगणा इंद्रादयो महर्षयश्च भृग्वादयो न विदु
र्न हि जानंति ते हि मद्विभूतीरजानंतोऽहं तु तेषामादिरनादित्वादतो
हेमेव तावेद्मि न ते इति नाविभूतीर्मत्तस्माकर्णयेति २।।

मधुभाष्य

२।।

भाषाअनुवाद

कही हुई बात का जो पुनर्वार कहना तिसमे हेतु यह कि मेरा तत्त्वज्ञान
ना अति कठिनहै सोई कहते है किजन्म रहित होके भीजो विभूतियों
के द्वारा मेरा आविर्भाव कहे प्रगट होनासो देवता औभृगु प्रभृति महर्
षिभी नहीं जानते है क्यों किदेवता औमहर्षियों के उत्पन्न करनेवाले ता
था बुद्धिके प्रहति देनहार आदि भूतकारणरूप हमहै इसीसे हमारीकृ
पाविना हमको कोई जानने नहीं सकता है २ ॥

दोहा

मोरोजन्म न जानहिं सुरगण महाऋषिजोय में आदिसभदेवकर
महाऋषिनकोसोय २॥

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् असंमूढः
स मर्त्येषु सर्वपापैः प्रमुच्यते ३ ॥

शांकरभाष्यटीका १

१म किंच यो मामिति यो मामजमनादिं च यस्मादहमादिर्हि देवानां महर्षीणां
च न मम आदिः आदिर्विद्यते ऽहमजोऽनादिश्च अनादित्वमजत्वे हेतुस्तं मा
मजमनादिं च यो वेत्ति विजानाति लोकमहेश्वरं लोकानां महान्तमीश्व
रमसंमूढः संमोहवर्जितः स मर्त्येषु मनुष्येषु सर्वपापैः सर्वैः पापैः मति
पूर्वामतिपूर्वकृतैः प्रमुच्यते प्रमोक्ष्यते ३ ॥

आनन्दगिरिकृतटीका २

इतश्च कश्चिदेव भगवत्प्रभावं वेत्तीत्याह किंचेति कोसौ प्रभावो भगवतो यं
बहवो न विदुरित्यपेक्षायां पारमार्थिकं प्रभावं तदधीनफलं च कथ
यति यो मामिति पदद्वयोपात्तमर्थमाह अनादित्वमिति ३ ॥

स्वामिकृतटीका ३

एवंभूतात्मज्ञाने फलमाह यो मामिति सर्वकारणत्वादेव न विद्यते आदिः
कारणं यस्य तं मामादि मत एव जन्मशून्यं लोकानां महेश्वरं च मां यो वेत्ति
स मनुष्येष्वसंमूढः संमोहरहितः सन् सर्वैः पापैः प्रमुच्यते ३ ॥

पिशाचभाष्यटीका ४

यो मां परमेश्वरं जन्मरहितं च वेत्ति विजानाति लोकमहेश्वरं लोकानां महा
न्तमीश्वरं असंमोहः मोहरहितः स मर्त्येषु मनुष्येषु सर्वपापैः प्रमुच्यते ३

रामानुजभाष्यटीका ५

तदेतद्देवाद्यचिन्त्यस्वरूपयाथात्म्यविषयज्ञानं भक्त्युत्पत्तिविरोधिपापवि
मोचनोपाय इत्याह यो मामिति न जायत इत्यजः अनेन विकारिद्रव्याद
चेतनात् तत्संसृष्टात् सांसारिकचेतनाच्च विसजातीयत्वमुक्तं सांसारिकचे ती१
तनस्य हि कर्मकृताऽचित्संसर्गो जन्म अनादिमित्यनेन पदेनादिमतोऽजा
ख्यकात्मनो विसजातीयत्वमुक्तं मुक्तात्मनो ह्यजत्वमादिमत्तस्य हेयसंबंध
स्य पूर्ववृत्तत्वात् तदर्हतास्ति अनादिमित्यनेन तदनर्हतया तत्प्रत्यनीक
तोच्यते निरवद्यो निरंजन इत्यादिश्रुत्या च एवं हेयसंबंधप्रत्यनीकस्वरूप
तया तदनर्हं मामजं लोकमहेश्वरं मर्त्येष्वसंमूढो यो वेत्ति इतरसजातीयत
यैकीकृत्य मोहः संमोहः तद्रहितोऽसंमूढः स मद्भक्त्युत्पत्तिविरोधिभिः

सर्वपापैः प्रमुच्यते एतदुक्तं भवति लोके मनुष्याणां राजेतरमनुष्यसजातीयः
केनचित् कर्मणा तदाधिपत्यं प्राप्तः तथा देवानामधिपतिरपि ब्रह्माण्डाधिपति
रपीतरसांसारिकसजातीयः तथापि भुवनत्रयान्तर्गतत्वात् यो ब्रह्माणं विदधा
तीति श्रुतेस्तथान्येपि ये केचाणिमाद्यैश्वर्यं प्राप्ताः अयं तु लोकमहेश्वरः कार्य
कारणावस्थाद्द्विविधादचेतनात् बद्धात् मुक्ताच्चेतनात् नादीशितव्यात् सर्वस्मात्
निखिलहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणैकतानतया नि
यन्तृत्वैकस्वभावतया च विसजातीय इति इतरसजातीयतया मोहरहितो यो
मां वेत्ति स सर्वपापैः प्रमुच्यत इति

३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ३ ॥

अथ स्वज्ञाने फलमाह यो मामिति॥

परमार्थप्रपाटीका ७

सर्वकारणत्वादेव न विद्यते आदिः कारणं यस्य तमनादिं अत एवाजं जन्मरहि
तं सर्वलोकानां भूर्भुवः स्वर्महर्जनस्तपःसत्याख्यानां महान्तमीश्वरं वा लोक एवं वा जं॰
विधं मां यो वेत्ति स मर्त्येषु असंमूढः मोहरहितः स तु सर्वपापैः प्रमुच्यते ३ ॥

३ ॥

वनमालीटीका ८

मोक्षोपायमहापुरुषार्थेदमद्भुतप्रभावज्ञानं मत्प्रसादभाजः कस्यचिदेव भव
तीत्याह य इति सर्वकारणत्वान्न विद्यते आदिः कारणं यस्य तमनादिं
अनादित्वादजं जन्मशून्यं लोकानां महान्तमीश्वरं मां यो वेत्ति स मर्त्येषु मनुष्या
णां मध्ये असंमूढः संमोहवर्जितः सर्वपापैर्मत्सर्वकर्तृत्वेतरपि मुच्यते मम
वासुदेवस्य सर्वजगदुत्पत्त्यादिकर्तृत्वेन सदैकाकारत्वेन सर्वनियामकत्वेन तथा
स्मीयज्ञानं ततो विच्छिन्नप्रेमप्रवाहरूपा भक्तिस्ततो तद्गुणालयस्य मम माधवे
दंपततो मत्प्रसादात्सर्वपापहेतोरविद्याया उच्छेद इति भावः ३ ॥ तो॰

ऊन्मवैजयन्तीटीका ९

ननु यदि देवा महर्षयोऽपि न तज्ज्ञातारस्तर्हि विरोधिपापनिवर्तकं तद्विभूति
विषयकं ज्ञानं न प्राप्नुवन्ति तर्हि तज्ज्ञानाभावात्कस्यापि तद्भक्तिः स्यादित्या
कु॰ शंकां स्यात् विदेवमद्विषयकं ज्ञानं भवतीत्याशयेनाह यो मामजमिति यः
कश्चिदनेकजन्मोपार्जितपुण्यपुञ्जैर्लब्धमद्भक्तसङ्गो मामजं वेत्ति स सर्वपा

पैः प्रमुच्यते इत्यन्वयः ननु तर्हि किं त्वं ब्रह्मासीति चेन्नस्याजत्वासंभवा
त्. तथा हि तज्जायते प्रकृतिरूपेण देहेन सह तोमयेन इत्यजोहमेव
ब्रह्मा तु मन्नाभिकमलाज्जायते ऽतो न तस्याजत्वमस्ति न च लोकप्रसिद्धमा
जत्वमस्येति वाच्यम् तस्याप्यव्यक्तरूपात्मनः सकाशाज्जायते इति
श्रुयते अव्यक्तमिति श्रुतेः अतो जन्मशून्यो ऽजो ऽहमेव न ब्रह्मेत्यर्थः पु
नः कीदृशं मामनादिं न विद्यते आदिः पूर्वं कारणं वा यस्य स तथा त
स्मिन्नेनापि ब्रह्मादीनामादित्वं भगवतस्तेषामादित्वं द्योतितं अह
मादिर्हि देवानामिति स्मृतत्वात् ननु अजामेकां अजो ह्येको जुषमाणः
प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि अनादिर्भगवान् कालो नान्तो
ऽस्य हि द्विज विद्यते इत्यादिवाक्येभ्यः प्रकृतिपुरुषकालकर्मणामजत्व
मनादित्वं च श्रूयते कथं त्वं वेत्ति चेत्तत्राह सर्वलोकमहेश्वरमिति
सर्वेषां प्रकृतिपुरुषकालादीनां लोकानां ब्रह्मादिस्थावरान्तानां जन्ता
नां च महान्तं सर्वोत्कृष्टमीश्वरं नियन्तारं प्रकृत्यादीनामजत्वे ऽनादित्वे
च सत्यपि मम सर्वलोकमहेश्वरत्वाद्धेतोर्विषयो ऽहमेव न तु प्रकृत्याद
यो ब्रह्मादयो वा न हि विषया इत्यर्थः स ईदृशमनन्तरूपं ज्ञानवान् मर्त्येषु मनु
ष्येषु मध्ये ऽसंमूढः ब्रह्मरुद्रेन्द्रादिदेवसजातीयतया मामेकीकृत्य यो भ
वति स संमूढस्तद्भिन्नो ऽसंमूढः स तु सर्वपापैस्तैस्तैर्मद्भक्तिप्रति
विरोधिरूपैः पापैः कल्मषैः प्रमुच्यते यथेह लोके केनचित्पुण्यकर्म
णा तदाधिपत्यं प्राप्तोऽपि मनुष्याणां राजेन्द्र मनुष्यसजातीय एव भ
वति तथा ब्रह्मादयोऽपि यतिरपि देवानामधिपतिरपि तेषां संसारे जीवा
सजातीय एव न तु न हि जातो यस्तस्यापि भुवनत्रयान्तर्गतत्वात् यो ब्रह्मा
णं विदधाति पूर्वमिति श्रुतेश्च अन्ये येकेचनाणिमाद्यैश्वर्यप्राप्ता
स्तेऽपि तथैव तत्त्वयोगा हि मनुजात् अहं तु सर्वलोकमहेश्वरः कार्यका
रणावस्थाद्वयेन नाहं ह्यात्मा कार्यचेतनासर्वस्मादीशितव्याद्भिन्नो निखिला
हेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणैकतानतया नि
यंतृत्वैकस्वभावतया विसजातीयो ऽत एव मितरविसजातीयं मां यस्
वेत्ति स एव सर्वपापैः प्रमुक्तो भवति न त्वेवमज्ञस्यतिस्पानान्यस्ये।
त्यभिप्रायः ३ ॥

श्री·
गी·टी·
२·

महाफलत्वाच्चकश्चि मधुसूदनीटीका १· च्चिदेव भगवतः प्रभावं वेत्तीत्याह ॥
सर्वकारणत्वान्न विद्यते आदिः कारणं यस्य तमनादिमनादित्वादजं
जन्मशून्यं लोकानां महान्तमीश्वरं च मां यो वेत्ति स मर्त्येषु मनुष्येषु म
ध्ये असंमूढः संमोहवर्जितः सर्वैः पापैर्मतिपूर्वकृतैरपि प्रमु २
च्यते प्रकर्षेण कारणोच्छेदात् तत्संस्काराभावरूपेण मुच्यते मुक्तो
भवति ३ ॥

सदानंदीटीका १·
महाफलतया कश्चिदेव जानाति स जनः श्रीमद्भगवतो दिव्यप्रभा
वे हृदयेन ग्रहात् १ सर्वहेतुतया यस्यतास्यादिः कारणं हेतुः अना
दित्वेन जन्मादिशून्य लोकस्य सर्वतः २ महान्तमीश्वरं यो मां वेत्ति मा
र्त्येषु मर्त्यतः उत्तमः स च देहाद्यावध्यासेन विवर्जितः ३ मुच्यते कि
ल्बिषैः सर्वैर्बुद्धिपूर्वकृतैरपि ३ ॥

नीलकंठी टीका १·
कस्तर्हि त्वां वेत्तीत्यत आह य इति यः असंमूढः स मां वेत्ति स एव च
सर्वपापैः प्रमुच्यते इति संबंधः जडाजडयोर्देहात्मनोरेकीभावेना
ध्यासो अध्यासमलक्षणेन मूढः संमूढः तद्विपरीतो असंमूढः तत्त्वज्ञाने
नबाधिताध्यासः स एवात्मविज्ञातरि तस्य जनिमनुभवन् मामजमना
त्मानं लोकमहेश्वरं अनादिं आदिः कारणं तच्छून्यमनपवाममजानं वे
त्ति स सर्वैः कृतैः क्रियमाणैर्वा पापैः प्रमुच्यते मर्त्येषु मध्ये ३ ॥

आनंदीटीका
ईश्वरस्वरूपज्ञाने फलमाह अजमिति मत्वा जन्मरहितम् अनादिं
मतः परतरं कोपि नास्तीत्यर्थः लोकमहेश्वरं लोक्यन्त इति लोका
हिरण्यगर्भादयः तेषां महान्तमीश्वरं नियन्तारं यो वेत्ति स मर्त्येषु मर्त्ये
ब्रह्मादिनिश्वरेषु मध्ये असंमूढाः मिथ्याज्ञानहीनः सर्वैः नानायो
नित्यमरैः पापैः अशुभकर्मभिः प्रमुच्यते ब्रह्मैक्यं याति ३ ॥

रामकंठीटीका
ननु यस्मादेवमपकोशे मनादिनत्यो नित्यं भवतस्तस्मादजमनादिं च माव
कश्चित्प्रमाणे मत्तामहेश्वरगणादेवेषु मर्त्येषु [illegible]

ज्ञानेनेमर्थयो । यः कश्चिदिह लोके महात्मा मामजं तु यद्वा देवस्मृ
तेरितसम्यग्ज्ञानशक्तिरजं नित्यत्वाज्जन्मरहितमनएवानादिमवि
द्यमानपूर्वपुरुषान्तरं तथा लोकमहेश्वरं लोकानां ब्रह्मादीनां लोका
नेहृष्णन्तेवचलोरनिलोकशब्दवाच्यानांजनानांमहान्तंसर्गस्थि
तिप्रलयायवस्थाविधानस्वतन्त्रशक्तित्वाद्धन्तमेस्वामिनं तेषा
मपिब्रह्मादीनां स्वविषयेयावन्मात्रमैश्वर्यंतत्कारणमित्यर्थः प
वंविधं मां वेत्तिसाक्षात्त्वेनप्रतिजानीते समस्तेषु मायाकोडीकृतत्वा
न्मरणधर्मसंबद्धेषुदेवादिषुसर्वजन्तुषुमध्येसंमूढःसमानिम
थोवसमूढ्यात्मप्रमयत्वाद्विपर्ययलक्षणः संमोहोस्तानेनसत्ववि
यतेरत्यर्थः अतएवसर्वैर्निरवशेषैर्मनोवाक्कायनिर्वृत्तैः पापैर्नी
तायोमत्तरविशेषरेतभिःकिल्बिषैः प्रमुच्यतेपरिकल्प्यते देहादिन
मवच्छन्नवस्थितांहंकारस्माद्धेहिसर्वपापानामनतिकारणंसम्यग्ज्ञा
नवतस्तनत्राप्नीतिसएवासंमूढःरत्मके [illegible]
[illegible] ३॥

यतोमदभिव्यक्ति ज्ञानं ड लास्किकी [illegible]लीटीका यैटं तस्मात्स्वरूपज्ञानेनएवयूतनीयंमहाफलत्वादित्या
ह- यः कश्चिदिह लोके महात्मा मामजं नित्यत्वाज्जन्मरहितम् तथानादिन
न्ते विद्यमानादिः पूर्वपुरुषान्तरं पस्यनम् तथालोकानांब्रह्मादीनांईश्वराणा
मपिमहान्तम् ईश्वरंपेवविषक्रमरूपेणानशीलंमामीश्वरमुक्तस्वरू
पंवेत्तात्मनयामत्तमभिजानाति सामर्त्येषुमरणादियमविशिष्टेषुस
र्वजन्तुषुमध्येसंमूढःभेदप्रधारूपमायीयमोहरहितःसन्सर्वैस्त्रि
पापैः विधैःपुण्यपापात्मभिःकर्मभिर्योत्पन्तरसंबारहेतुभिःप्रकर्षेणमु
च्यते पुनर्देहसंबन्धंनाप्नोतीत्यर्थः [illegible]
[illegible] ३॥

पंचोलीटीका

एवंभूतात्मज्ञानेकारणमाह योमामितियः मामजमनादिंचवा
नःलोकमहेश्वरंतरीयावस्थंसंसारंतत्कारणंमूलाविद्याद्वयरहि
तंमांवेत्तिसमर्त्येषुअसंमूढःसंमोहवर्जितःसर्वपापैःउद्दिश्यर्वा

ड्ढिस्सर्वकृतैः प्रमुच्यते ३

प्रमादीरसमिद्बोधिनी

अनादित्वे हेतुमाह योमामिति यः पुरुषो मामजं जन्मादिरहि
तमत एवानादिं न कोपि ममादिर्नियामको यस्मिन्नर्थं तेन लो
कानसृजमित्येतादृशं तं लोकमहेश्वरं लोकनाथं वेत्ति स्वध
र्माचरणकाले स एव लोकमहेश्वरः कर्मफलं कर्तारमभिनि
ष्पादयतीतीश्वरभावनया जानातीत्यर्थः पुरुषः सर्वमर्त्येषु स
र्वप्राणिषु मध्ये संमूढो गतभेदत्वेन संमोहः सन्सर्वपापेर्योग्यं
तरंतरगैः प्रमुच्यते विपापो भवतीत्यर्थः ॥ ३ ॥

मधुभाष्य

३ ॥

भाषाअनुवाद

अब आत्मज्ञान का फल कहते हैं कि सबके कारणरूप हेतु और जिसका कोई कारण नहीं है ऐसे अनादि औ जन्मरहित सकललोकके महेश्वर जो मैं सो मुझे जो कोई जाने है तो मनुष्योंके मध्यमें वही असंमोह अर्थात् मोहरहित हो के समस्त पापोंसे छूटि जाय है ३ ॥

दोहा

जो मोहि अज अनादिको लोकनाथ कोउ जान मानुषमें सब
पापसें सो नर छुटहिं सुजान ३ ॥

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः सुखं दुःखं
भवोऽभावो भयं चाभयमेव च ४ ॥

शांकरभाष्यटीका १

स्व
एतस्माद्‌ महेश्वरो लोकानां बुद्धिरिति बुद्धिरन्तःकरणस्य सूक्ष्माद्यर्थाव
बोधनसामर्थ्यं तद्वन्तं बुद्धिमानिति हि वदन्ति ज्ञानमात्मादिपदार्थानामवबो
धः असंमोहः प्रत्युपस्थितेषु बोद्धव्येषु दुःखेषु विवेकपूर्विका प्रवृत्तिः क्षमा
आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता सत्यं यथादृष्टस्य यथाश्रुतस्य चा
त्मानुभवस्य परबुद्धिसंक्रान्तये तथैवोच्चार्यमाणा वाक्‌ सत्यमुच्यते दमो बाह्ये
न्द्रियोपशमः शमोऽन्तःकरणस्योपशमः सुखं आह्लादो दुःखं संतापो भवो
उद्भवः अभावस्तद्विपर्ययः भयं च त्रासो अभयमेव च तद्विपरीतं ४ ॥

आनन्दगिरिकृतटीका २

भगवतो लोकमहेश्वरत्वे हेत्वन्तरमाह एतस्मेति सप्तदशभिरात्मनि चित्तह्रये वा
त्यमोत्पसाधनं प्रत्यक्षमशेषजगत्प्रकृत्यधिष्ठानत्वलक्षणं सोपाधिकं भगा
वत्स्वभावमभिधत्ते बुद्धिरिति सूक्ष्मादीत्यादिशब्देन सूक्ष्मतरः सूक्ष्मतमश्चा
र्थो गृह्यते उक्तं सामर्थ्यं बुद्धिरित्यस्मिन्नर्थे प्रसिद्धिं प्रमाणयति तद्वन्तमिति
आत्मादीति तदवबोधवन्तं हि ज्ञानिनं वदन्ति अन्तःकरणस्योपशमो विषये
भ्यो व्यावृत्तिरिति शेषः ४ ॥

स्वामिकृतटीका ३

लोकमहेश्वरत्वमेव स्फुटयति बुद्धिरिति त्रिभिः बुद्धिः सारासारविवेकनैपु
ण्यं ज्ञानमात्मविषयं असंमोहो व्याकुलत्वाभावः क्षमा सहिष्णुत्वं सत्यं यथार्थ
भाषणं दमो बाह्येन्द्रियसंयमः शमोऽन्तःकरणसंयमः सुखमनुकूलं वेद
नीयं दुःखं तद्विपरीतं भव उद्भवः अभावस्तद्विपरीतः भयं त्रासः अभयं तद्वि
परीतमस्य श्लोकस्यानन्तरेण मत्त एवभवन्तीत्यनेनैवान्वयः ४ ॥

पिशाचभाष्यटीका ४

बुद्धिः सूक्ष्मावबोधसामर्थ्यं ज्ञानं पदार्थावबोधः असंमोह उपस्थितप्रतिपत्ति
सामर्थ्यं क्षमा आक्रुष्टस्य ताडितस्य वा विकृतचित्तता सत्यं यथादृष्टश्रुतार्थ
प्रतिपादनं दमः कर्मेन्द्रियोपरतिः शमः अन्तःकरणोपरतिः सुखमाह्लादः
दुःखं संतापः भव उद्भवः अभावः तद्विपर्ययः भयं त्रासः अभयं तद्विपर्ययः ४

रामानुजभाष्यटीका ५

+ बुद्धिरिति बुद्धिर्मनसः चिदचिद्वस्तुनिरूपणसामर्थ्यं ज्ञानं चिदचिद्वस्तुवि

+ एवं स्वस्वभावानुसंधानेन भक्त्युत्पत्तिं विरोधिपापनिरसनं विरोधिनिरसनादेवार्थतो भक्त्युत्पत्तिं च
प्रतिपाद्येदानीं सर्वस्य कल्याणगुणप्रकारानुसंधानेन भक्तिविवृद्धिप्रकारमाह ॥ +

शेषविषयो निश्चयः असंमोहः पूर्वगृहीतरजतादेः विसजातीयशुक्तिकादिवस्तु
नि सजातीयताबुद्धिनिवृत्तिः क्षमा मनोविकारहेतौ सत्यपि विकृतमनस्कत्वं सत्यं यथा
दृष्टविषयं भूतहितरूपवचनं तच्च सत्यं तदनुगुणमनोवृत्तिभिरीहाभिः अयन
मनोवृत्तिप्रकारकं दमः सर्ववाह्यकरणानामनर्थविषयेभ्यो नियमनं शमोंत
करणस्य तथा नियमनं सुखमात्मानुकूलानुभवः दुःखं प्रतिकूलानुभवः भवोभ
वनं अनुकूलानुभवहेतुकं मनसो भवनं [illegible] भावः प्रतिकूलानुभवहेतु
को मनसो विषादः भयमागामिनो दुःखस्य दर्शनजं दुःखं तन्निवृत्तिरभ
यं ४ ॥

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं ४ ॥

परमार्थप्रपाटीका २

लोकमहेश्वरत्वमेव दर्शयति

बुद्धिर्ज्ञानमिति त्रिभिः सारासारविवेकनैपुण्यं ज्ञानमात्मविषयं असंमोहो अव्याकुलीभावः क्षमा
सहिष्णुत्वं सत्यं यथार्थभाषणं दमो वाह्येंद्रियनिग्रहः शमोंतःकरणसंय
मः सुखमनुकूलवेदनं दुःखं तद्विपरीतं भवउद्भवः अभावस्तद्विपरीतः भयं दु॰
त्रासः अभयं तद्विपरीतं ४ ॥

वनमालीटीका ८

स्वस्य लोकमहेश्वरत्वं भक्तिविवृद्धये प्रपंचयति बुद्धिरिति बुद्धिरंतःकरण
स्य सूक्ष्मार्थविवेकसामर्थ्यं ज्ञानमात्मानात्मसर्वपदार्थावबोधः असंमोहः
अस्मात्मबुवोद्धव्येषु कर्तव्येष्वव्याकुलतया विवेकेन प्रवृत्तिः क्षमाक्रो
कृष्टस्य ताडितस्य वा निर्विकारचित्तता सत्यं प्रमाणेनाववुद्धस्यार्थस्य
तथैव भाषणं दमो वाह्येंद्रियाणां निवृत्तिः शमोंतःकरणस्य सुखं
धर्मासाधारणहेतुकमनुकूलवेदनीयं दुःखमधर्मासाधारणहेतु
कं प्रतिकूलवेदनीयं भवउत्पत्तिः भावः सत्ता अभावो सत्ता भयं आ
गामिदुःखवीजं दुःखं तदभावोभयं एते सर्वे मत्त एव भवंतीत्यन्वेरणा
न्वयः ४ ॥

ऊसमवैसयंतीटीका ५

एवं स्वस्य लोकमहेशत्वादिस्वभावज्ञानेन भक्तिविरोधिनाशस्तन्नाशा
त्तत एव भक्त्युत्पत्तिरित्युक्तेः एवं स्वगुणाख्यप्रकारेणानेन भक्तेः प्रवृत्ति
प्रकारमाह द्वाभ्यां बुद्धिर्ज्ञानमिति बुद्धिः स्थूलसूक्ष्मादिविविक्तत्वनिरूप
णसामर्थ्यं ज्ञानं स्थूलसूक्ष्मादिविविक्तविवेचनम् असंमोहः पूर्वगृहीता
द्रजतादेर्विसजातीयशुक्तिकादिवस्तु विसजातीयताबुद्धिनिवृत्तिः क्षमा
मनोविकारहेतौ सत्यविकृतमनस्कत्वं सत्यं यथादृष्टविषयं भूतहितरू
पवचनं दमः स्वविषयेभ्यो वाह्येंद्रियनियमनं शमोंतःकरणस्यैवं ना

सुखमात्मानुकूलानुभवः दुःखंप्रतिकूलानुभवः भवोजन्म अ
भावोमृत्युः भयमागामिदुःखकारणदर्शनाद्धिनाशः अभयंतदा
न्निवृत्तिः एवकारश्चकारस्तूक्तसमुच्चयार्थकः द्वितीयस्तुकारस्तुज्ञाना
दिकंसमुच्चिनोति एवकारोयोगव्यवच्छेदार्थकस्तेनस्थितिप्रवृ
त्तिनिवृत्यादयस्संगृह्यंते ५ ॥

मधुसूदनीटीका ९

आत्मनोलोकमहेश्वरत्वंप्रपंच
यति बुद्धिरंतःकरणस्यसूक्ष्मार्थविवेकसामर्थ्यं ज्ञानमात्मानात्मसर्व
पदार्थावबोधः असंमोहः प्रत्युत्पन्नेष्वबोद्धव्येषुकर्तव्येषुवा
अव्याकुलतयाविवेकेनप्रवृत्तिः क्षमाआक्रुष्टस्यताडितस्यवावि
विकारचित्तता सत्यंप्रमाणेनावबुद्धस्यार्थस्यतथैवभाषणं
दमोबाह्येंद्रियाणांस्वविषयेभ्योनिवृत्तिः शमोंतःकरणस्य
स्वविषयेभ्योनिवृत्तिः सुखंधर्मासाधारणकारणकमनुकूल
वेदनीयं दुःखमधर्मासाधारणकारणकंप्रतिकूलवेदनीयं
भवउत्पत्तिर्भावः सत्ताअभावोऽसत्ताभयंचत्रासः तद्विपरीत
मभयं एवंच एकश्चकारउक्तसमुच्चयार्थः अपरोनुक्ता
बुध्यज्ञानादिसमुच्चयार्थः एवमेतेसर्वलोकप्रसिद्धाएवमर्थाः
मत्तएवभवंतीत्युत्तरेणान्वयः ५ ॥

सदानंदीटीका ११

सर्वलोकमहेशत्वंदर्शयन्नात्मनोहरिः अंतःकरणसामर्थ्यंसूक्ष्मा
र्थार्थावबोधने १ बुद्धिर्ज्ञानंतथात्मादिपदार्थेष्वात्मभिन्नता उपस्थि
तेष्वकार्येष्वबोधेष्ववचनत्वणे २ अव्याकुलतयासम्यक्प्रवृत्तिर्या
विवेकतः असंमोहः क्षमानिंदाताडनादौसमबुद्धिः प्रमाणेनाव
बुद्धस्यतथोक्तिःसत्यमर्थतः दमःस्यात्स्वभोगेभ्योबाह्येंद्रियनि
वर्तनं शमोंतःकरणेशांतिश्चित्तस्याह्लादनंसुखं दुःखंचित्तस्यसं
तापोजन्मनाशौभवाभवौ ५ भयंत्रासोभयंतस्माद्विपरीतमुदाहृ
तं ५ ॥

नीलकंठीटीका १९

श्री॰
गी॰ टी॰
८॰

ममममहेश्वरत्वादेव मत्तो बुद्ध्यादयो भवंतीत्याह बुद्धिरिति बुद्धिरं
तःकरणस्य सूक्ष्मार्थाववोधने सामर्थ्यं ज्ञानमात्मानात्मादिपदा
र्थाववोधः असंमोहः प्रत्युत्पन्नेषु बोद्धव्येष्वव्याकुलतया विवेकपू
र्विका प्रतिपत्तिः क्षमा आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता स
त्यं प्रमाणेनावगतस्यार्थस्य यथार्थेन भाषणं दमो बाह्येंद्रियनि
यमः शमो मनोनिग्रहः सुखमाल्हादः दुःखं तापः भव उत्पत्तिः
भावः सत्ता अभावस्तद्विपर्ययः भयं त्रासः अभयमेव तद्विपरी
तं ४ ॥

आनन्दीटीका

बुद्धिः सूक्ष्मार्थबोधनम् ज्ञायतेनेनेति ज्ञानं शास्त्रं असंमोहः सं
मोहः कारणेषूपस्थितेष्वनाकुलत्वम् ४

सर्वभूतानां सर्वावस्थाहेतुत्वे लोकमहेश्वरत्वं यद्व्याख्यातं तदेवविवृण्वन्नाह॥

रामकंठीटीका

हेत्याह मैवैकेन तत्त्वपरमार्थसदिति ब्रह्मशः प्रतिपादितमेव अयं च
देवासुरभेदेन द्विप्रकारः तेषु तत्त्ववर्गो मन्वाद्यैर्वैष्णवभासितप
वेतदस्य तेषु तत्त्ववर्गस्यापि तदहंकारावलम्बनेन प्रसरतो बुद्ध्याद
यः पृथग्विधा नानारूपा भावा मत्त एव केवलात्कारणाद्भवन्त्युत्पद्यंते
यतो हि विविधा भावभेदाः प्रवृद्धे सत्त्वज्ञानदृशा परामृश्यमानाः प
रमात्मस्वरूपान्मत्तो नापि न व्यतिरिच्यन्ते ततो मायामात्रमेवैतद्भेदे
नावभासमानता भावानां सा च मच्छक्तिरेवेति मत्त एव ते भावा भव
न्तीत्यर्थः के ते भावा बुद्धिर्निश्चयमन्तःकरणं यया बुध्यते निर्विकल्प
तया निश्चीयते बोद्धव्यं वस्तु ज्ञानं तु मनःसंज्ञोन्तःकरणविशेषो येन
बोद्धव्यं विकल्प्यते यतो सर्वप्रमाणसाधारणौ बुद्धिज्ञानसंज्ञौ भा
वौ असंमोहः परमार्थनिष्ठं ज्ञानं ततो यद्विषयं सर्वमेव ज्ञानं विप
र्ययादिदोषसंबंधात्संमोहात्मकं स चासंमोहलक्षणाभावोस्य।
मुक्तानामेव संभवति क्षमा वाचा मनसा कर्मणा वा निर्विकारत्वं
सर्वात्मना शक्तिमत्त्वेपि परापराधसहिष्णुत्वं यथोपियमाणस्यवसा
येन मुमुक्षूणामपवर्गोपायभूतो धर्मः अवस्थान्तरे हिंसानिह

तयास्वकर्मपरित्यागस्यमोक्षसाधनत्वात् क्षमा शास्त्रयोर्हिनास
तीमोक्षसाधने भवत्येव सत्यमानस्तिकभूतहितपर्यवसायियथा
दृष्टार्थकथनमेतत्स्वर्गापवर्गफलार्थिनांचसाधारणं दमश्च
यथप्रवृत्तानांसर्वेन्द्रियाणांवैराग्यभावनादिकयाभिघातानन्तः
प्रतिषेधनं शमः सिद्ध्यसिद्ध्योर्निर्विकारान्तःकरणत्वं तयोर्गि
विषयो सुखंतत्तदिष्टवस्तुप्राप्तेरभिकोत्तानिष्टनोसंतदृष्टविगता
दुःखंतद्विपरीतता भवाभावौजन्ममरणे भयंदुःखहेतोरीक्षरप्र
तीकाराशासः अभयंतदभावोविधस्तुविततता यतेस्वरवादयःप
स्तवेप्राणिसाधारणाभावाः ४॥

नचतत्वस्वरूपाभिव्यक्तिज्ञा नासिकी [illegible]टीका नंज्ञातोऽद्वैतं यतोबुद्ध्यानिश्चीयतएवेत्याशंक्यबुद्ध्यादयोपिभावाअपिमत्तएव प्रभवंतीत्याह ॥

बुद्धिरन्तःकरणस्यसूक्ष्मावबोधनसामर्थ्यं ज्ञानमात्मविषयेऽवबोधः
ममभितालक्षणःअसंमोहः अनात्मन्यात्मप्रत्ययरूपविपर्यासाभावः
क्षमासहिष्णुतयानिर्विकारचित्तता सत्यंहितपर्यवसायियथार्थभा
षणम् दमोबाह्येन्द्रियसंयमः शमोऽन्तःकरणसंयमः सुखमनुकू
लवेदनीयम् दुःखंप्रतिकूलवेदनीयम् भवउत्पत्तिः अभावस्तद्वि नी
पर्ययः भयंत्रासः अभयंतदभावः ४॥

पंचोलीटीका

सर्वलोकमहेश्वरत्वेकारणमाह बुद्धिरिति बुद्धिरन्तःकरण
स्यसूक्ष्माद्यर्थप्रकाशनसामर्थ्यंज्ञानमात्मादिपदार्थानामव
बोधःअसंमोहोबोद्धव्येषुविषयेषुविवेकपूर्विकाप्रवृत्तिरसंमोहः
आक्रुष्टस्यताडितस्यवाअविकृतचित्तताक्षमायथाश्रुतस्य
दृष्टस्यपरावेदनार्थमुच्चार्यमाणंवचनंसत्यंबाह्येन्द्रियनिग्रहो
दमः अन्तःकरणस्यनिग्रहःशमःह्लादःसुखंचित्तपरितापो
दुःखंभवःउत्पत्तिःअभावःविनाशःत्रासंभयंत्रासाभावश्चाभ
यं ४

रणवीरसमिद्धेयिनी

तदेव महेश्वरत्वमाह बुद्धिरिति बुद्धिः निश्चयात्मिकांतःकरण
वृत्तिः ज्ञानं निश्चितार्थावबोधः स्वधर्ममेव श्रेय इति असंमोहो
बोध्यबोधकभावविवेकनिष्ठज्ञानं तद्धि स्वधर्मनिष्ठानामेव भव-
ति क्षमा नर्थसहनं सत्यं दृष्टार्थकथनं दमो विषयविरागः श-
मो बुद्ध्याधस्तृतविषयविकारोपशमः सुखं स्वधर्मनिष्ठानां
तदेकतानमतिमत्त्वं दुःखं तदभावो भवो देहादिष्ववस्तुष्वपि
वस्तुप्रतीतिः तदभावोऽभावो भयं च जन्माद्यभिभतिवेषालक्षणः
क्लेशस्तदभावो विश्वस्ताविततत्वमभयं चोच्यत इति ४॥

मधुभाष्य

बुद्धिरित्यादिना कार्याकार्यविनिश्चयो बुद्धिः ज्ञानं प्रतीतिः
ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिर्णय इत्यभिधानं दम इं-
द्रियनिग्रहः शमः परमात्मनिष्ठता शमो मन्निष्ठता बुद्धेर्दम
इंद्रियनिग्रह इति भागवते तुष्टिरलं बुद्धिः अलं बुद्धिस्तु ष्टा
ष्टिरित्यभिधानात् सर्वैस्समर्थः मरीचिरत्र्यंगिरसौ पुलस्त्यः
पुलहः क्रतुः वसिष्ठमहातेजा इति मोक्षधर्मोक्ताः ते हि सर्व
पुराणे श्रूयंते चत्वारः प्रथमाः स्वायंभुवाद्यास्तेषां इमाः प्रजाः
न हि भविष्यतामिमाः प्रजा इति उक्तविभागः प्राधान्यं च प्रा-
थमिकत्वादेव भवति तेऽत्र मरीचिलेशवोक्तं स्वायंभुवरो विविव-
रैवतं च तथोत्तमं वेदयः सप्तमानवानिति सर्वेभ्यो स्तुतराजाय-
त इति वचते षांप्राधान्यं प्रजाते भुवज्येष्ठस्य तापसस्य भगवद्रव-
तारत्वादवगतिः तच भागवते प्रसिद्धं मानसास्तु वसवे षामद्व्-
नासुकं भागवते ततो मनून् ससर्जी प्रेमनसा लोकभावनानि-
ति श्रमसुखं नवपरित्यज्याद्विपरीतं तद्भवति प्रमाणं तावोभयं

विधवाक्यान्यथानुपपत्तिरेव सर्वइतिविशेषणं ह्येतस्मि
हि: मत्तोभावोयेषांतेमद्भावाः तएतेब्रह्मणोमानसाजा
तास्तेमत्तएवजाता इतिभावः संतिचभजंतः केचिदित्याह
८॥

भाषाअनुवाद

अब तीन श्लोक से अपनी लोकमहेस्वरता प्रकाशकरतेहै कि बुद्धि कहे सार असार वस्तु विचारकीचातुरी औ ज्ञान तथा असंमोह औ क्षमासत्यवचन और दमकहे बाहरकी इंद्रियोंका दमन औ शमकहे मनकानिग्रह औ सुखदुःखजन्मनाशऔभय अभय ये सब हम सेहोनेहै ४ ॥

दोहा

बुद्धिज्ञान असंमोहहि क्षमासत्य दम शम जोय सुखदुखभव
अभावहिं भय अभय दोउ सोय ४ ॥

15

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः भवंति
भावा भूतानां मत्त एव पृथग्विधाः ५ ॥

शांकरभाष्यटीका १

अहिंसेति अहिंसा अपीडा प्राणिनां समता समचित्तता तुष्टिः सन्तोषः
पर्याप्तबुद्धिर्लाभेषु तपः इंद्रियसंयमपूर्वकं शरीरपीडनं दानं यथाशक्ति
संविभागः यशो धर्मनिमित्ता कीर्तिः अयशस्त्वधर्मनिमित्ता कीर्तिः भवं
ति भावा यथोक्ता बुद्ध्यादयो भूतानां प्राणिनां मत्त एवेश्वरात् पृथग्वि
धा नानाविधाः स्वकर्मानुरूपेण ५ ॥

आनन्दगिरिकृतटीका २

यथाशक्तीति पात्रे श्रद्धया स्वशक्तिमनतिक्रम्यार्थानां देशकालानुगुणे
न प्रतिपादनमित्यर्थः उक्तानां बुद्ध्यादीनामाश्रयाणामीश्वरादुत्पत्तिं प्रति
जानीते भवन्तीति नानाविधत्वे हेतुमाह स्वकर्मेति ५ ॥

स्वामिकृतटीका ३

किंच अहिंसेति अहिंसा परपीडानिवृत्तिः समता रागद्वेषाद्यराहित्यं तुष्टिर्दैवा
लब्धेन संतोषः तपः शारीरादिवक्ष्यमाणं दानं न्यायार्जितस्य धनादेः पात्रेसम
र्पणं यशः सत्कीर्तिः अयशोऽपकीर्तिः एते बुद्धिर्ज्ञानमित्यादयस्तद्विपरी
ताश्च अबुद्धिरज्ञानमित्यादयो नानाविधा भावाः प्राणिनां मत्तः सकाशादेव
भवंति ५ ॥

पैशाचभाष्यटीका ४

अहिंसा अपीडा प्राणिनां समता समचित्तता तुष्टिः संतोषः तपः इंद्रियनि
ग्रहपूर्वककायक्लेशः दानं यथाशक्ति संभागो यशो धर्मनिमित्तकीर्तिः
अयशः अधर्मनिमित्तकीर्तिः भवंति जायंते भावाः पदार्थाः भूतानां प्रा
णिनां मत्तः परमेश्वरात् एवावधारणं नान्यस्मादित्यभिप्रायः पृथग्विधाः
पृथक्प्रकाराः ५ ॥

रामानुजभाष्यटीका ५

अहिंसा परदुःखाहेतुत्वं समता आत्मनि सुहृत्सु विपक्षेषु चार्थानर्थयोः
सममतित्वं तुष्टिः सर्वेषु लाभालाभेषु संतोषस्वभावत्वं तपः शास्त्रीयभोग
संकोचरूपः कायक्लेशः दानं स्वकीयभोग्यानां परस्मै उत्पादनं यशो गुण
वत्ताप्रथा अयशो नैर्गुण्यप्रथा एते कीर्त्यगुणा मनोवृत्तिविशेषा यत एता
नोवृत्तिप्रकरणात् तपोदाने वतथाप्येवमाख्याः सर्वेषां भूतानां भावाः प्र
वृत्तिनिवृत्तिहेतवो वृत्तयो मत्त एव मत्संकल्पायत्ता भवंति सर्वस्य भूता

श्री॰ गी॰टी॰

ज्ञातस्य सृष्टिस्थित्योः प्रवर्तयितृत्वस्य मत्तः कल्याणप्रवर्तकत्वमाह ५ ॥

अभिनवगुप्तकृतटीका ५

स्पष्टार्थं ५ ॥

परमार्थप्रपाटीका ५

अहिंसेति अहिंसा परपीडानिवृत्तिः समता रागद्वेषराहित्यं तुष्टिर्दैवलब्धे
संतोषः तपः शारीरादि दानं न्यायागतस्य धनस्य पात्रार्पणं यशः सत्की।
य॰ र्तिः अयशः अपयशः एवमेते बुद्ध्यादयस्तु पृथिता भूतानां पृथग्विधा नाना भावाः द॰१
प्राणिनां स्वभावाः सर्वे मत्तः कोशरूपात्मनः सकाशादुद्भवन्ति अतिरपि का
मः सकलाविविक्तात्मा ब्रह्मा ब्रह्मभूतिरपि तिह्रीधीभीति एवमन एवेति ५॥

[illegible] ५ ॥

वनमालीटीका ५

अहिंसा कायवाङ्मनोभिः प्राणिपीडानिवृत्तिः समता चित्तस्य रागद्वे
षाद्यरहितावस्था तुष्टिर्भोग्येषु तावतालमिति [illegible] बुद्धिः तपः शास्त्री
यमार्गेण कायेन्द्रियशोषणं दानं देशे काले श्रद्धया यथाशक्त्यर्थिनां पात्रेस
मर्पणं यशः धर्मनिमित्ता लोकश्लाघारूपा प्रसिद्धिः अयशो धर्मनिमित्ता
लोकनिंदारूपा प्रसिद्धिः एते बुद्ध्यादयो भावाः कार्यविशेषाः सकार।
णकाः पृथग्विधाः नानाधर्माधर्मादिसाधनवैचित्र्येण नानाविधा भू
तानां सर्वेषां प्राणिनां मत्तः परमेश्वरादेव भवन्ति नान्यस्मादतः किंवा
च्यममलोकमहेश्वरत्वं ५ ॥

कृसमवैजयंतीटीका ५

[illegible] किंच अहिंसेति अहिंसा परपीडनाद्धेतुनास
मता आत्मनि मित्रे शत्रावुदासीने मध्यस्थेषु समस्मतिस्तुष्टिः प्रतिष्ठल
ब्धे संतोषः तपो वेदोक्तदेहशोषः दानं स्वभोग्यवस्तूनां परस्मै अर्प
णं यशः सद्गुणावतारे विख्यातिः अयशो नैर्गुण्यप्रविख्यातिः एवमा
दयो भूतानां ब्रह्मस्तंबपर्यन्तादीनां भावाः कार्यविशेषाः सकारणाः पृथ।
ग्विधाः धर्माधर्मपापपुण्यादिसाधनवैचित्र्येण भिन्नलक्षणाः म
त्तः परमपुरुषात्सर्वेश्वरादेव भवन्ति मनोहतेः प्रकरणान्नान्यस्मात्कल्प
देवोस्मदीयेनैतन्मतस्वरूपादित्यर्थः ५ ॥

मधुसूदनी टीका ५

अहिंसा प्राणिनां पीडया निवृत्तिः समता चित्तस्य रागद्वेषादिरहिता

वस्था तुष्टिर्भोगेष्वेतावताऽलमिति बुद्धिः तपः शास्त्रीयमार्गेण ।
कायेन्द्रियशोषणं दानं देशे काले श्रद्धया यथाशक्त्यर्थानां सत्पा
त्रे समर्पणं यशो धर्मनिमित्ता लोकश्लाघा तूपाप्रसिद्धिः अय गुणकथन
शस्तु धर्मनिमित्ता लोकनिंदारूपाप्रसिद्धिः एते बुद्ध्यादयो भावाः
कार्यविशेषाः सकारणकाः पृथग्विधाः धर्माधर्मादिसाधनवैचि
त्र्येण नानाविधाः भूतानां सर्वेषां प्राणिनां मत्तः परमेश्वरादेव भवं
तिनान्यस्मात् तस्मात् किं वाच्यं मम लोकमहेश्वरत्वमित्यर्थः मत
ऐश्वर्येण ५ ॥

सदानंदीटीका १

अहिंसा प्राणिपीडाया निवृत्तिः समता मता चित्तस्य द्वेषादिशून्यता ।
ख्याता कीर्तिता १ तुष्टिर्भोगेषु लब्धेषु सदालभ्यया धियः तपः शा ।
स्त्रीयमार्गेण शरीरेन्द्रियशोषणं २ यथाशक्ति स्ववित्तानां दानं पात्रे स ।
मर्पणं यशो धर्मोद्भवा कीर्तिरकीर्तिः स्यादधर्मजा एते बुद्ध्यादयो भा ।
वाः कार्यभेदाः सहेतुकाः धर्माधर्मादिहेतूनां वैचित्र्येण पृथग्विधाः
सर्वेषां प्राणिनां मत्तो भवन्ति परमेश्वरात् तस्माल्लोकमहेशत्वं किं ।
वाच्यं श्रीहरेर्मम ५ ५ ॥

नीलकंठीटीका १

अहिंसा प्राणिनामपीडा समता मित्रामित्रादौ समचित्तता तुष्टिः
संतोषो लब्धे पर्याप्तबुद्धिः तपः इंद्रियसंयमपूर्वकं शरीरपीडनं दानं य ।
थाशक्ति संविभागः यशो धर्मनिमित्ता कीर्तिः अयशोऽधर्मनिमित्ता
अकीर्तिः एते बुद्ध्यादयो विंशतिर्भावाः मत्त एव प्राणिनां भवंति पृ
थग्विधाः प्रत्येकं नानाप्रकारैः ततश्च मद्गुणलाभाय अहमेव त्वया
शरणीकरणीय इति भावः ५ ॥

आनन्दीटीका

तुष्टिर्यथालाभे संतोषः एते बुद्ध्यादयो भावाः पृथग्विधाः स्वकर्म ।
वैचित्र्येण नानाप्रकाराः मत्त एव भवन्ति मय्यप्यलेपः यद्धर्मीश्वरत्वमक
र्माधिष्ठानात्स्वाम् तद्धिंसा प्राणिनां तत्स्वकर्मणः तारतम्यफलेवि

गी. विंत्तु आदिकं कालान्तरे कउज्ञवयेन् तस्मात्सर्वं तत्सर्वशक्तिरीश्व
टी. रः कर्मणो विपाके विदितान स्यतस्य शुभाशुभस्य तु आदिकस्य का
८. रणमहमस्मीत्यर्थः [illegible] ५॥

रामकंठटीका

अहिंसा सर्वभूताभिद्रोहात्सर्वात्मना विरतिः सावद्यमात्रवस्था।
यमेवमोक्षसाधने हिंसायाश्च तमावदस्यान्तरे मोक्षसाधनत्वात्।
यतः शास्त्रचोदिते यज्ञोवधादिसंग्रामे रिपुव्यापादने वृत्तनियतस्त्वहिं
सात्मकत्वेपि तथाविधस्वकर्मनिष्ठानां सत्तामोक्षसाधनम् समता
सदृत्मित्रापुदासीनेमादिनाश्रागुक्तस्वरूपेकत्वदर्शितामुक्त्वण
मेवधर्मः तुष्टिः सर्वभूतविषयाप्रीतिचित्तता मुमत्त विषयेव स
र्वस्यैव सर्वसाधारणत्वेनोक्तत्वात् तपोवाक्चित्तकायनिर्वेत्यो नियम
विशेषः दानमिष्टापूर्तविभागेन स्वद्रव्यस्य परद्रव्यत्वापादनं तानान
दीनांत स्वत्वनिवृत्तिं विना परत्रसंक्रमणो दानमेतत्स्वर्गापवर्गफ
लार्थिनोः साधारणं यशः शास्त्रचोदितानां शुभकर्मणां सात्विक
दर्शनेमे [illegible] विपरीतावरण
[illegible] ५॥

लाक्षिकी [illegible] टीका

अहिंसा परपीडानिवृत्तिः समता हर्षविषादराहित्यम् तुष्टिरैव
लब्धे नमन्तोषः पर्याप्तबुद्धिः तपोवाक्चित्तकायनिर्वेत्यो नियम
विशेषः दानं न्यायार्जितधनादेः पात्रेर्पणम् यशः सत्कीर्तिः अ
यशोऽपकीर्तिः एते बुद्ध्यादयश्चकारात्तद्विपरीता ज्ञानादयोपि भावा ना गा
नाविधाः प्राणिनां स्वकर्मानुसारेण मत्तः सकाशादेव भवन्ति अ
तो मदभिव्यक्तिरेवा[illegible]दीनामपितुरवधारा [illegible] ५॥

किंच अहिंसेति प्राणिनामपीडनमहिंसा सर्वप्राणिषुतुल्यचि
त्तता समता संतोषः तुष्टिः इंद्रियसंयमनपूर्वकं शरीरपीडनंत
पः यथाशक्तिपात्रेद्रव्यार्पणं दानं धर्मनिमित्ता कीर्तिः यशः।
अधर्मनिमित्ता अकीर्तिः अयशः यथोक्तातुआदयः भावाप्राणि
नांस्वकर्मानुरूपेण मत्तएवानेकप्रकाराः भवंति ५

रणवीरसमिद्धोधिनी॥

किंवाहिंसेति अहिंसा हिंसानामपरद्रोहस्तदभावोऽहिंसा सर्वभूता
भिद्रोहात्सर्वात्मनाविरतिः समता सुहृदादिषु समचित्तत्वं तुष्टिः
स्वधर्मलाभे पर्याप्तबुद्धित्वं तपः कायवाङ्मनोदंडस्तद्धिस्वधर्मनिर
तानामेवभवति दानमिष्टापूर्तनिमित्तं पात्रेषुधनार्पणं यशः स
त्यकीर्तिस्तदभावोऽयशः इत्येवं पृथग्विधानानाप्रकाराभावाबुद्ध्यादयः
स्वभावचेष्टाभूतानांभावविकाराणांस्वस्वकर्मानुरूपेण मत्तएवफ
लदातुः सकाशात्भवंतीत्यर्थः ५॥

मधुभाष्य

५॥

18

भाषाअनुवाद

औरअहिंसा शमता कहे प्रीतिविरोधका अभाव औतुष्टि कहेवेमांगेय था लाभ सन्तोष औतपस्याजो १० अध्यायमे कहेंगे औरदान कहेस्वा धर्म से उपार्जित धन सत्पात्र को देना औरयश अयश ये नाना प्रकारके भाव सब हम ही सेउत्पन्न होतेहैं ५ ॥

दोहा

निर्हिंसासमतातुष्टि तपयश अपयश सोय पृथक पृथक
विध जीवको भावहिं मोसें होय ५॥

19

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा मद्भावा
मानसा जाता येषां लोक इमाः प्रजाः ६ ॥

शांकरभाष्यटीका १

किंच महर्षय इति महर्षयः सप्त भृग्वादयः पूर्वे अतीतकालसंब
न्धिनश्चत्वारो मनवस्तथा सावर्णा इति प्रसिद्धाः ते च मद्भावा मद्गत
भावना वैष्णवेन वा सामर्थ्येनोपेता मानसा मनसैवोत्पादिता मया जा
ता उत्पन्ना येषां मनूनां महर्षीणां च सृष्टिर्लोक इमाः स्थावरजंगमल
क्षणाः प्रजाः ६ ॥

आनन्दगिरिकृतटीका २

कथंचिदपि तेषामात्मातिरेकेणाभावात् मत्त एवेत्युक्ते न केवलं भगवतः
सर्वप्रकृतित्वमेव किंतु सर्वज्ञत्वसर्वेश्वरत्वरूपमपि विशिष्टत्वमपीत्याह किं
चेति आद्या भृग्वादयो वसिष्ठान्ताः सर्वज्ञा विद्यासंप्रदायप्रवर्तकास्तथेति
मनूनामपि पूर्वत्वेनाद्यत्वमनुकृष्यते के ते मनवस्तत्राह सावर्णा इति इति
प्रसिद्धाः पुराणेषु प्रजानां पालकाः स्वयमीश्वराश्चेति शेषः महर्षीणाम
नूनां च तत्र विशेषणं ते चेति मयि सर्वज्ञे सर्वेश्वरे गता भावना येषां तेत
था भावनाफलमाह वैष्णवेनेति वैष्णव्या शक्त्या विष्ठितत्वेन ज्ञानैश्वर्यवन्त
इत्यर्थः तेषां जन्मनो वैशिष्ट्यमाचष्टे मानसा इति मन्वादीनेव विशिनष्टि
येषामिति विद्यया जन्मना च संततिभूतानां मन्वादीनामस्मिन् लोके सा
र्वीः प्रजाः इत्यर्थः ६ ॥

स्वामिकृतटीका ३

किंच महर्षय इति सप्तर्षयो भृग्वादयः सप्त ब्रह्माण इत्येते पुराणे निश्चयं
गता इत्यादि पुराणप्रसिद्धाः तेभ्योऽपि पूर्वे ये चत्वारो महर्षयः सनकादयः
तथा मनवः स्वायंभुवादयः मदीयो भावः प्रभावो येषु ते मद्भावा हिरण्य
गर्भात्मनो मम एव मनसः संकल्पमात्राज्जाताः तत्प्रभावमेवाह येषां भृग्वा
दीनां सनकादीनां च मनूनां च इमाः ब्राह्मणाद्या लोके वर्तमाना यथायथं
पुत्रपौत्रादिरूपाः शिष्यप्रशिष्यादिरूपाश्च प्रजा वर्तन्ते ६ ॥

पिशाचभाष्यटीका ४

किंच महर्षयो भृग्वादयः पूर्वे पूर्वकालसंबंधिनः चत्वारो मनवः सावर्णिकादयः मत्तस्सद्भावो येषां ते मद्भावाः मच्छ[illegible]मनः मनसि भवाः मानसाः येषां महर्षीणां मनूनां च सृष्टिर्जाता लोका इमाः प्रजाः स्थावरजंगमलक्षणाः ६ ॥ कृपा

रामानुजभाष्यटीका ५

महर्षय इति पूर्वे सप्त महर्षयो तीतमन्वंतरे ये भृग्वादयः सप्तर्षयो नित्यसृष्टिप्रवर्तनाय ब्रह्मणो मनसः संभवाः नित्यस्थितिप्रवर्तनाय ये च सावर्णिकादयः चत्वारो मनवः स्थिताः येषां संततामये लोके जाता इमाः सर्वाः प्रजाः प्रतिक्षणमा लयादपत्यानां उत्पादका पालकाश्च भवंति ते भृग्वादयो महर्षयो मनवश्च मद्भावमयो भावः स एव भावो येषां ते मद्भावः मत्संकल्पानुवर्तिन इत्यर्थः ६ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ६ ॥ ॥ ॥ ॥

अथ स्रष्टिकर्तारोपि मत एवोद्भूता

परमार्थप्रपाटीका ७ इत्याह महर्षय इति ॥

सप्त महर्षयो भृग्वादयस्तेभ्योपि पूर्वे चत्वारः सनकादयः तथा मनवश्चतुर्दश स्वायंभुवादयः मद्भावाः मत्तो मत्प्रभवाः मत्तो हिरण्यगर्भात्मनो मम मानसाः संकल्पमात्रा ज्जाताः एषां च यो वादि[illegible]पाइमाः प्रजा लोके वर्तंते इत्यनेन ब्रह्मादिस्तंबपर्यंतया सृष्टिः सा सांकल्पिकी काल्पनिका न कार्यकारणसंघातरूपा यथा पूर्वमकल्पयदिति श्रुतेः ॥

वनमालीटीका ८

महर्षयो वेदतदर्थद्रष्टारः सर्वसां विद्यासंप्रदायप्रवर्तका भृग्वाद्याः सप्त पूर्वे सर्गाद्यकालाविर्भूताः तथा च पुराणं भृगुं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुं वसिष्ठं च महातेजाः सो सृजन्मनसा सुतान सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः इति तथा चत्वारो मनवः सावर्णाद्याः प्रसिद्धा यद्वा महर्षयः सप्त भृग्वाद्याः तेभ्योपि पूर्वे प्रथमाश्चत्वारः सनकाद्याः मनवस्तथा स्वायंभुवाद्याश्चतुर्दश मयि सर्वकारणकारणे सर्वेश्वरे भावो भावना येषां ते मद्भावा मदर्पितचेतसः परमद्भावनहेतुकः मन

प्रसादादाविर्भूतमदीयज्ञानवैलक्षण्यायपरोक्षवृत्तइत्यर्थः मनसामनः
संकल्पादेवजातानयोनिजाः अतोविशुद्धजन्मत्वेनसर्वप्राणिश्रेष्ठाः
हिरण्यगर्भात्स्यानुमत्तएवजाताः सर्गादिकालेआविर्भूताः येषां
भृग्वादीनांसनकादीनांमनूनांचाखिलेलोकेविद्ययाजन्मनाचसंतति
भूताइमाब्राह्मणाद्याः सर्वाः प्रजाः ६ ॥

ऊष्मवैजयंतीटीका ६

एवमितिरेचएवेत्याह महर्षयः सप्तेतिमहर्षयोयेभृग्वादयः सप्त
पूर्वेभृग्वादिभ्योपिप्रथमाश्चत्वारोयेसनकादयस्तथामनवोयंस्वाया
म्भुवादयश्चतुर्दशएवंपंचविंशतिसंख्यापन्नेमानसाहिरण्यगर्भमू
र्तेर्ममममनसः सकाशात्जातानित्यसृष्टिप्रवर्तनायैवोत्पन्नाइत्यर्थः
यद्यपिपुराणादिषुहिरण्यगर्भस्यदेहादेतेषामुत्पत्तिः प्रसिद्धातथा
पिसंकल्पमूलत्वाद्वत्पत्तेर्मानसाइत्युक्तंकीदृशाः मद्भावाः ममपरमे
श्वरस्ययोभावः संकल्पः सएवभावोयेषांतेतथामत्संकल्पानुवर्तिनो
नतुस्वसंकल्पानुवर्तिनोनतुस्वसंकल्पानुगताइत्यर्थः येषांमहर्षि
मनूनांलोकेचतुर्दशभुवनेसन्तानभूतेइमाब्राह्मणक्षत्रियादिरूपाः
प्रजाः जन्मनापुत्रादिरूपाविद्ययाशिष्यादिरूपाश्चसंततयोभवंतिते
भृग्वादयः प्रतिक्षणमाप्रलयादपत्यानामुत्पादकाःस्वपालकाश्चभ
वंतीत्यर्थः ६ ॥

मधुसूदनीटीका ६ ॥ ततश्चैतदेवं ॥

महर्षयः वेदतदर्थद्रष्टारः सर्वज्ञाविद्यासंप्रदायप्रवर्तकाभृग्वाद्याः
सप्तपूर्वेसर्गाद्यकालाविर्भूताः तथाचपुराणंभृगुंमरीचिमत्रिंचपु
लस्त्यंपुलहंक्रतुं वसिष्ठंचमहातेजाः सोसृजन्मानसान्सुतान् सप्त
ब्रह्माणइत्येतेपुराणेनिश्चयंगताइति तथाचत्वारोमनवः सावर्णा
इतिप्रसिद्धाः अथवामहर्षयः सप्तभृग्वाद्याः तेभ्योपिपूर्वेप्रथमाश्च
त्वारः सनकाद्यामहर्षयः मनवस्तथास्वायंभुवाद्याश्चतुर्दश मयिपर
मेश्वरेभावोभावनायेषांतेमद्भावामच्चिंतनपराः मद्भावनावशादावि
र्भूतमदीयज्ञानैश्वर्यशक्तयइत्यर्थः मानसामनसासंकल्पादेवोत्प

श्री· गी·टी· ८·

नाः नतयोनिजाः अतोविशुद्धजन्मत्वेन सर्वप्राणिश्रेष्ठाः मत्तएवहि
रण्यगर्भात्मनोजाताः सर्गाद्यकालेप्रादुर्भूताः येषांमहर्षीणांसप्ता
नांभृग्वादीनांचतुर्णांचसनकादीनांमनूनांचचतुर्दशानांलोके अ
स्मिंल्लोकेजन्मनाचविद्ययाचसंततिभूताइमाः ब्राह्मणाद्याः सर्वाः तु १
प्रजाः [illegible]
६ ॥

सदानंदीटीका ११

वेदवेदार्थद्रष्टारः सर्वज्ञायेमहर्षयः सर्गाद्यकालेसंभूताः संप्र
दायप्रवर्तकाः १ सावर्णिमनवस्तद्वत्तारोयदिपूर्वे सप्तभृग्वा
दयस्तेभ्यः प्रथमाः सनकादयः २ स्वायंभुवादयस्तद्वन्मनवोयेच वा १
तुर्दश मयेशभावनायेषांमत्स्थितंपराहिते ३ मद्भावनावशादा
विर्भूतमज्ञानशक्तयः संकल्पादेवसंभूतानतुयोनिसमुद्भवाः ४
अतोविशुद्धजन्मत्वात्सर्वप्राणिवराजताः प्रादुर्भूताहिसर्गादौमत्तो
विश्वसृगात्मनः ५ येषांसप्तमहर्षीणांमनूनांचतथैवच चतु
र्णांसनकादीनामस्मिंल्लोकेचजन्मना ६ विद्ययाचप्रजाः सर्वाः
ब्राह्मणाद्याइमाः किल ७ ६ ॥

नीलकंठीटीका १२

एतदेवशिष्टाचारप्रदर्शनेनद्रढयतिमहर्षयइति सप्तभृग्वाद्याः
चत्वारः सनकादयश्चपूर्वेप्रसिद्धाः महर्षयइतिसंबंधः तथामनवो
श्चतुर्दशप्रसिद्धाः तेसर्वेमानसाः हिरण्यगर्भरूपस्यममममनसएवो
द्भूताअयोनिजाजाताउत्पन्नाः इमाः प्रजाश्चतुर्विधाअयंलोकश्चतदा
धारभूतः नत्रभयंयेषांयत्संबंधिसंततिः येषांसंततिरित्यर्थः य
द्वा येषामितिषष्ठीपंचम्यर्थे येभ्यः इमाः प्रजाः अयंलोकश्चजाताः इ
त्यर्थः तेपिमद्भावाः मय्येवभावोमनोयेषांते प्रसिद्धमहिमानोयेषां
ते प्रसिद्धमहिमानोप्येतेयतोमामेवोपासतेऽतस्त्वमपिमामुपास्स्वे
तिभावः ६ ॥

ज्ञानेदीटीका

अहमादिरिति यदुक्तम् तत्प्रपंचयति ॥ ॥ ॥

मद्भावाः मत्तः परमकारणादेव भावउत्पत्तिर्येषां अत एव मानसाः संक-
ल्पमात्राज्जाताः ६

एवंविधानां धर्माणामाश्रयभू

रामकंठीटीका

तान्धर्मिणः प्रजापतिभ्यो मत्त एव भवन्ती
त्याह ॥ पूर्वे कल्पारंभभाविनः स्वायंभुवमन्वंतरभूताः पूर्वकालभाविनत्वात्प्रथमे सप्त
महर्षयो मरीच्यादयो ये पुराणप्रजापतय उक्ताः केचित्तु हि मनसाम
हाभूतपंचकं चेति सप्त महर्षीन् कथयंति प्रजासर्गहेतुत्वात्तेपि प्रजापत
य इति चाहुः चत्वारो मनवो ब्रह्मसावर्णो भद्रसावर्णो धर्मसावर्णो रुद्र-
सावर्ण इति रुद्रपुत्रहितरूपमाः प्रजासर्गं प्रति वर्णो वा तत्र वर्णापेक्ष प्रथ
मे पूरुषा येषां ब्राह्मणादिवर्णसर्गहेतुत्वात्मनुत्वं प्रजापतित्वं च एते
मद्भावा मत्तः परमकारणादेव भाव उत्पत्तिर्येषां ते तथाविधाः कीदृशाः
संतो मद्भावा मानसाज्जाताः संकल्पजा इत्यर्थः येषां प्रजापतीनां सं-
तानमेवं विधिस्थो लोके भुवने षिमाः प्रजाये प्रजासर्गकर्तारः कल्पारंभे प्रजा
पतयः श्रूयंते मदिच्छोद्भावित सृष्टभावा इत्यर्थः
६ ॥

लासिकी …तीटीका

किंच सप्त भृग्वादयो महर्षयः सप्त ब्राह्मणानि निपुणाः प्रसिद्धाः तथा तेभ्योपि पूर्वे
चत्वारो महर्षयः सनकादयः तथा मनवः स्वायंभुवादयश्चतुर्दश म
द्भावा मत्तो भवउत्पत्तिर्येषां ते कथमित्याह मानसाः संकल्पमात्राज्जाताः न
तु योनिजाः तथा च पुराणम् भृगुं मरीचिमत्रिं च पुलस्त्यं पुलहं क्रतुम् व
सिष्ठं च महातेजाः सोसृजन्मनसा सुतानिति एवं महर्षीणामपि मत्त एव प्र
भवत्वात् मदभिव्यक्तपरिज्ञाने का कथान्येषां तदुत्तरकालभाविनामित्या
ह जाता इति येषां भृग्वादीनामिमा ब्राह्मणाद्या लोके वर्तमानाः प्रजा जन्म
नाविद्यया च संतति भूताः प्रवर्तते ६ ॥

पंचोलीटीका

किंच महर्षय इति पूर्वे अतीतकाले भवाः सप्त भृग्वादयो मह-
र्षयस्तथा सावर्णादयः इति प्रसिद्धाश्चत्वारो मनवः ते सर्वे पकाद-

गी॰ श मद्भावाः मच्चितोवैस्सवसामर्थ्ययुक्ता मनसैवउत्पादिता मा
टी॰ नसाजाताउत्पन्नायेषांप्रकादशानांलोकः सर्वाः इमास्थावर
द॰ जंगमरूपाः प्रजापुत्रपौत्रादिरूपाशिष्यप्रशिष्यादिरूपाश्चप्र
जावर्तते ६

रणवीरसमिद्बोधिनी॥

अथयेचपूर्वेमहर्ज्ञानस्तानप्याह महर्षयइति पूर्वेसप्तमहर्षयः
पुराणप्रजापतयो येपुराणेषुप्रोक्ता मरीच्यादयस्तथाचपूर्वेस्वायं
भुवादयश्चत्वारोमनवस्तेच मानसाः संकल्पमात्रादेवजाता अपि
तथापिमद्भावा ममभावा मयैवोत्पादिता भावाअनंतवद्वन्त्यर्थः ये
षामिति पंचम्यर्थेषष्ठीयेभ्यः प्रजापतिभ्योलोकेजीवलोके इमाः
प्रजाजाताभवंतीतिश्रूयंतेचेति ६॥

मधुभाष्य

६॥

और भृगु आदि सात महर्षियेई पुराणोंमे सात ब्राह्मण करके प्रसिद्ध है और नके भी पूर्व सनकादि चारि ब्राह्मण और स्वयंभू आदि चौदह मनु इन सबमे मेरा प्रभाव है औरये सकल हिरण्यगर्भजोमै सोमेरी इच्छासे प्रगटे हैं येई सात ऋषियों से पुत्र पौत्र शिष्य प्रशिष्य क्रम से सनातन ब्राह्मणादि वर्ण सकलजन्मेहै ६ ॥

दोहा

सप्तमहाऋषि चारमनु पूर्वकहे हैं जोय मोरे मनसें यह भय
होइ प्रजा जिनसोंय ६

93

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सो
(कंल्पे) विकंपेन योगेन युज्यते नात्र संशयः ७ ॥

शंकरभाष्यटीका १

एतामिति एतां यथोक्तां विभूतिं विस्तारं योगं च युक्तिं चात्म-
नो घटनमथवा योगैश्वर्यसामर्थ्यं सर्वज्ञत्वं च योगजं योग उच्यते मम
मदीयं योगं यो वेत्ति तत्त्वतस्तत्त्वेन यथावदित्येतत् सः अविकल्पेना-
प्रचलितेन योगेन सम्यक्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते
नात्र संशयः नास्मिन्नर्थे संशयोऽस्ति ७ ॥

आनन्दगिरिकृतटीका २

सोपाधिकं प्रभावं भगवतो दर्शयित्वा तज्ज्ञानफलमाह एतामिति
ब्रह्माद्युपादानत्वेन विविधा भूतिर्भवनं वैभवं सर्वात्मकत्वं तदाह
विस्तारमिति ईश्वरस्य तत्तदर्थसंपादनसामर्थ्यं योगस्तदाह आत्म
न इति योगस्य तत्फलमैश्वर्यं सर्वज्ञत्वं सर्वेश्वरत्वं च मदीयं शक्तित-
त्त्वलेशमाश्रित्य मन्वादयो भृग्वादयश्चेशते जानते च तदाह अथवेति
यथा तौ विभूतियोगौ तथा निरंकुशत्वेनेति वेदनस्य निरंकुशत्वं दर्शि
यति यथावदिति सोपाधिकं ज्ञानं निरुपाधिकज्ञाने द्वारमित्याह
सोऽविकल्पेनेति उक्तेऽर्थे प्रतिबन्धाभावमाह नास्मिन्निति ७ ॥

स्वामिकृतटीका ३

यथोक्तविभूत्यादितत्त्वज्ञानस्य फलमाह एतामिति एतां भृग्वा-
दिलक्षणां मम विभूतिं योगं चैश्वर्यलक्षणं तत्त्वतो यो वेत्ति स निःसं- (अविकल्पेन)
शयेन योगेन सम्यग्दर्शनेन युक्तो भवति नात्र संशयः ७ ॥

पिशाचभाष्यटीका ४

एतां विभूतिं विस्तारं योगं च विभूतेर्हेतुभूतं मदीयं यो वेत्ति तत्त्वतः या-
थावत्तः अविकंपेन योगेन समाधिना युज्यते ७ ॥

रामानुजभाष्यटीका ५

एतामिति विभूतिरैश्वर्यं एतां सर्वस्य मदायत्तोत्पत्तिस्थितिप्रवृत्तिरूपां
मम हेयप्रत्यनीककल्याणगुणाख्यं योगं च यस्तत्त्वतो वेत्ति सोऽविकंपे

नत्वप्रकंपेनमद्भक्तियोगेनयुज्यतेनात्रसंशयः मद्विभूतिविषयंक
श्री· ल्याणगुणविषयंचज्ञानंभक्तियोगवर्द्धनमितिस्वयमेवद्रढयामीत्यभि
गी·टी· प्रायः १ ॥ अभिनवगुप्तकृतटीका ६
द· स्पष्टार्थं १ ॥ ॥ ॥ ॥

अथोक्तपरंपरापुरःसरंतत्वज्ञानस्यफल माह एतामिति

परमार्थप्रपाटीका ७

एतांपूर्वादिलक्षणामद्विभूतियोगमैश्वर्यलक्षणंतत्वतोयोवेत्तिसत्व
विकंपेनास्थिरेणममैश्वर्ययोगेनयुक्तोभवतिनात्रसंशयः नात्रक
श्चिद्दोषमित्यर्थः [illegible]
[illegible] २ ॥

वनमालीटीका ८

ऐश्वर्यज्ञानस्यफलमाह एतामिति एतांप्रागुक्तांमद्विभूतिंब्रह्मादि
दिव्यरूपामायां रूपांभगवतोब्रह्मांडेनानाचेष्टवत्तयापटीयसीं परमार्थभूता
तो^ द्भेयानतिंद्रजालवन्मृषेतितत्वयोवेत्तियोगंसर्वजगदुद्याधिक
यो^ त्वेनसामर्थ्यंवनावशमेवेत्ति सोविकंपेननाशादिशून्येनयोगे
माधिना^ नसाधर्म्याख्येनमत्प्रयुज्यतेनात्रसंशयः १ ॥

ऊसमवैजयंतीटीका ९

एवंस्वस्यप्रभावमुक्त्वेदानींतज्ज्ञानफलमाह एतामितिममसर्वेश्वरा
स्यएतांब्रह्मरुद्रेंद्रादिदेवसनकादिमहर्षिस्वायंभुवादिमनुप्रमुखं
कृत्स्नंजगन्मदायत्तस्थितिप्रवृत्तिज्ञानेश्वर्यशक्तिकंभवतीत्येवमपा
रमैश्वर्यरूपांविभूतिंचपुनः अजत्वानादित्वसर्वलोकमहेश्वरत्वा
दिभिस्वाभाविकानंताचिंत्यासंख्येयकारुण्यादिकल्याणगुण
गणरत्नैर्योगंस्वाभाविकरूपावदातमहतिसंबंधं योमदेकस्तत्वतो
याथार्थ्येनवेत्तिसर्वैस्तैःसमैश्वर्येणापदिष्टमिदंनात्विकमेवभवतीति
दृढंविश्वासेनगृह्णातिसोऽविकंपेनाप्रचलितेनयोगेनमद्भक्तियो
गेनयुज्यतेयुक्तोभवति नात्रसंशयः अत्रास्मिन्नर्थेनयासंशयोन
तंभक्तियोगवर्द्धनंभवतिनवेतिसंशयस्तवकदाचिदपिमाभूदित्य
भिप्रायः १ ॥

मधुसूदनीटीका १०

एवंसोपाधिकस्यभगवतःप्रभावमुक्त्वातज्ज्ञानफलमाह ॥

एतां प्रागुक्तां ब्रह्मादिमहर्षीदिरूपां विभूतिं विविधभावेन रूपेणावस्थि
तिं योगं च तत्त्वतः तद्दर्शनिर्माणसामर्थ्यं परमैश्वर्यमिति यावत् मम यो वेत्ति
तत्त्वतः यथावत् सः अविकंपेनाऽप्रचलितेन योगेन सम्यग्ज्ञानस्थैर्यलक्ष
णेन समाधिना युज्यते नात्र संशयः प्रतिबंधः कश्चित् [illegible]
[illegible] ७ ॥

सदानंदीटीका ११

एवमुक्तो भगवतः प्रभावं सविशेषतः तज्ज्ञानफलमाहात्म्यं भगवानात्मा
त्मनापतिः १ विस्तारसंक्षिकामेतां विभूतिं पूर्वकीर्तितां योगं च परमै
श्वर्यं सर्वसामर्थ्यमद्भुतं यथावन्मम यो वेत्ति सोऽप्रचलितेन च सम्या
ग्धीस्थैर्यरूपेण युज्यते स तु समाधिना २ न कश्चित्प्रतिबंधोऽत्र शंकनीयः
कदाचन ४ ७ ॥

नीलकंठी टीका १२

उपास्त्यादिकारणमाह एतामिति एतां वक्ष्यमाणां विभूतिं योगं च वि
घटनामुखे भगवति मनः समाधानं यस्तत्त्वतो वेत्ति सम्यग्जानाति तज्ज्ञाने
च समर्थो भवति सः अविकंपेन अचलेन निर्विकल्पकेन षष्ठाध्यायोक्ते
न योगेन महर्षियोग्यसमाधिना युज्यते न तु स्वकृतं न कृत्यो भवति नात्र सं
न्य? शय इति प्रकृतिशयार्थमुच्यते भगवद्वचसि संशयासंभवात् ७ ॥

आनंदीटीका

एतां बुद्धिर्ज्ञानमित्याद्युक्तां विभूतिं सर्वकर्तृत्वादिकमैश्वर्यं योगं प्राणि
नां कृतस्य कर्मणः फलप्रापणोऽस्मवधं यो वेदसोऽविकल्पेन निर्विघ्नेन
योगेन योगाभ्यासपूर्वज्ञानकर्मसमुच्चयेन युज्यते संबद्धो भवति
एवंविधस्वैश्वर्यज्ञानफलमाह ॥

रामकंठीटीका

एतां यथोक्तां विभूतिं जगत्कर्तृत्वादिरूपमैश्वर्यं तथा योगं नानाभाव
प्रपंचावभासनरूपकर्तृत्वादिसंबंधेऽप्यद्वयचिन्मात्रस्वभावाप्रच्युतिल
क्षणमत्यद्भुतमनन्यसाधारणं समाधिमस्य यस्तत्त्वतो वेत्ति जानाति स
मदीयेनैवाविकंपेन सर्वदा निरुपप्लवेन योगेन समाधिना युज्यते संब
ध्यते नात्रार्थे कश्चित्संदेहः संभवति यतो मदनुग्रहाविभूत सम्यग्ज्ञान

तयाममैवैकस्यतत्वस्यजगत्तत्तांविभवंसम्यगेणाविभावयतिसम
त्वरूपसमाविश्टत्वात्मदीयेनसमाधिनासंवध्यतइतिकोऽत्रसंशयावका
शः यतएवंविधः ७॥

२५

एवंविधैश्वर्यज्ञानफलमाह॥ लासिकी [illegible]लीटीका

ममैश्वरस्यैतांयथोक्तांविभूतिंभगवादिरूपेणविशिष्टतयाविविधतेन
वाभवनंयोगंचतास्वविभूतिषुमहाव्याप्तिलक्षणांफक्लिंचततनस्तत
ज्ञानात् ननुवोद्धेनवोधंनयोवेत्तिसालाकरोति सोविकंपेनतिरूप
त्वेनयोगेनसमाधिनायुज्यतेसंवध्यते नात्रार्थेयोगादप्रच्युतिरूपक
श्चित्संदेहः ननुकथंकारमेवंस्यात्माभिषिच्यतेइत्याशंक्यमेवम् नैतत्क
थनमात्रयतोवुद्धिमन्तएवमामेवज्ञात्वोपासतेइत्याह ८॥

पंचोलीटीका

यथोक्तविभूत्यादितत्वज्ञानस्यफलंआह एतामितियःममए
तांविभूतिंविस्तारंयोगंचयोगजंसर्वज्ञत्वंयोगउच्यते अथवा
योगमैश्वर्यंतत्वतःयाथात्म्येनवेत्तिसोऽविकंपेनअप्रचलितेन
योगेनसम्यग्ज्ञानेनस्थैर्यरूपेणयुज्यतेसंवध्यतेअत्रसंशयोन ७

रणवीरसमिद्धोधिनी॥

एतां यथोक्तवक्ष्यमाणांचविभूतिमैश्वर्ययोगं सामर्थ्यंच यस्त
त्वतोयथावद्वेत्ति सस्वविकंपेननिर्वाधेन योगेन सामर्थ्येन स
द्युज्यते योगयुक्तो भवतीत्यर्थोनात्रसंशयइति ७॥

मधुभाष्य

८॥

अब यह सब उक्त विभूति कहे अपनी सम्पति के तत्व ज्ञान का फल कहते है कि येई भृगु आदि हमारी विभूति औ ऐश्वर्य रूप योग हैं यह जो मनुष्य यथार्थसे जानै है सोसंशय रहित सर्वत्र सम्यक दर्शन होयहै ७ ॥

दोहा॥

युक्त सो नि
याहि विभूतियोग मम तत्व कर जानहिं जोहि
अतलयोगसें श्‍हांसंदेह न कोहि ७॥

26

अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते इतिम
त्वाभजंतेमांबुधाभावसमन्विताः ८ ॥

शांकरभाष्यटीका १

कीदृशेनाविकल्पेन योगेन युज्यत इत्युच्यते अहमिति अहंपरं ब्रह्म वासुदेवाख्यं सर्वस्यजगतः प्रभवउत्पत्तिर्मत्तएव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं सर्वंजगत् प्रवर्तते इत्येवंमत्वा भजंते सेवंतेमांबुधा अवगतपरमार्थतत्वार्थाः भावसमन्विताः भावोभावना परमार्थतत्वाभिनिवेशस्तेन समन्विताः संयुक्ता इत्यर्थः ८ ॥

आनंदगिरिकृतटीका २

कथंतावकविभूत्यैश्वर्यज्ञानयुक्तयोगस्य हेतुरिति मत्वा पृच्छतिकीदृशेनेति उक्तज्ञानमाहात्म्यात् प्रतिष्ठिता भगवन्निष्ठा सिध्यतीत्याह उच्यतइति प्रभवत्यस्मादिति प्रभवः सर्वप्रकृतिः सर्वात्मेत्याह उत्पत्तिरिति सर्वज्ञात् सर्वेश्वरान्मत्तोनिमित्तात् सर्गस्थितिनाशादिभवति मयान्तर्यामिणाप्रेर्यमाणंसर्वं यथा स्वमर्यादामनतिक्रम्यचेष्टते तदाह मत्तइति इत्थंममसर्वात्मत्वं सर्वप्रकृतित्वं सर्वेश्वरत्वं सर्वज्ञत्वंच महिमानंज्ञात्वामामेव निष्ठावन्तोभजंतीत्याह इत्येवमिति संसारासक्ताज्ञानवतां भगवद्भजनेधिकारं द्योतयति अवगतेति परमार्थतत्वं स्वीकरीष्यामीत्यभिप्रायादरावभिनिवेशाख्यो भवनस्तेन संयुक्तत्वंच भगवद्भजने भवति हेतुरित्याह भावेति ८ ॥

स्वामिकृतटीका ३

यथाचविभूतियोगयोर्ज्ञानेनसम्यक्ज्ञानावाप्तिस्तद्दर्शयति अहंसर्वस्येतिचतुर्भिः जगतः प्रभवः भृग्वादिमन्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुः मत्तएवचास्यसर्वस्यबुद्धिर्ज्ञानमसंमोहइत्यादिसर्वंप्रवर्ततएवंमत्वाबुधाः विवेकिनोभावसमन्विताः प्रीतियुक्तामांभजंते ८ ॥

पिशाचभाष्यटीका ४

अहंसर्वस्येति मांबुधाभावसमन्विताः प्रभवः उत्पत्तिकारणंमत्तः परमेश्वरात्सर्वंक्रियाकारकफलरूपंतेनसमन्विताः संयुक्ताइत्यर्थः

भावस्तत्त्वार्थाभिनिवेशः जगत्प्रवर्तते इत्येवं मत्वा भजन्ते सेवन्ते मां बुधा अवगतपरमार्थतत्त्वार्थाः ८ ॥

रामानुजभाष्यटीका ५

विभूतिज्ञानविपाकरूपां भक्तिवृद्धिं दर्शयति अहमिति अहं सर्वस्य चिदचित्प्रपञ्चस्य प्रभव उत्पत्तिकारणं सर्वं मत्त एव प्रवर्तत इति इमं मम स्वाभाविकं निरङ्कुशैश्वर्यं सौन्दर्यसौशील्यवात्सल्यादिकल्याणगुणगणयोगं च मत्वा बुधाः ज्ञानिनो भावसमन्विताः मां सर्वकल्याणगुणान्वितं भजन्ते भावो मनोवृत्तिविशेषः मयि स्पृहावन्तो भजन्त इत्यर्थः ८ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ८ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

यथाविभूतियोगयोर्ज्ञानेन तत्त्वज्ञानं भवति दर्शयति अहमिति चतुर्भिः॥ अहं सर्वस्य भूतादिमं वैतत्प्रपञ्चस्य प्रभवः कारणं तथा मत्तः सकाशात् सर्वं प्रवर्तते व्यवहरति मत्वानुभवेन ज्ञात्वा भावसमन्विताः प्रीतियुक्ता बुधा ज्ञानिनो मां भजन्ते ८ ॥

वनमालीटीका ८

यादृशेन ज्ञानेन सा पूर्वोक्तयोगप्राप्तिः तद्दर्शयति अहमिति चतुर्भिः अहं वासुदेवः परब्रह्म सर्वस्य जगतः प्रभवः उत्पत्तिकारणं स्थितिनाशादिकं च सर्वं मत्त एव प्रवर्तते मयैवान्तर्यामिणा सर्वज्ञेन सर्वशक्तिना प्रेर्यमाणं स्वस्वमर्यादामनतिक्रम्य सर्वं प्रवर्तते चेष्टत इति वा इत्येवं मत्वा बुधा विवेकेनावगततत्त्वाः भावेन भक्तिप्रेमप्रवाहेन समन्विताः मां भजन्ते प्रेमप्रवाहपूर्वकोत्कण्ठयेत्थं मामेवमात्युत्कृष्टभजनमिति भावः ८ ॥

कृष्णमैवजयंतीटीका ९

ननु कीदृशेनात्विकेन योगेन युज्यत इत्यपेक्षायां मद्भक्तनयभक्तानां भक्तपुण्यादकं तत्पालकं च पापात्मयज्ञानमेवेत्याह अहं सर्वस्येति अहं सर्वेश्वरः परब्रह्म वासुदेवाख्यः पुरुषोत्तमः सर्वस्य चेतनाचेतनात्मकस्य जगतः प्रभवः प्रभवत्यस्मादिति प्रभवो निमित्ताभिन्नोपादान

कारणं मत्तः सर्वं प्रवर्तते मयैवान्तर्यामिणानन्तगुणशक्त्यैश्वर्य
माणा तत्तत्स्वमर्यादमनतिक्रम्य सर्वं ब्रह्मादिस्थावरान्तं जन्मस्थि
तिनाशवन्मदधीनस्थितिप्रवृत्तिकं मद्भृत्यं तं समस्तं विश्वं प्रवर्तते
निष्पत्ति चेष्टते वा इत्येवं प्रकारेण मम सर्वकारणत्वं सर्वान्तरकल्याण
गुणयोगं च मत्वा ज्ञात्वा मां सद्गुरुमुखाद्विनिश्चित्येत्यर्थः भावसमन्वि
ताः भावोऽनुरागः मयि भावेनानुरागेण समन्विताः सम्यग्यु
क्ताः बुधा ज्ञानिनो मां सर्वेश्वरं भजन्ते सेवन्ते ८ ॥

यादृशेन विभूतियोगयोर्ज्ञाने ^ मधुसूदनीटीका १० ^ नाविकंपयोगप्राप्तिस्तद्दर्शयति चतुर्भिः ॥

अहं परं ब्रह्म वासुदेवाख्यं सर्वस्य जगतः प्रभव उत्पत्तिकारणमुपा
दानं निमित्तं च स्थितिनाशादि च सर्वं मत्त एव प्रवर्तते भवति मयैवा
न्तर्यामिणा सर्वज्ञेन सर्वशक्तिना प्रेर्यमाणं स्वस्वमर्यादामनति
क्रम्य सर्वं जगत्प्रवर्तते भवति चेष्टते इति वा इत्येवं मत्वा बुधाः वि
वेकेनावगततत्त्वाः भावेन परमार्थतत्त्वाग्रहरूपेण प्रेम्णा समन्वि
ताः सन्तो मां भजन्ते ८ ॥

सदानंदीटीका ११

अहं श्रीवासुदेवोऽस्य सर्वस्य जगतः प्रभवः उपादानं निमित्तं च मत्तः सर्व
लयस्थिती १ मयान्तर्यामिणा सर्वशक्तिना सर्ववेदिना प्रेर्यमाणं ज
गत्सर्वं स्वस्वकार्ये प्रवर्तते २ इत्येवं सद्विवेकेन ज्ञानवाः सदा बुधाः तः
स्त्रौ प्रे[illegible]वात्सल्यवत्त्वैकबोधेन च समन्विताः ३ भजन्ते मां परानन्दघनं श्रीप
विधान रमेश्वरं यस्मिन्निदं जगदशेषहेतौ मायाविलासपरिभावि[illegible]तम
स्त्वबोधे कालत्रयेऽपि मरुभूजलवन्मृषैव माभाति तत्र रमतां हृदयं हृदये
मे ८ ॥

नीलकंठी टीका १२

उपासनास्वरूपमाह द्वाभ्याम् अहमिति बुधाः मां प्रत्यगात्मानं इति मत्वा
भजन्ते इति कथ्यं अहमेव सर्वस्य जगतः प्रभव उत्पत्तिः मत्तः मदनुग्रहा
प्राप्येव सर्वं बुध्यादिकं स्वस्वकार्याय प्रवर्तते अहमेव जगतः कर्तान्तर्या

श्री·
गी·टी·
८·

९८

मीचेतिअहंअहेणात्मानमुपासी(ते)तिभावः भावसमन्विताः भावनायु
क्ताः पतञ्जोनरार्थे ८ ॥

आनंदीटीका

अयंवासुदेवएवसर्वस्यजगतआदिकारणम् इतोस्मादेवसर्वलो
कयात्रानिर्वंधनेवज्यादिकमस्मिन्जगतिप्रवर्तते इतीदृशंनिश्चिता
भावेनपरमार्थतात्पर्येणभावेनप्रेम्णासमन्विताबुधामांभजन्ते
मेवाह ८

रामकंठीटीका

बुधामांभजंतेमदिच्छयैवदेवमहत्त्वाद्यसर्गभावतात्मदनुग्रह
पात्रभूततयासमाविर्भूतबोधास्संतोमुख्यविपश्चितोमांयथात्रच
पमुपासतेतान्येतरसर्गभावात्ततोमत्समाधिनायुंजंतेतेचकिंकृ
त्वासमुपासतेइतिमत्वाएवंमत्स्वरूपंनिश्चित्यकथं अयंपरमेश्वरःप
रमात्मासर्वभावजातस्यप्रभवउत्पत्तिकारणंयस्मादक्षरः प्रतिपादि
तोपपत्तिवशादेतद्व्यतिरिक्तकारणांतराभावादितएतस्मादेवहेतोः
सर्वमिदंप्रवर्ततेप्रसरतीति इदमत्रतात्पर्यं द्विविधंज्ञानंनिर्विकल्प
त्वक्रमेणतत्त्वसाक्षात्कारप्रभवमपरंतद्धेतोबुधाअपिद्विविधास्ततो
परमार्थप्रतिपादकशास्त्रोपदेशादृढप्रतिपत्तिजनकमेकं तद्गुणा
यथोक्तमहिमप्रतियोगतामत्समाधिनायुंजंतेनात्रसंशयइत्युक्तं
८॥

लासिकी [illegible]टीका

अहमीश्वरः सर्वस्यजगतःप्रभवःकारणमुपादानंनिमित्तंच मत्त
एवसर्वंस्थितिनाशादिप्रवर्ततेभवति इत्येवंविधैश्वर्ययुक्तंमामीश्व
रंमत्वाप्रमाणेननिश्चित्य बुधाआत्मबोधयुक्ताभावसमन्विताःप्रीति
युक्ताः संतोभजंतेसमुपासतेइति ८

पंचोलीटीका

अविकंपयोगस्वरूपंदर्शयन् तेनयथाज्ञानंभवतितंप्रकारमाह
अहमिति अहंपरंब्रह्मसर्वस्यजगतः प्रभवः सर्वजगतःस्थिति
नाशकर्मफलोपभोगरूपंविक्रियास्वरूपंमत्तएवप्रवर्तते इति
एवंमत्वाबुधाः अवगततत्वाः भावसमन्विताभावः परमार्थत-
त्वाभिनिवेशस्तेनयुक्तामांभजंतेआश्रयंते ८

श्रीवीरमित्रोदयिनी॥

बुधा अवगतपरमार्थतत्वा भावसमन्विताभावःस्वभावस्तेन
समन्विताःस्वधर्मनिष्ठाइत्यर्थः तेहि अहं सर्वस्यभावजातस्य
प्रभव उत्पत्तिकारणमतो मत्तएवसर्वंभावजातंप्रवर्तते प्रसरती
ति मद्वचनं मत्वानिश्चित्यमां भजंतेउपासतइति मद्भजनेचेष्टितं
तेषामाह मच्चिताइति ८॥

मधुभाष्य

यद्यद्विभूतिमदितिविस्तरः विभूत्यादीनितत्स्वरूपाण्येव अन्या-
नित्वतेजोंऽशकानि तथाचपैंगिखिलेषु विशेषकारुद्रदैत्यैश्च-
देवाराजन्यायाश्चप्रयुता अन्यजीवाः कुलस्थ्यासौरामहत्कैलासौ
रामकपिलौयज्ञऋषभवाःस्वयमइति सएवैकोभार्गवदाशरथि
कृत्स्नायास्तव्यंयुता अन्यजीवाइतिगोतमाखिलेषु ऋषयोमन-
वोदेवामनुपुत्रामहौजसः कलाःसर्वेहदेवेवसप्रजापतयःस्म-
ताः एतेस्वांशकलाःपुंसःकृष्णस्तुभगवान्स्वयमिति वभाग-
वते मत्स्यादीनांप्राधान्येनोक्तावराहादीनांस्वरूपत्वेनाह तथाहृपवा
द्गु अन्यस्तुविष्णोर्नंदकृष्णएवगतः श्रीरामत्वंतस्याप्यवगतेमद्र
ह्यन्मनः केयाविति मद्यंतीति वहूवचनंचाप्युक्तं नसंतताय
इत्काएर्वमपरामत्स्यतत्क्रियोत्यमानाद्दशाऊर्ध्वचित् किमिति

वक्ष्यमाणप्राधान्यज्ञापनार्थं ननूक्तनिष्कलत्वज्ञापनाय त
थास्तु तिनोच्यते अज्ञातैर्नं सर्वविशेषणैः के देववरं कोविश्वे
तवंयादितिच स्वेदरविलेशं वंदेवृहत्फलप्राप्तियोग्यइति
नवेतिविशेषणं अन्यस्तुत्यथैवेन प्रसिद्धस्यैकस्य किं प्राह:
२१ रागद्वेषौयदिस्यातां तपसा किं प्रयोजनं तावुभौयदिनस्यातां
तपसा किं प्रयोजनमित्यादेः प्राधान्यं च सिद्धमेकस्य दर्शनात्स
र्वत्रभगवद्दर्शनस्य यो मां पश्यति सर्वत्रेत्यादेः ८ ॥

भाषाअनुवादटीका ८

अब विभूति औ योग जानने से जिस प्रकार सम्यक ज्ञान प्राप्ति होती है सोई चारि श्लोकसे देखावतेहै कि मैंही समस्त जगत का प्रभव अर्थात भृगु आदि मनु आदि रूप विभूति के द्वारा उत्पत्ति काहेतहौं और हमी से बुद्धि औ ज्ञान सकल उत्पन्न होते यही जानिके विवेकी लोग प्रीतियुक्त होय हमारी भजन करते हैं ८

दोहा

मैं हौं कारण सबनको मोसैं यह सब होय ऐसें मानि भ
जत मोहि बुधजन भावहिसोंय ८

3°

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं कथयं
तश्च मां नित्यं तुष्यंति च रमंति च ९ ॥

शांकरभाष्यटीका १

किंच मच्चित्ता इति मच्चित्ता मयि चित्तं येषां ते मच्चित्ता मद्गतप्राणाः म
यि गताः प्राणाश्चक्षुरादयः प्राणा येषां ते मद्गतप्राणा मय्युपसंहृतक
रणा इत्यर्थः अथवा मद्गतप्राणा मद्गतजीवना इत्येतद्बोधयन्तोऽवग
मयंतः परस्परमन्योन्यं कथयंतो ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तु
ष्यंति च परितोषमुपयांति रमंति च रतिं च प्राप्नुवंति प्रियसंगत्येव ९

आनंदगिरिकृतटीका २

नकेवलमुक्तमेव भगवद्भजने साधनांतरं चास्तीत्याह किंचेति ऐश्व
रात् प्रतीचः प्रागुक्तादन्यत्र चित्तप्रचाराराहित्यं भगवद्भजनोपायमा
हमयीति चक्षुरादीनां भगवत्यभिमुखत्वस्य गोचरत्वात्तस्याशक्यत्वादाह
य्यु म[य्यु]पसंहृतेति भगवदतिरेकेण जीवनेऽपि नादरस्तदपि मय्येवार्पि
तं भक्तानामित्याह अथवेति आचार्येभ्यः श्रुत्वा वादकथया परस्परं
भगवंतं सब्रह्मचारिणो बोधयंति तदपि भगवद्भजनसाधनमित्याह
बोधयंत इति आगमोपपत्तिभ्यां भगवंतमेव विशिष्टधर्माणं शिष्ये
भ्यो गुरवो व्यपदिशंति तदपि भगवद्भजनमेवेत्याह कथयंत इति भ
क्तानां तुष्टिरती स्वरसतः स्यातामित्याह तुष्यंतीति मनोरथपूर्त्या रति
प्राप्तौ कामुकसमानमुदाहरणमाह स्त्रियेति ९ ॥

स्वामिकृतटीका ३

प्रीतिपूर्वकं भजनमेवाह मच्चित्ता इति मय्येव चित्तं येषां ते मच्चित्ता मा
मेव गताः प्राप्ताः प्राणा इंद्रियाणि येषां ते मद्गतप्राणा मदर्पितजीव
ना इति वा एवंभूताः सन्तो बुधा अन्योन्यं मां न्यायोपेतैः श्रुत्यादिप्रमाणैर्बो
धयंतः बुद्धा च मां कथयंतः कीर्तयंतः संतः तुष्यंति अनुमोदनेन ना
खिंयांति रमंति च निर्वृतिं यांति च ९ ॥

पिशाचभाष्यटीका ४

श्री·
गी·टी·
द·

31

मच्चित्ता मद्गतचित्ताः मद्गतप्राणा मय्यवस्थिताः प्राणाः मद्गतजीवनाः
बोधयन्तः अन्योन्यं कथयन्तो मामीश्वरं निरतिशयज्ञानबलवीर्यसंपन्नं र
मन्ति च प्रियसंगमेनेव ९ ॥

रामानुजभाष्यटीका ९

कथं मच्चित्तेति मच्चित्ता मयि निविष्टमनसः मद्गतप्राणाः मद्गतजीविताः
मया विनात्मधारणमलभमाना इत्यर्थः स्वैः स्वैरनुभूतान् मद्गुणान्
परस्परं कथयन्तः मदीयानि दिव्यानि रमणीयानि च कर्माणि कथयन्त
स्तुष्यन्ति च रमन्ति च वक्तारः श्रोतृप्रश्नेनानन्यप्रयोजनेन तुष्यन्ति श्रोतार
श्च तच्छ्रवणेनानवधिकातिशयप्रियेण रमन्ते ९ ॥

अभिनवगुप्तकृतटीका ९ स्यात्पार्थम्

परस्परं बोधयन्तो यान्येव बोधयन्तस्तत्कमणानां बोधा हि नमानाः स्वकरे
वदन्ति विना यन्माः स्वैस्तैस्तैः सर्वे शान्तिं सर्वेषां तन्मात्रस्वरूपाणां यत
देन माहि सर्वेषामिति भावः ९ ॥

परमार्थप्रपाटीका ९

प्रीतिपूर्वकं भजनमाह मच्चित्ता इति मय्येव चित्तं येषां ते मच्चित्ताः अन्त
र्निष्ठा मयि गताः प्राणा इन्द्रियाणि येषां ते बहिरपि मद्रूपजगत्पश्यन्तः
एवमनुभूतमर्थं परस्परं श्रुतिवाक्यैर्बोधयन्तस्तत्कथाभक्तानां मां कथयन्तः
कीर्तयन्तः सन्तस्तुष्यन्ति तेन रमन्ते निर्वृतिं लभन्ते ९ ॥

वनमालीटीका ९

प्रेमपूर्वकं भजनमेव विवृणोति मदिति मय्यनन्तगुणालये वासुदेवे चि
त्तं येषां ते मच्चित्ताः तथा मद्गता मां प्राप्ताः प्राणाश्चक्षुरादयो येषां ते मद्गत
प्राणा मद्भजननिमित्तचक्षुरादिव्यापारा मत्स्वरूपसंग्रहनसर्वकरणा वा य
द्वा मद्गतप्राणा मद्भजनार्थजीवना मद्भजनातिरिक्तप्रयोजनशून्य
जीवना इति यावत् विद्वांसोऽपि च परस्परमन्योन्यं श्रुतिभिर्युक्तिभिश्च मा
मेव बोधयन्तः तत्तन्मन्त्रकथया ज्ञापयन्तः तथा स्वशिष्येभ्यश्च मामेव कथ
यन्त उपदिशन्तश्च मयि चित्तार्पणं तथा वाक्करणार्पणं तथा जी
वनार्पणं एवं समानानामन्योन्यमद्बोधनं स्वन्यूनेभ्यश्च मदुपदेशनमित्येवं

रूपं यत् मद्भजनं तेनैव तुष्यन्ति च एतावतैव लब्धसर्वार्था वयमलमा-
मेन लब्धव्यमिति अन्येषां प्रत्ययरूपं संतोषं प्राप्नुवंति तेन संतोषेण रमंति च
[illegible] प्रियसंगमेनेवोत्तमं सुखमनुभवंति ९ ॥

कुसुमवैजयंतीटीका ९

ननु केन प्रकारेण भजंतीत्यपेक्षायां तत्प्रकारमाह मच्चित्ता मद्गत इति
मयि सर्वकारणे सर्वगुणाधिविधिते मनो येषां ते तथा सर्वप्राकृतिकव्या-
स्तवेपतनहेतुभूतमिति मत्वा मदेकमानसाः मद्गतप्राणाः मयि गताः प्रा-
प्ताः प्राणाः जीवनहेतवो येषां ते तथा मद्गतजीविताः क्षणमपि मया वि-
नात्मधारणमलभमाना इत्यर्थः यद्वा मद्गतामांप्राप्ताः प्राणाश्चक्षुरादयः
करणानि येषां ते मद्भजनप्रयोजना येवं तत्र सर्वकरणानामप्रयोजनायेत्यर्थः
बोधयंतः परस्परं स्वसमानगोष्ठीषु श्रुतिस्मृतिपुराणेतिहासादियुक्ति-
भिः स्वैः स्वैरनुभूतान्मद्गुणान्परस्परमन्योन्यं बोधयंतः मत्स्वरूपगुणानुभु-
क्ताः कथयांतामयंतश्च तथा कथयंतः इत्येवं मां नित्यं प्रतिक्षणमेव भजंतः
संतस्तुष्यंति एतावतैव लब्धेनेन वयं पूर्णार्थाः किमन्येन लब्धेनेत्येवं प्रय- बो१
तिरूपं संतोषं प्राप्नुवंति च पुनः रमंति निरतिशयप्रियगुणकर्मलीलामृत
पानादिसुखमनुभवंतीत्यर्थः चकारेणात्मानं पितोषयंति रमयंति चे-
ति सूचितं ९ ॥

मधुसूदनीटीका १० प्रेमपूर्वकं भजनमेव विवृणोति

मयि भगवति चित्तं येषां ते मच्चित्ताः तथा मद्गतामांप्राप्ताः प्राणाश्चक्षुरा-
दयो येषां ते मद्गतप्राणाः मद्भजननिमित्तचक्षुरादिव्यापारा मदुपसंह-
तसर्वकरणा वा अथवा मद्गतप्राणाः मद्भजनार्थजीवनाः मद्भजनाति-
रिक्तप्रयोजनशून्यजीवना इति यावत् विद्वद्गोष्ठीषु परस्परमन्योन्यं श्रु-
तिभिर्युक्तिभिश्च मामेव बोधयंतः तत्त्वबुभुत्सकथया ज्ञापयंतः तथा
स्वशिष्येभ्यश्च मामेव कथयंतः उपदिशंतश्च मयि चित्तार्पणेन तथा बाह्य-
करणार्पणेन तथा जीवनार्पणेन एवं समानामन्योन्यं मद्बोधनेन स्वन्यूनेभ्य-
श्च मदुपदेशनेनेत्येवंरूपं यन्मद्भजनं तेनैव तुष्यंति च एतावतैव लब्ध-
सर्वार्था वयमलमन्येन लब्धव्येनेत्येवं प्रत्ययरूपं संतोषं प्राप्नुवंति च ते-
न संतोषेण रमंति च प्रियसंगमेनेवोत्तमं सुखमनुभवंति च तदुक्तं

श्री॰ गी॰ टी॰ ८॰

पतंजलिना संतोषादनुत्तमः सुखलाभ इति उक्तं च पुराणे यच्च कामसु
सुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं क
लामिति तृष्णाक्षयः संतोषः [illegible] ९ ॥

सदानंदीटीका ॥

विहरणं तिन मे वेशाभजनं प्रेमपूर्वकं येषां मय्येव चित्तं मद्गतेंद्रियवृ
त्तयः १ मद्गतं जीवनं येषां मद्भजनेनात्मलाभाने मामेव सन्तमायायेश्रु
तिभिर्युक्तिभिः सदा २ तत्त्वजिज्ञासकथया ज्ञापयंतः परस्परं स्वशिष्ये
भ्यश्च मामेवोपदिशंतो निरंतरं इत्येवं मत्परप्रेम्णा भजनेनैव सर्वदा सं
तोषप्राप्तवंतस्तत्र आत्मप्राप्त्यनयादरात् ४ संतोषेण रमंते च मत्प्रेमविवा
शीकृताः प्रियसमागमेनैवानुभवंति सुखं परं अत्र तन्मत्सुखप्राप्तिः
संतोषादेव नान्यतः ५९ ॥

नीलकंठीटीका ९

एवं ध्याने भावनाप्रकारमुक्त्वा तत्त्वज्ञानेन तमाह मच्चित्ता इति अहमेव चि
त्ते येषां ते मच्चित्ताः तथाहमेव गतो विद्यमानो येषु ते मद्गतास्तथा विधाः
प्राणा इंद्रियाणि येषां ते मद्गतप्राणाः चित्तेनेंद्रियैर्वा यद्गृह्यते तत्सर्वं ब्र
ह्मणात्मा वासुदेव इति भावयंत इत्यर्थः इममेवार्थं परस्परं बोधयंतः
श्रुतियुक्तिप्रदर्शनेन समानानां समुदायं ज्ञापयंतः कथयंतश्च शिष्या
न्प्रति तुष्यंति तेनैव ज्ञानेन तु मिष्टान्नादिना रमंति च तेनैव न तु स्त्र्यादा
वित्यर्थः ९ ॥

आनंदीटीका

प्रेमैवाह ॥ — मद्गतप्राणाः योगधारणाभिः मय्येव प्राणान्धारयन्तः मदर्थं प्राणा
न्यर्पितबोधनं दित्सवो बोधयंतः परस्परम् स्वानुभूतं परानपि ज्ञाप
यंतः कथयंतश्च मां परेभ्योपि मत्कथाः श्रावयंतः तुष्यंति स्वयं प्रीयंते
रमयंति परानपि तोषयंति ९ ॥

रामकंठीटीका

येन मां भजंते तेषामेवं विधं चेष्टि तमित्याह ॥ मच्चित्ता मयि चित्तं मनः करणमेषां ते तथा विधा मदेकनिष्ठज्ञानक्रिया
प्रसरा संतोन्यो न्यं बोधयंतः स्वानुभवसंवादेन ज्ञापयंतः तथा कथयंतं

नोयथाबोधमागमवचनैः कीर्तयंतस्तुष्यंति संवादात्स्वयंप्रीयंते परस्परं रम
यति रतिमनुभवंति एवंविधा नोव ९ ॥

तेषां प्रीतिपूर्वं भजनस्वरूपमाह ॥ लालिकी [illegible]टीका

[illegible] मच्चित्तान्यानेमय्येवप्रतीविवितंवि
मर्शरूपमंतःकरणंयेषांते तथामद्गतप्राणाः समाधिदशायांमय्येवात्मनिग
ताःसंलीनाःप्राणादशविधाश्चसर्वेयेषांते तदुक्तम् उःखदौर्मनस्यांगमेज
यत्वश्वासप्रश्वासाविक्षेपसहभुवः अत्रभाष्यम् विक्षिप्तचित्तस्यैतेभवंतिस
माहितस्यतुनेति तथावशिवोपनिषदि तामाश्रित्योर्ध्वमार्गेणसोमसूर्यौउ
भावपि सौषुम्ने धन्यस्तामितेहित्वाब्रह्मांडगोचरमिति तथाचकुलार्णवे यो
गिनिद्रुपगावसरे प्राणाद्यवायुसंचारः पावकश्चनिश्चयः परजीवैकमर्मज्ञो
योगीयोगविदुच्यते निष्पन्दकरणग्रामः स्वात्मलीनमनोनिलः यस्यास्तेमर
तवत्सालाजीवन्मुक्तः सउच्यते इति तथामामीश्वरमेश्वरत्वप्रत्तानसंक्रम
णायपरस्परंबोधयंतः न्यायोपेतैः श्रुत्यादिप्रमाणैर्ज्ञापयंतः तथामामी
श्वरंकथयंतश्चमन्नामकस्मारणेह झाषयंतः नित्यमेवंविधाः संतस्तुष्यंतिचो
नावंतेवलबुसर्वाघावयमलमन्यनलब्धमनेनेवंप्रत्ययरूपंसंतोषंप्राप्नुवं
ति रमयंतिचनिर्वृतिंयांति [illegible] ९ ॥

पंचोलीटीका

[illegible] प्रीतिपूर्वकंभजनप्र
कारमाह मच्चित्ताइतिमयिपरमेश्वरेचेतोयेषांते मच्चित्तामयिउपसं
हृतेंद्रियग्रामाः मद्गतप्राणाः मद्गतेंद्रियाः अथवा मद्गतजीवनाः प
रस्परमन्योन्यंबोधयंतश्च मांज्ञानबलवीर्यादिविशिष्टंकथयंतस्तु
ष्यंतिपरितोषंयांतिरमंतिचप्रापुवंति ९

रसाकीरसमिद्धोधिनी ॥
मच्चित्ता मय्येव चित्तं येषां मद्गतप्राणा मय्येव च गतः प्राणो जीवनं
येषां ते तादृशाः परस्परं बोधयंतः स्वानुभूत्यैव बोधनपात्रं ज्ञापयं

तः तथा मां च मत्स्वरूपमेव यथा बोधमागमवचनैः कथयंतः सं
कीर्तयंतश्चानयैव ते तुष्यंति चानुमोदनेन तुष्टिं यांति तत्समकाल
मेव रमंति च तोषगुणानुवादैः सेवज्यंते ऽन्यार्थः ९॥

मधुभाष

९

प्रीति पूर्वक भजन का स्वरूप कहते हैं कि जिसका चित्तमेरे हीमेनिर
तहै सो मच्चित्त औरजिसके प्राण कहे सकल इंद्रिय अथवा जीवन मेरेमे
अर्पितहै ऐसे मद्गत प्राण विवेकी जन हमको श्रुति औ स्मृति प्रमाण
से जानतेहैं औरसर्वदा परस्परं मेरी ही चर्चा करते हुये सदा सन्तुष्ट म
नमेरे गुण गान मे रममाण पूर्णकाम इस प्रसार संसार के जंजाल से
मुक्ति पावतेहैं ९ ॥

दोहा

मोमेंहूं चितप्राणहैं बोधपरसपर मोहि कथें सो मोकों नित्य
हि तोषहिं रमहिं सोहि ९

34

तेषांसततयुक्तानांभजतांप्रीतिपूर्वकं ददा
मिबुद्धियोगंतंयेनमामुपयांतिते १० ॥

शांकरभाष्यटीका १

येयथोक्तैः प्रकारैर्भजंतेमां भक्ताः संतः प्रीतिपूर्वकं तेषामिति तेषां
सततयुक्तानां नित्याभियुक्तानां भजतां सेवमानानां किमर्थित्वादिना
कारणेनेत्याह प्रीतिपूर्वकं प्रीतिः स्नेहस्तत्पूर्वकं मांभजतामित्यर्थः
ददामिप्रयच्छामि बुद्धियोगंबुद्धिः सम्यग्दर्शनं मत्तत्वविषयं तेन योगो
बुद्धियोगस्तंबुद्धियोगं येनबुद्धियोगेन सम्यग्दर्शनलक्षणेनमांपरमे
श्वरमात्मभूतं आत्मत्वेनोपयांतिप्रतिपद्यंते १० ॥

आनंदगिरिकृतटीका २

यदुक्तं सोविकल्पेनेत्यादि तदर्थं भूमिकांकृत्वा तदिदानीमुदाहरतिये
यथोक्तेति नित्याभिक्तानामनवरतं भगवत्येकाग्र्यं संपन्नानामित्यर्थः
पुत्रादिलोकत्रयहेत्वर्थित्वेन वागर्भवासत्वेनवा प्रसक्तेजीवनोपायसि
द्ध्येवा भजतामिति शंकित्वा दूषयति किमित्यादिना आयुक्तां तानां
त्वां भक्तिस्नेहेनकुर्वतामित्यर्थः तेभ्योहं तत्वज्ञानं प्रयच्छामीत्याह दा
दामीति उक्तबुद्धिसंबंधस्य फलमाह येनेति १० ॥

स्वामिकृतटीका ३

एवंभूतानांचसम्यक्ज्ञानंददामीत्याह तेषामिति एवंसततंयुक्तानां
मय्यासक्तचित्तानांपूर्वकंभजतांबुद्धिरूपंयोगमुपायंददामितेषांतमिति
कंयेनतेयुक्तामांमुपयंति १० ॥ तंबु

प्री

पिशाचभाष्यटीका ४

तेषांसततंयुक्तानांनित्याभियुक्तानांप्रीतिपूर्वकंस्नेहपूर्वकंभजतांबुद्धि
योगंतंयेनबुद्धियोगेनमामीश्वरमुपयांति १० ॥

रामानुजभाष्यटीका ५

तेषामिति तेषांसततयुक्तानांमयिसततयोगमाशंसमानानांमांभजमा
नानामहंतमेवबुद्धियोगंविपाकदशामापन्नंप्रीतिपूर्वकंददामियेनते
मामुपयांति १० ॥

श्री· गी· टी· द·

35

स्पष्टार्थं १० ॥

अभिनवगुप्तटीका ८

॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

एवंभूतानां ज्ञानप्रदोऽहमेवेत्याह एवमाह तेषामिति तेषां पूर्वोक्तानां
सततयुक्तानां सततयुक्तानां मय्यासक्तानां प्रीतिपूर्वकं भजतां चनेबु।
द्धियोगं ददामि येन ज्ञानयोगेन ते मामुपयान्ति

वनमालीटीका ८

सततं सर्वदा युक्तानां मय्येकाग्रबुद्धीनां अत एव लाभपूजाख्यात्या
यनभिसंधाय प्रीतिपूर्वकमेव भजतां तेषां बुद्धियोगं अनेन गुणाल
यस्तु मम साक्षात्कारं येन निर्मुक्ता विद्यावंधनाः संतो मां श्रीवैकुं
ठाधिपतिं स्वैकतानं प्राप्य पूर्णानंदाविर्भावरूपमोक्षभाजो भवंती।
तिभावः १० ॥

हनुमद्वैजयंतीटीका ५

ननुचिन्त्यानंतनयातिदुर्ज्ञेयं तत्त्वरूपगुणविभूतिविषयकं ज्ञानं तैः
कुतः प्राप्येयेन तत्त्वरूपादिकं ज्ञात्वा तत्त्वेन तु यां भजेरन्नित्याशंक्याहमेव तद
दामीत्याह तेषामिति सततयुक्तानां नित्यमत्संयोगमतिकामाणा ति
नां प्रीतिपूर्वकं भजतां लाभप्रतिष्ठाख्यातिमानाद्यनभिसंधाय प्रीतिपू
र्वकं निरतिशयप्रीतिपूर्वकं यथा स्यात्तथा भजतां मां सेवमानानां तेषां बु
यानां तेबुद्धियोगं बुद्धिं मत्तत्त्वरूपगुणविभूतिविषयकं ज्ञानं तं देवयो
गामत्प्राप्त्युपायं तं ददामि अहमेव सर्वेश्वरः प्रयच्छामि येन मत्तत्त्वरूपादि
वेदनरूपेण तेन बुद्धियोगेन सर्वकारणं सर्वानंतकल्याणगुणमनंतविभूति
कं सर्वेश्वरमुपयान्ति प्राप्नुवंति १० ॥

येयथोक्तेन प्रकारेण भजंते मां ॥

मधुसूदनीटीका ९

सततं सर्वदा युक्तानां भगवत्येकाग्रबुद्धीनां अत एव लाभपूजाख्याति
यनभिसंधाय प्रीतिपूर्वकमेव भजतां सेवमानानां तेषामविक्षेपेन।
योगेनेतियः प्रागुक्तस्तं बुद्धियोगं मत्तत्त्वविषयं सम्यग्दर्शनं ददामि
उत्पादयामि येन बुद्धियोगेन मामीश्वरमात्मत्वेनोपयान्ति ये मच्चित्ता इत्यादि
प्रकारैर्मां भजंते ते
१० ॥

सदानंदीटीका ११

यथोक्तेन प्रकारेण भजंते मां यतमानाः तेषामेकाग्रबुद्धीनां सततं प
रमेश्वरे १ लाभाद्यनभिसंधाय प्रीतिपूर्वकमेव हि भजतां सेवमाना
नां बुद्धियोगं प्रेरितं २ मत्तत्त्वविषयं सम्यग्दर्शनं तं ददाम्यहं येन ते ना
बुद्धियोगेन मामसंगं परमेश्वरं ३ आत्मत्वेनोपयांति ते ये पूर्वोक्ताश्चम
इता: यस्मावनाचरितश्रवणादिशुद्धस्वांताः । विवेकविरतिप्र
भृतीन्गुणांश्च प्राप्यात्मबोधमवधीरितबंधपाशास्तु कालमीश्वरमा
ह्वहरिमाश्रयंते ः १० ॥

नीलकंठीटीका १२

उपासनायाः फलमाह तेषामिति सततयुक्तानां नित्योत्साहवतां
प्रीतिः प्रेम तत्पूर्वकं भजतां सेवमानानां तेभ्यो ददामि तं बुद्धियोगं ज्ञा
नरूपं योगं समाधिज्ञाननिष्ठामित्यर्थः तं ददामि येन यया निष्ठया
ते मामुपयांति समुद्रमिव नद्यो ऽभेदेन प्रविशंति १० ॥

आनंदीटीका

बुद्धियोगं तु आज्ञानेन योगं संबंधम् येन ज्ञानसंयोगेन ते मत्सायु
ज्यं यांति १०

रामकंठीटीका

तेषां तु ध्यानां तु पतितादेव प्रीतिपूर्वकं तत्त्वज्ञानजनितपरितोषपूर्वकं
सेवमानानाम् अत एव नित्योद्यतानां बुद्धियोगं सम्यक् संबंधं वितरामि ये
न हेतुभूतेन तु यथा मामुपयांति मदीयं योगं समापद्यते इति भक्तानां स
योगप्राप्तावसंशयप्रकारोपतिपादनम् १०

एवं भजनस्वरूपमुक्त्वा तत्फ लासिकी [illegible]टीका
लमाह ॥ तेषां तु ध्यानां सततं तत्परिमितं कालं फलानाम् आत्मनि समाहिता
नां तथा प्रीतिपूर्वकं मद्विषयपरमस्नेहपूर्वकं न तु लाभपूजाख्यात्याद्य
र्थं भजतामुपासीनानाम् तमलौकिकं बुद्धिरेश्वररूपविषयं सम्यग्दर्शनं तत्र
योगं समाधानं समावेशरूपं ददामि तं कमित्यात्मबुद्धिसकाशादतिरेकमि
त्याह येनेति येन करणभूतेन ते भक्तियुक्तास्तु थामामीश्वरमुपयांति आत्मत्वे
न प्रतिपद्यंते १० ॥ ॥

गी॰
टी॰
द॰

30

पंचोलीटीका

एवंभजतामहंसम्यग्ज्ञानंददामीत्याह तेषामिति तेषां सत
तयुक्तानांनित्याभियुक्तानांप्रीतिपूर्वकंभजतांबुद्धियोगंम
त्तत्वविषयंसम्यग्ज्ञानंबुद्धिस्तयायोगःसंबंधस्तंबुद्धियोगं
ददामियेनबुद्धियोगेनसम्यग्दर्शनलक्षणेनतेमांपरमेश्वरं
आत्मत्वेनउपयांतिप्रपद्यंते १०

रणवीरसमिद्बोधिनी॥

तेषां सततयुक्तानां भगवत्येकाग्रसंपन्नानामतएवप्रीतिपूर्व
कंतद्रहिसर्वकंभजतां मांपरिचरतां तंबुद्धियोगंबुद्धिःकार्याका
र्यविवेकस्तस्ययोगः कार्येतत्स्वधर्मे तद्विपर्ययोकार्यइति तंता
दृशं ददामि येनबुद्धियोगेनतेबुधामामुपयांति मत्सायुज्यंसमा
पद्यंतइतिभावः १०॥

मध्वभाष्य

अहमित्यादिना ब्रह्मपरिहर्तिस्थयकस्माउच्यते परंब्रह्म बृंहति
बृंहयति चेति श्रुते बृहद्धि ह्यात्वाविति च परंइति परमं व्योम हृद्ग
ह्येति च विविधमासीदितिविभुः तथा हि वारुणप्राणस्वाधां विभु
प्रभुप्रथमं वेदना वत इति स एव प्राम वहिविधो भवदि तिसो
कामयत बहुस्यां प्रजायेयेत्यादि च विभूतयो विविधभूतयः
नजायते वर्द्धयति संसारमिति जनार्दनः तथा च वाभव्ये प्रा
ग्वाया सभूतःसजनार्दनइति स प्रासीत्समनासीत्सो दयति
विष्णुःसर्वव्यापित्वप्रवेशितादेः विष्णुर्व्यामो विशाप्रवेशनाद्
तिच पठंति गतिश्चसर्वभूतानांप्रजानां वापि भारत व्याप्तो मे रो
दसीपार्थकांतिश्चाप्यधिकामम अधिभूतनिविष्टस्ततोहिस्म

अस्मिभारत आमोमेरोदसीपार्थ विस्तृतित्यभिसंज्ञित इति
मोक्षधर्मे स्वरूपं पास्यते लीयते च जगदनेनेति कपिलः
प्रीतिः सुखं कमानंद इत्यभिधानात् प्राणो ब्रह्म कं ब्रह्म खं ब्र
ह्मेति च ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं
च पश्येत् सुखानंतोत्पालनाल्हापनाद्वयं वै देवं कपिलमुदा
हरंतीति वा भव्ययाख्यायां आनंदरूपत्वात्सर्गान्ताल्लोकयमल
स्वाद्वामः आनंदरूपो निष्परिमाणपदः लोकश्चैतस्मादु
मतेतेनवामइति शांडिल्य व्याख्यायां रश्मिरमश्चेतिश्रुत्युक्तिः
आच्छादयति सर्वं वासयति वसति सर्वत्रेति वासुः देव वा सु
र्यउक्तः पुरस्तात् छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः
सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहमिति च मोक्षधर्मे वि
शिष्टः सर्वस्मात् समस्तान्सपर्वेतिव्यासः तथा वाराहे व्याख्या
यां सव्यासोवीति तस्य विस्तेयस्तासउत्तरतः सपश्चात्स
र्वस्मात्सदक्षिणतः उत्तरत इति यच्च किंचिज्जगत्सर्वं दृश्य
ते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः
इति मया विना यद्भूतं स्यात्तन्नास्ति विश्वरूपे अनंतगते अनं
तभाग अनंतमत अनंतेत इत्यादि मोक्षधर्मे ॥ १० ॥

36/11

ऐसे ही भक्तोंको हम ज्ञान प्रदान करतेहैं सोई कहते हैं कि एवंभूतमेरेमे सदा आसक्तचित्त औ प्रीति पूर्वक भजनकारी भक्तलोगों कोमैं सोई बुद्धि रूप योग कहे उपाय देताहूं और उस उपाय सेवेमेरे भक्तमुझे अनायास प्राप्त होते हैं ९ ॥

दोहा

तिनहि निरंतर युक्त जो विधिवत भजहि मोहि मैं देवों बुद्धियोग तिन मोहि मिलहि जिम सोहि १० ॥

37

तेषामेवानुकंपार्थमहमज्ञानजंतमः नाश
याम्यात्मभावस्थोज्ञानदीपेनभास्वता ११ ॥

शांकरभाष्यटीका १

केनेते ये मच्चित्तादिप्रकारैः मां भजंते किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबंध
हेतोः नाशकं बुद्धियोगं तेषां त्वद्भक्तानां ददामीत्यपेक्षायामाह तेषा
मिति तेषामेव कथंनाम श्रेयः स्यादित्यनुकंपार्थं दयाहेतोरहमज्ञानजं
मविवेकतो जातं मिथ्याप्रत्ययलक्षणं मोहांधकारं तमो नाशयाम्यात्म-
भावस्थः आत्मनो भावोऽन्तःकरणाशयस्तस्मिन्नेव स्थितः सन् ज्ञानदी-
पेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेश
वातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञावर्तिनापि विरक्तांतःकर-
णाधारेण विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन नि-
त्यप्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः ११ ॥

आनंदगिरिकृतटीका २

ध्यानजन्यप्रकर्षकाष्ठां गतांतःकरणपरिणामे निरस्ताशेषविशेषभग
वद्रूपप्राप्तिहेतौ बुद्धियोगे प्रश्नपूर्वकं भक्तानामधिकारित्वं दर्शयति केनेत्यत
भगवत्प्राप्तिर्बुद्धिसाध्येति सत्यं नित्यत्वापनेत्वं भक्तेभ्यो बुद्धियोगं ददासीत्यत्र
क्रममिति शंकते किमर्थमिति तेषां बुद्धियोगं किमर्थं ददासीति संबंधः
भगवत्प्राप्तिप्रतिबंधकनाशको बुद्धियोगस्तेन नास्ति त्वत्प्राप्तिरनित्यत्वमि-
त्याशंक्याह कस्येति भक्तानां त्वत्प्राप्तिप्रतिबंधकं विविच्य दर्शयति इत्या
कांक्षायामिति अविवेकोनाद्यज्ञानं ततो जातं मिथ्याज्ञानं तदुभयमेकी
कृत्य तमो विवक्षते नच तमोनाशकत्वं जडस्य कस्यचिदंतभूतस्य शक्यते
नाहं नाशयामीत्युक्ते केवलचैतन्यस्य जडबुद्धिहेतेरिवाज्ञानाद्यनाशकत्व
माशंक्य विशिनष्टि आत्मेति तस्याशयस्तन्निष्ठोहतिविशेषः वाक्याद्यबु
द्धिहत्यभिव्यक्तश्चिदात्मा सहायसामर्थ्यादज्ञानादिनिहंतिहेतुरित्यर्थः बु
द्धिबोधस्याज्ञानादिनिवर्तकत्वमनुभवाबाधे तद्धेतुत्वनिवर्तत्वमिति यत्ता
५२ नमाह ज्ञानेति देहाद्यव्यक्तांतानात्मवर्गातिरिक्तवस्तुगोचरत्वमाह वि-
वेकेति भगवति सदा विहितया भक्त्या तस्य प्रसादोऽनुग्रहः स एव स्नेहा

श्री·
गी·टी·
द·

तेनासेचनहारा सोत्पत्तिमाह मच्चीति मय्येवभावनायामभिनिवेशोवा
नस्तेन प्रेरितोयंजायतेनहि वातप्रेरणामन्तरेणादौ दीपस्योत्पत्तिरि
त्याह मद्भावनेति ब्रह्मचर्यमष्टाङ्गमादिशद्बेन शमादिग्रहः तेनहेतुना।
हितसंस्कारवतीयाप्रज्ञातयाविषयवर्तिनिष्पत्यायं नहिवर्त्यतिरेकेण
दीपोनिर्वर्तते तदाह ब्रह्मचर्येति नचाधाराद्दृते दीपस्यात्पत्तिरदृष्टत्वा
दित्याह विरक्तेति यद्विषयेभ्योव्याहृतं चित्तं रागाद्यकलुषितं तदेव नि।
वातमपवरकं तत्रस्थितत्वमस्यदर्शयति विषयेति भासतेतिविशेषणं।
विशदयति नित्येति सदातनं चित्तैकाग्र्यं तत्पूर्वकंध्यानंतेनजनितं सम्यग्द
र्शनफलं तदेवभाः तद्वतः तत्त्वयैतेनेत्यर्थः तेनज्ञाने सकार्ये निहते भगा
वद्भावः स्वयमेव प्रकाशोभवतीतिमत्वा व्याख्यानमेव पदमनुवदति ज्ञा
नेति ११॥

स्वामिकृतटीका ३

बुद्धियोगंददामीत्युक्तस्यानुभवपर्यंतंमायायाविद्याकृतंसंसारंनाशया
मीत्याह तेषामिति तेषामनुकंपार्थमनुग्रहार्थमेवाज्ञानाज्ञानंतमःसं
साराख्यंनाशयामि कुत्रस्थितः सन्केनवासाधनेनतमोनाशयसीत्यत्रा ३
ह आत्मभावस्थः बुद्धिवृत्तौस्थितः सन् भास्वताविस्फुरताज्ञानलक्षणे।
नदीपेननाशयामि ११॥

पिशाचभाष्यटीका ४ ४ग

तेषामेवेति अज्ञानजमविवेकजंतमःमिथ्याप्रत्ययरूपमात्मभावस्थः
४दी ज्ञानदीपेनज्ञानमेवदीपःज्ञानेप्रस्तेनभास्वता ११॥

रामानुजभाष्यटीका ५

किंच तेषामिति तेषामेवानुकंपार्थमहमात्मभावस्थस्तेषां मनोवृत्तिविषया।
तयावस्थितोमदीयान्कल्याणगुणान्प्रकाशयन्नित्यर्थःकुर्वन्मद्विषयज्ञानाख्येन।
स्वसजातीयेनभास्वतादीपेनविरोधिप्राचीनकर्मरूपाज्ञानजंमज्ञतिरि।
क्तविषयप्रावण्यरूपंपूर्वाभ्यस्तंतमोनाशयामि [illegible]

[illegible] ॥

अभिनवगुप्तकृतटीका ८

स्पष्टार्थः ११॥ ॥ ॥ ॥ ॥

नतज्ज्ञानदातृत्वमुपदे परमार्थप्रपाटीका ७ शाङ्कवृति सत्वमस्तान्तादृर्शनाभावात्कथंतुत्पत्त
इत्याह तेषामि ति॥ तेषांप्रीतिपूर्वकंभजतामनुकंपयाकृपयाअज्ञानाज्ञानेतमःसंसाराख्यं
अहमेवनाशयामि क्वस्थितः आत्मभावस्थः बुद्धौवर्तमानः केना
भास्वताप्रकाशवताज्ञानदीपेन अत्रश्रुतिरपिअग्र्यदेवल्लीषु नायमा
व त्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन यमेवैषवृणुतेतेनलभ्य
स्तस्यैषआत्माविवृणुतेतनुंस्वामितिभाष्यं अयमात्माप्रवचनेनअ
नूक्तवचनेनप्रवचनमुपदेशस्तेननलभ्यः नमेधयापाठमात्रलभ्यः नापिव
हुनाश्रुतेनशास्त्रश्रवणेन किंतु यमेवात्मायंपुरुषंवृणुतेअनुकंपते
नगणापतितस्यएषआत्मास्वांतनुंस्वस्वरूपंविवृणुतेस्वांतःकरणवृत्ति
स्थितः विवरयतिप्रकाशयति नकेवलंविशेषेणशास्त्रेणापिगुरुणोद्दि
श्यतेपरमेश्वरः दृश्यतेस्वात्मनैवात्मास्वयासत्वमुपाधियति पिपा छि
णिकास्वपिआदर्शप्रतिरूपदर्शनमणीशक्तिनिसर्गस्थितादृष्टान्तमम
लापकर्षणाविधिः संपाद्यते केवलंतावत्तुत्त्वविदांमहूपमनसः
शावल्यसंशोधनेमत्कर्मेश्वरभक्तिनः स्वतस्तृहैवात्मप्रकाशोभवेत
स्तावदेपियत्तिस्याजसचिविंदसत्वांयेनतस्यवाच्यपिभागोअस्ति
यंदीघ्रणोमलकंघ्रणोतिनहिप्रवेदमहत्तस्यपंथामितिं सवाभा
ष्यं अत्रसविशाहः सविवाची सचीनस्वीनपरमप्रेमास्पदात्वि
षयान्वेतीतिसचिविनमुपकारकंअतएवसत्वांयपरमात्मानेयःस्व
रूपास्तिस्याजसकेवात्मवहिर्मुखस्त्वर्थः तस्यपवनात्मिका
यामपिवाचिसत्यतभागोनास्तिकिं शुनशीलस्वरूपायां तथाद्भुमि
त्पयंवहिर्मुखः यच्छृणोतिशास्त्रश्रवणंकरोतितत्तअलकंअलीक
मसत्यंहियस्मात्कारणात्मद्गृहहत्तस्यसत्यस्यअलक्षणः पंथापथ्यातं
मार्गेनप्रवेदनजानातितथामुक्तेस्वेयअभितोजनामत्रहोस्माकंम
यवासूरिरस्तिति भाष्यंजनाःसोजनाः अभितः सर्वप्रकारेणमुक्ता
तमोहंप्राप्नुवंतपरंतिहृशरीरे अस्माकंममूत्तहणामिंद्रापरपर्या
यः परमात्मासूरिरहपदेशास्ति ११ ॥

वनमालीटीका ८

श्री॰ गी॰ टी॰ द॰

39

दीयमानस्य स्वव्यापारो तत्त्वज्ञानस्य मोक्षरूपे फले मध्यवर्तिनं व्यापारमा।
ह तेषामिति तेषामेव कथं मोक्षः स्यादित्यनुग्रहार्थं आत्मभावा।
स्थः आत्मनश्चित्तस्य भावे अपरोक्षवृत्तौ विषय तया स्थितः मयाअ
न॰ समेन प्रकाशितेन स्वविषयकापरोक्षज्ञानाख्यदीपेन भास्वतानादि
कालसंचिताविद्यानिवर्तितेदीमे सवानादिस्थानीयासंभावनावि
त॰ परीभावनरूपेनाज्ञानजमनात्मविद्याहेतुकं देहगेहादावहंममे ध्य॰
ति विपरीतज्ञानरूपं तमस्तत्क्षणमेव नाशयामि ११ ॥

उत्कमवैजयंतीटीका १

ननु नादिकर्मरूपाज्ञानजन्यस्यानादिविषयप्रावल्यरूपस्यापका
रस्य नाशं विना तेषां हृदये बद्धता बुद्धियोगः कथं स्यादस्यतीति चेत्त
आह तेषामेवेति तेषामेव मदेकनरदेवभावरहितानां मदेकनरसा व॰
यनसाध्यसंबंधादिरहितानां साधूनामेव न तु मदेकनरदेवोपासका
नां अनुकम्पार्थं कथं कल्याणं स्यादित्यनुग्रहार्थं मत्कृपापात्रत्वा।
र्थं वाहं सर्वेश्वरः आत्मभावस्थः आत्मनो मनसो यो भावोऽभिप्रा
यस्तस्मिन्नवस्थितः सन् तत्र मदीयान्सर्वविदिव्यस्वरूपगुणान्प्र
काशयत्सन्भास्वतात्यर्कीनतोज्ज्वलेन ज्ञानदीपेन मत्स्वरूपगुण
विषयरूपं यज्ज्ञानं तदेव दीपत्वेन अज्ञानजं अनेकजन्मसंचितंम
य॰ ज्ञानविरोधित्वकर्मतदेवाज्ञानेन तस्माज्ज्ञानं मदेकनरविषयासक्तिरू
पं तमोऽन्धकारं नाशयामि मद्दत्तज्ञानमुद्राख्यज्ञानेऽहव तमो।
है॰ विनाशमेव करोमीति भावः ११ ॥

दीयमानस्य बुद्धियोगस्यात्म

मधुसूदनीटीका १

आपारमाह ॥ — तेषामेव कथं श्रेयः स्यादित्यनुग्रहार्थं आत्मभावस्थः आत्माका प्राप्तौ फले मध्यवर्तिनं
रांतःकरणं तद्वृत्तौ विषयत्वेन स्थितोऽहं स्वप्रकाशचैतन्यानंदाद्वया।
लक्षण आत्मा तेनैव मद्विषयांतःकरणपरिणामरूपेण ज्ञाना। हृति
दीपेन दीपसदृशेन ज्ञानेन भास्वता चिदाभासयुक्तेन प्रतिबद्धेन
अज्ञानजमज्ञानोपादानकं तमः मिथ्याप्रत्ययलक्षणं स्वविष
यावरणं मंधकारं तदुपादानाज्ञाननाशेन नाशयामि सर्वमेमो

पादानस्याज्ञानस्यज्ञाननिवर्त्यत्वात्तदुपादाननाशनिवर्त्यत्वाच्चोपादेय
स्य यथान्धदीपेनांधकारेनिवर्त्तनीयेदीपोत्पत्तिमंतरेणानकर्मणोभ्यास
स्यवापेक्षाविद्यमानस्यैववस्तुनोभिव्यक्तित्वेनान्यत्रस्यकस्यचि
दुत्पत्तिस्तथाज्ञानेनाज्ञानेनिवर्त्तनीयेनज्ञानोत्पत्तिमंतरेणान्यस्यकर्म
णोभ्यासस्यवापेक्षा विद्यमानस्यैवचब्रह्मभावस्यमोक्षस्याभिव्यक्ति
त्वेनान्यान्यत्रस्यान्यनिर्यत्नत्वापितंकर्मादिसापेक्षत्वंवाभवेदिति रू
पकालंकारेणसूचितोर्थः भासनेत्यनेनतीव्रपवनादेरिवासंभाव
नादेः प्रतिबंधकस्याभावः सूचितः ज्ञानस्यदीपसाधर्म्यंस्वविषयाव
रणनिवर्त्तकत्वंस्वव्यवहारेसजातीयपरानपेक्षत्वंस्वोत्पत्तिरिक्तस
हकार्यानपेक्षत्वमित्यादिरूपकवीजंद्रष्टव्यं
११ ॥
सदानंदीटीका ११
दीपमानस्ययोगस्यब्रह्मप्राप्तिफलेहरिः स्वबोधायसंप्राहव्यापा
रेमध्यवर्तिने १ तेषामेवकथंश्रेयोभवेदित्यनुकंपया आत्मैकाकार
धीवृत्तौविषयत्वेनसंस्थितः स्वप्रकाशचिदानंदाद्वयात्माहंनिरामये
धीपरिणामरूपेणज्ञानदीपेनभास्वता ३ चैतन्याभासयुक्तेनाप्रति
बद्धेनसर्वतः अज्ञानहेतुकंध्वांतंमिथ्याप्रत्ययलक्षणं ४ तद्देवज्ञान
नाशेननाशयामिस्वगोचरं यथानिवर्त्तनीयेहिदीपेनतिमिरेखिले ५
दीपोत्पत्तिंविनानान्यत्कर्माभ्यासाद्यपेक्षणं तथाज्ञानेनचाज्ञानेना
शनीयेत्वनर्थदे ६ ज्ञानोत्पत्तिंविनानान्यत्कर्माभ्यासाद्यपेक्षणं स्वच्छेन
ज्ञानदीपेनविवेकप्रभयात्मना ७ हरिभक्तिप्रसादात्मस्वच्छस्नेहपू
रितेनच सत्त्वात्माभिनिवेशात्तुहृत्तवातेरितेनच ८ ब्रह्मचर्यादिसंस्का
रयुक्तप्रज्ञास्ववर्तिना विरक्तपुरुषस्यांतःकरणाधारशोभिना ९ रागा
द्येषाद्यसंस्पृष्टचित्तसमस्थितेनच ऐकाग्र्यध्यानजनितसम्यग्दर्शनभा
स्वता १० नाशितेमोहतिमिरंसमूलंसविलासकं येषांतेवयनिर्मुक्ताः
साक्षात्सुः पुरुषोत्तमाः ११ ११ ॥
नीलकंठीटीका १२
किंच तेषांभक्तानामनुग्रहार्थमनुकंपार्थंनस्वप्रयोजनमित्यर्थंराजवत

बुद्धियोगप्रदानेनअज्ञानजंअविवेकादुत्पन्नंमिथ्याप्रत्ययलक्षणंमोहांध
कारंतमोनामकंसर्वानर्थनिदानमूलाज्ञाननाशेननाशयामि आत्म
भावस्थः आत्मनोभावोंतःकरणवृत्तिस्थः ज्ञानरूपेणदीपेन भास्व
ताप्रबलेन अयंभावः तत्वमसीतिवाक्यजाब्रह्माकारांतःकरणवृ
त्तिःश्रोत्रव्यपेश्रवणमननध्यानानिशमादीनिकर्माणिचापेक्षते यथा
दीपःस्नेहतैलवर्त्यादीन् उत्पन्नातमोनाशेनस्वविषयप्रकाश
नार्थंप्रत्ययाहृतिलक्षणंप्रसंख्यानंचकर्माभिरूपकारंचानापेक्षते नहि
जातेघटेतदाकारप्रत्ययाहृतिर्वाकर्मापेक्षावानज्ञानदार्ढ्यायापेक्षते
प्रमाणस्याभिमानमात्रमपेक्षता ज्ञानस्य तस्मादुत्पन्नज्ञानानामपिप्र
संख्यानापेक्षांकर्माभिरूपकारापेक्षांचवदंतितेवलादेवमोहस्यकृता
कृतामनित्यतांचप्रार्थयंतइतिदिक् ११ ॥

आनंदीटीका

तेषांप्रेमणाभजतामेवानुकंपार्थंतत्प्रेमविनाकृतानामस्वमेधा
दियाजिनामित्यर्थः ११

रामकंठीटीका

यतस्तेषामेवदेवमार्गभाजामनुकंपार्थंसंसारक्लेशाविष्टवशोन
कृपाकरोहमहमज्ञानजंमोहसमुद्भूतंतमस्तत्वाप्रतिपत्तिमयंति
मिरंनाशयामिप्रध्वंसयामिकेनभास्वतापरसंविदात्मकदीप्तिप्र
केनज्ञानदीपेनयथोक्तबुद्धियोगप्रद्योतकेनकीदृशःसन्नात्मभावस्थ
आत्मनःसंवेदितभावआत्मत्वंतेनस्थितः यद्यपिसर्वगतएकए
वाहमात्मातथापिस्वेच्छयायानेवानुगृह्णामितेषामेवाहमात्म
त्वेनास्थितः अन्येषांतुदेहाद्यात्मप्रतिपत्तिरित्यर्थः एवंपरमेश्व
रोहंयानेवानुगृह्णामितएवयथोक्तप्रकारेणमांभजंतेमद्विभूति
योगयोस्तत्वविदःसंतोमदीयमेवयोगंसमापद्यंते सदभेदलक्षणंमो
क्षमासादयंतीत्यर्थः यदाहुर्ब्रह्मविदः नायमात्माप्रवचनेनलभ्योन
मेधयानबहुनाश्रुतेन यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृ
णुतेतनूंस्वामिति

सार्थमर्जुनउवाच ११

तेषांबुद्धियोगदानेन लासिकी [illegible] टीका मेणावांतरव्यापारमाह॥

तेषामेवबुध्यानामनुग्रहार्थमात्मभावेनात्मत्वेनस्थितः यद्यपिसर्वगतो हमेकएवतथापियानेवानुग्रस्त्यामितेषामेवात्मत्वेनव्यापकंमैश्वरंरूपंद र्शयामि तथाचश्रुतिः यमेवैषवृणुतेतेनलभ्यइति अज्ञानाज्जातप्रतिप त्तेर्जातंतमोभिन्नवेद्यप्रत्यारूपमायीयमलाख्यमंधकारंनाशयामिप्रध्वंस यामिकेनज्ञानदीपेनज्ञानसर्वात्मदर्शनरूपंतदेवदीपस्तेनभास्वतानित्य प्रकाशाविप्रकेन [illegible]
[illegible]
[illegible] ११ ॥

पंचोलीटीका

भगवत्प्राप्तिप्रतिबंधकस्याज्ञानस्यविनाशकबुद्धियोगदानेहे तेवदन्तस्यबुद्धियोगस्यफलंसकलसंसारवीजमज्ञानंविनाश यामीत्याह तेषामिति अहंतेषांमेवानुकंपार्थंकथंनामश्रेयःस्या दितितयाहेतोःआत्मभावस्थःआत्मनोभावःअंतःकरणंतस्मिन्ने वस्थितःसन्भास्वतानित्यप्रवृत्तप्रकाशध्यानजनितसम्यग्दर्शनेन भास्वताज्ञानदीपेनविवेकप्रत्ययरूपेणअज्ञानजमविवेकतोजात मिथ्याप्रत्ययलक्षणंतमोमोहांधकारंनाशयामि ११

रणवीरसमिद्धोधिनी॥

किंचतेषां पूर्वोक्तानामेवप्राहोमावथारणेनुकंपार्थंयतोहमा त्मभावस्य आत्मनोभावो भक्तोन्मन्यनुग्रहेच्छा तत्र तिष्ठतीति तदज्ञानजमज्ञानमवस्तु निवस्तु ज्ञानंतज्जं यतमस्तत्वाप्रत्यय लक्षणंतदहंनाशयामि साधनमाह ज्ञानदीपेनेति ज्ञानंयथा वस्तुरूपलाभकत्वेवदीपोपयाहि दीपेज्वलिते तमसाहृतान पि पदार्थान्यथावज्जानाति उषा भास्वताभाःसंवित्यकाशस्तह तेति ११॥

मधुभाष

११॥

ध।

बुद्धियोग दे करके उन अपने भक्तोंका फेर अविद्याकृत संसार नाश करता हों अब यह कहतेहैं कि उन पर अनुग्रह करने ही के अर्थ उनके अज्ञानसे उत्पन्न जो संसार अंधकार तिसकोनाश करता हूं सोकहा कि किसस्थानमें बैठी और कौन प्रकार से सो अंधकार दूर करते हो सोकहते। है कि आत्मभाव कहे बुद्धिवृत्ति मे अवस्थान करके प्रकाशमान ज्ञान स्वरूप दीपके द्वारा दूर करता हौं ११ ॥

दोहा

तादि कृपा हित पार्थमें अज्ञानजन्यतम कोय नाशोंमेहं
स्वभावस्थित ज्ञानदीपकर सोय ११

अर्जुन उवाच परं ब्रह्म परं धाम पवित्रं परमं भ-
वान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं १२

शांकरभाष्यटीका १

यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा अर्जुन उवाच परमिति परं ब्रह्म
परमात्मा परं धाम परं तेजः पवित्रं पावनं परमं प्रकृष्टं भवान् पुरुषं शाश्व-
तं नित्यं दिव्यं दिवि भवमादिदेवं सर्वदेवानामादौ भवं देवमजं विभुं विभ-
वनशीलं १२ ॥

आनंदगिरिकृतटीका २

निरस्ताशेषविशेषं निरुपाधिकं सोपाधिकं च सर्वात्मत्वादि भगवतो रू-
पं तद्धीफलं च श्रुत्वा निरुपाधिकरूपस्य प्राकृतबुद्ध्यनवगाह्योक्तिपूर्व-
कं मन्दानुग्रहार्थं सर्वदा सर्वबुद्धिग्राह्यं सोपाधिकं रूपं विस्तरेणानु-
मिच्छन् पृच्छतीत्याह यथोक्तामिति परं ब्रह्म भवानिति लक्ष्यनिर्देशः त-
स्य लक्षणार्थं परं धामेत्यादि विशेषणत्रयं धामशब्दस्य स्थानवाचित्वं
व्यावर्तयन् व्याचष्टे तेज इति तस्य चैतन्यस्य परमत्वं जन्मादिरहितत्वेन कौ-
टस्थ्यं प्रकृष्टं पावनमत्यन्तशुद्धत्वमच्यते यदेवं लक्षणं परं ब्रह्म तद्भ-
वानेव नान्य इत्यर्थः कुतस्त्वमेवमज्ञासीरित्याशंक्याप्तवाक्यादित्याह पु-
रुषमिति दिवि परमे व्योम्नि भवतीति दिव्यः सर्वप्रपंचातीतं दीव्यति
द्योतत इति देवः स चादिः सर्वमूलत्वादत एवाजत्वं त्वां सर्वगतमाहुरि-
ति संबंधः १२ ॥

स्वामिकृतटीका ३

संक्षेपेणोक्ता विभूतीर्विस्तरेण जिज्ञासुः श्रीभगवंतं स्तुवन् अर्जुन उ-
वाच परं ब्रह्मेति सप्तभिः परं ब्रह्म च परं धाम चाश्रयः परमं च पवित्रं भवा-
नेव कुत इत्यत आह यतः शाश्वतं नित्यं पुरुषं त्वां दिव्यं द्योतनात्मकं स्व-
प्रकाशमादिश्चासौ देवश्चेति देवानामादिभूतमित्यर्थः तथाजमजन्मानं
विभुं च व्यापकं त्वामेवाहुः १२ ॥

पिशाचभाष्यटीका ४

भक्तानामंतःकरणस्थो भास्वता ज्ञानदीपेन विवेकेन मिथ्याप्रत्ययरूपं ता-
मसं नाशयामीति भगवद्वचनं श्रुत्वा महान्तमनुग्रहमात्मनि मन्यमानो
न्यमप्यभिमतमर्थं मम वक्ष्यतीति मत्वा पृष्टुकामोऽर्जुन उवाच परं ब्रह्म भ-

॰एवंसकलेतरविसजातीयंभगवदसाधारणंस्वरूपंतन्निरतिशयानंदजनकंकल्या
णगुणयोगंतदैश्वर्यंचश्रुत्वा तद्विस्तरंज्ञातुकामः ॥

श्री॰
गी॰ टी॰
द॰

वान्परंधामपरमंतेजोभवान्परमंपवित्रंपावनंभवान् १२ ॥

रामानुजभाष्यटीका ५

॰अर्जुनउवाच परंब्रह्मेतिपरंधामपरमंपवित्रमितियंश्रुतयोवदंतिसर्व
एवभगवान् यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्य
भिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मब्रह्मविदाप्नोतिपरंसयोहवैतत्परंब्रह्म
वेदनारायणपरंब्रह्मतत्त्वंनारायणः परानत्थापरंधामधामसाह्नोज्योति
र्वचनः नारायणः परंज्योतिरात्मानारायणः अथयदतः परोदिवोज्यो
तिर्दीप्यतेपरंज्योतिरुपसंपद्यतेस्वेनरूपेणाभिनिष्पद्यतेइत्यादिश्रूयते
तथापरमंपवित्रंपरमंपावनंसमस्ताशेषकल्मषविनाशकंयथापु
ष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतेतद्यथेषीका
तूलमग्नौप्रोतंप्रदूयतेतथास्यसर्वेपाप्मानःप्रदूयंतेपुरुषमिति १२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १२ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

एवंभगवदुक्तमवधार्यार्जुनः आहपरंब्रह्मेतिसप्तभिः परंब्रह्मादिभि
र्नवभिर्विशेषणैरूपेतंत्वांसर्वेत्र १२ ॥

वनमालीटीका ८

भगवतोऽनंतविभूतियोगंश्रुत्वार्जुनउक्तिः स्तुतिपरमितिपरंब्रह्मस
र्वोत्कृष्टंनंतवृहद्गुणकंपरंधामसर्वजगदाश्रयंतेजोवा पवित्रंकटाक्ष
मात्रेणानादिकालप्रवृत्तानिबुर्निवार्याविद्यारूपमलशोधकं स्मरण
ध्यानाद्युत्कर्षयुक्तानि वृहन्तिपापानियतीतिवापुरुषःस्यतीतितिपौनक
र्मणि अंतंप्रापयतीतिवापुराणिश्रोषतिपुरुकालेस्तीतिवापुरुषस्त्वं
शाश्वतंसर्वदैकाकारंदिव्यंलोकविलक्षणंप्रकाशरूपं अजंजन्मशून्यं
नित्यदेहमित्यर्थः विभुं १२ ॥

उत्तममनवैजयंतीटीका ९

एवंसंक्षेपतोभगवदसाधारणंकल्याणात्मकंगुणयोगंतद्विभूतियोगं
चश्रुत्वेदानींविस्तरंस्तज्ज्ञातुमिच्छुरर्जुनः सप्तभिःश्लोकैरुवाच परंब्रह्मे
तिब्रह्मविदाप्नोतिपरंब्रह्मतद्विजिज्ञासस्वसयोहवैतत्परमं ब्रह्मवेद

नारायणः परंब्रह्मतत्त्वंनारायणः परस्तत्त्वंज्ञानमानंदंब्रह्मेत्यादयश्श्रु
तयोयंवदंतिसभवानेवएव अथयदतः परोदिवोज्योतिर्दीप्यते
नारायणः परंज्योतिरात्मानारायणः परः परंज्योतिरुपसंपद्यस्वेन
रूपेणाभिनिष्पद्यतेतंदेवाज्योतिषांज्योतिरित्यादयश्श्रुतयोयंज्योतिः
शब्देनवदंतिसोपिभवानेव यद्वा धामशब्दोगृहवाचकस्तस्मिन्
वाश्रिताःसर्वेनजातुनश्यंतिकश्चनेत्यादयश्श्रयंसर्वाश्रयरूपंवदंतिसति
विलयेननाशेननाश्रयरूपोभवानेवयथापुष्करपलाशआपोनश्लिष्यं
त्येवमेवविदिपापंकर्मनश्लिष्यतितद्यथेषीकातूलमग्नौप्रोतंप्रदू
येतैवंहास्यसर्वेपाप्मानः प्रदूयंतेज्ञानादेवप्रमुच्यतेसर्वपापैस्तं
तरतिनेनंपाप्मा पाप्मानंतरतीत्यादयश्श्रुतयोयंपरमुत्कृष्टंपवित्रंपावनमघचतस्मा । त्व१
णकर्मविशेषपापमहरंवदंतिसोपिभवानेवेन्येहंवेद्मीतिशेषः १२॥

एवंभगवतोविभूतिंयोगंचश्रुत्वा परमोत्कंठितः अर्जुनउवाच॥

मधुसूदनीटीका १

परंब्रह्मपरंधामआश्रयःप्रकाशोवा परमंपवित्रंपावनंचभवानेव
यतः पुरुषंपरमात्मानंशाश्वतंसर्वदैकरूपंदिविपरमेव्योम्निस्वस्व
रूपेभवंदिव्यंसर्वप्रपंचातीतंआदिंचसर्वकारणं देवंचद्योतनात्म
कंस्वप्रकाशमादिदेवं अतएवाजंविभुंसर्वगतंत्वामाहुरितिसंबंधः
१२॥

सदानंदीटीका १

५१ एवंभगवतोयोगंविभूतिंचाद्भुतांश्रुत्वार्जुनउवाचेदंपरमोत्कं
ठितोहरे १ परंब्रह्माद्वयानंदंपरंधामाश्रयोऽहः प्रकृष्टंपावनंयस्मा म॰
द्भवानेवपरंपदं २ पुरुषंपरमात्मानंसर्वदैकरसंयतः दिविव्यो
म्निभवंसर्वप्रपंचातीतमद्भुतं ३ समस्तकारणंदेवंस्वज्योतिर्द्योत
नात्मकं अतएवजनैःसूक्तंविभुंसर्वगतंध्रुवं ४ १२॥

नीलकंठीटीका १

एवंएतांविभूतियोगंचेत्यादिनाविभूतिज्ञानस्यफलोदर्कंश्रुत्वा।
त्वामुत्सुकः प्रथमंस्तुत्वाभगवंतमावर्जयन्नर्जुनउवाच परमिति
परंब्रह्मतत्त्वंपरमुपास्यं तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइति।

श्रुतेः परंधामज्योतिः तत्वपरंब्रह्मस्वरूपंज्ञानं पवित्रयत्तीर्थादिवदुपावितं पावनं
वंमनएवेतिश्रुतेर्हेतिरूपत्वात् परमंपवित्रंतत्तीर्थादिवत्परमंभा
वात् तत्रमानमाह पुरुषमिति सार्थेनपुरुषंदेहान्तस्थं शाश्व
तेनित्यं दिविहृदीकाशेआविर्भूतं आदिदेवंसूत्रात्मनोप्याद्यं अत
एवअजंविभुंव्यापकं त्वाऋषयआहुरितिसंबंधः १२ ॥

त्वत्रश्रद्धोर्जुनउवाच ॥------आनंदीटीका [illegible] १२ एवंविभूतियोगश्रवणे सप्तार्थे १२

रामकंठीटीका

"अथभगवद्वचनाद्विशेषितश्रद्धादिगुणतया भगवत्स्तावादेवाधिगतं भगवत्स्वरूपमनुवदं स्तद्विभूतिविशेषजिज्ञासार्थमर्जुनउवाच॥

"परंनिरुत्तरंपरमात्मलक्षणंनिरतिशयंब्रह्मत्वादियोगितत्वंभवान्
भगवानेवपरमार्थतोब्रह्मव्यतिरिक्तवस्त्वंतराभावान्मायावभासि
तस्यप्रकृत्यादेर्वैयस्यापिस्थूलस्यब्रह्मशब्देनव्यवहारात्परत्वेनब्रह्म
विशेषितं तथावस्तुस्तत्कंच तासांब्रह्ममहद्योनिरित्यत्रप्रकृतेर्ब्रह्म
शब्देनव्यवहारस्तथाशब्दब्रह्मातिवर्ततेईत्यत्रशास्त्रादिशब्दरूपस्या
पिस्वीयस्य तथापरमात्मसंविदात्मकंनिरतिशयंधामज्योतिर्भ
वान् भेदविषयत्वेत्रत्तसंबंधिमंविदपेक्षयाधाम्नोपिपरत्वेनविशे
षणं तथापरममनन्तंमेपवित्रंपावनंभवान् मोहलक्षणमहापात
कविनाशहेतुत्वात् १२॥

अथभगवदुक्तस्यात्मनः लासिकी [illegible]टीका प्रभावातिशयंश्रद्धधानोविभूतीः संक्षेपेण श्रोतुं

काश्चपिउपासनार्थंविस्तरेणश्रुतवत्स्तुः अपूर्वप्रभावातिशयाश्रुपगमपूर्वकमर्जुनउवाच॥

परंब्रह्मलोकलक्षणम् परममत्स्य[illegible]ष्टधामाश्रयःमोक्षाख्यःपरमं
पवित्रमुत्तमंवासनारूपंकलंकशोधकंभवानेव उतःश्रुतआहुपु
रुषमिति यतःशाश्वतंसर्वदैकरूपंदिव्यंद्योतनशीलंस्वप्रकाशम्
आदिदेवमादिश्चासौदेवश्चदेवानामादिभूतमित्यर्थः अजंजन्मरहि
तंविभुंव्यापकंच १२ ॥

पंचोलीटीका

यथोक्तंभगवतोविभूतियोगंश्रुत्वाविस्तरेणजिज्ञासुरर्जु
नउवाच एवंब्रह्मेतिभगवत्परंब्रह्मपरंधामपरंतेजः परंपवि
त्रंपावनंपरममत्रऋषयआहुःशाश्वतंनित्यंपुरुषंदिविभवंदिव्यंआ
दिदेवंसर्वभूतानामादिभूतंविभुंवैभवयुक्तं १२

अथ भगवद्वक्त्या हि शिष्यद्वासंपन्नोर्जुनस्तदुक्तविशेषं जिज्ञा
सुरुवाच परं ब्रह्मेति भगवन्भवान्परंब्रह्म परमेकं ब्रह्म व्याप
कं तथा परं धाम परमं तेजो तत एव परमं पवित्रं भवति निर्लेपत्वा
दिति भावः अथ च नारदादय ऋषयस्त्वामित्थमाहुर्निरूपयंति
तदेव निरूपणप्रकारमाह पुरुषमिति पुरुषं सर्वस्थं नहि किं
विदुस्तत्तद्रूप्यं भवत्यत एव शाश्वतमेकस्मिन्वस्तुन्यदर्शनं गोत
पि पुनस्तस्मै वेतद्रूपप्रतिरूपकेजात्यंतरेस्थितत्वान्नित्यं दिव्यं योत
नात्मकं न केनापि येत्यमहितीयत्वात्॥ १२॥

मधुभाष्य

44

संक्षेप रूपसे कही गई जो विभूति उसको विस्तारसे जानेने की इच्छा करिके अब अर्जुन भगवानकी स्तुति करते हुये सात श्लोकसे कहतेहैं कि आप परब्रह्म औपरमधाम कहे आश्रय औ पवित्रहौ इस कारण या ह कि नित्य कहे सदा वर्तमान पुरुष स्वयं प्रकाश आदि देव औ जन्मा शून्य सर्व व्यापी तमको ऋषि कहते हैं १२ ॥

दोहा

परंब्रह्म परधाम अरु परम पुनीतभवान अजअरवंड दिव्य
पुरुष विभुआदिदेव पुमान १२

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा असि
तो देवलो व्यासः स्वयं चैव ब्रवीषि मे १३ ॥

शांकरभाष्यटीका १

ईदृशं आहुः कथयंति त्वामृषयो वसिष्ठादयः सर्वे देवर्षिर्नारदस्तथा
असितो देवलोप्येवमाह व्यासश्च स्वयं चैव त्वं चैव ब्रवीषि मे मह्यं १३ ॥

आनंदगिरिकृतटीका २

उक्तविशेषणं त्वामृषयः सर्वे यस्मादाहुस्तस्मात्तद्वचनात्तवोक्तं ब्रह्मत्वं
युक्तमित्याह ईदृशमिति ऋषिग्रहणेन गृहीतानामपि नारदादीनां वि
शिष्टत्वात् पृथक्ग्रहणं असितो देवलस्य पिता किमन्यैस्त्वं स्वयमेवा
त्मा नः स्वरूपमप्युक्तवानित्याह स्वयंचेति १३ ॥

स्वामिकृतटीका ३

आहुस्त्वामिति के ऋषयो भृग्वादयः सर्वे देवर्षिश्च नारदः असितश्च देव
लश्च व्यासश्च स्वयं त्वमेव च साक्षात्तन्मे मह्यं प्रब्रवीषि १३ ॥

पिशाचभाष्यटीका ४

आहुस्त्वामिति स्वयं चैव आत्मानं च वचनात्स्तवनाच्च १३ ॥

रामानुजभाष्यटीका ५

आहुरिति ऋषयश्च सर्वे परावरतत्त्वयाथार्थ्यविदः त्वामेवं शाश्वतं दिव्यं
पुरुषमादिदेवमजं विभुं आहुस्तथैव देवर्षिर्नारदः असितो देवलो व्या
सश्च एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः नागपर्यंकमुत्सृज्य ह्या
गतो मथुरां पुरीं १ पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः साक्षाद्देवः
पुराणोसौ स हि धर्मः सनातनः २ ये च वेदविदो विप्रा ये चाध्यात्मविदो ज
नाः ते वदंति महात्मानं कृष्णं धर्मं सनातनं ३ पवित्राणां हि गोविंदः प
वित्रं परमुच्यते पुण्यानामपि पुण्योसौ मंगलानां च मंगलं ४ त्रैलोक्यं
पुंडरीकाक्षो देवदेवः सनातनः आस्ते हरिरचिंत्यात्मा तत्रैव मधुसूदनः
यत्र नारायणो देवः परमात्मा सनातनः तत्र कृत्स्नं जगत्पार्थ तीर्थान्या
यतनानि च ५ तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनं तत्र देवर्षयः सि

श्री· गी·टी· ८·

हासर्वेचैवतपोधनाः ५ आदिदेवोमहायोगीयत्रास्तेमधुसूदनः पुण्या
नामपितत्पुण्यंमाभूत्तेसंशयोत्रवै ६ कृत्स्नएवहिलोकानामुत्पत्तिरपि
चाव्ययः कृत्स्नस्यहिकृतेभूतमिदंविश्वंचराचरं मित्यादीनिहिभूयां
सिमहर्षिवचनानिश्रूयंते तथाचस्वयमेवब्रवीषिभूमिरापोनलोवा
युरित्याद्यहंसर्वस्यप्रभवोमत्तः सर्वंप्रवर्ततइत्यनेन १३ ॥

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका २

अथआहुः तेभुविशेषतोनारदोदेवर्षिराहअसितोदेवलस्याहतथापि
विशेषेणाव्यासः आहतथात्वमेवेति स्वयंइत्यादिवाक्येनाप्रतिस्व
यमपिब्रवीषि १३ ॥ ॥

वनमालीटीका ८

अघटघटनापटीयोचिंतितसामर्थ्यसर्वेपराद्धतत्वविदऋषयस्त्वामेव
शाश्वतंदिव्यंपुरुषमादिदेवमजंविभुमाहुः तथादेवर्षिर्नारदः असि
तोदेवलश्चव्यासोभगवान्नारायणः पद्मनारायणः श्रीमानक्षीरोदधि
वरनिकेतनः नागपर्यंकमुत्सृज्यह्यागतोमधुरांपुरीं १ पुण्यंपीठारवंती
तत्रयत्रास्तेमधुसूदनः साक्षाद्देवः पुराणोसौसहितंधर्मः सनातनः २
त्रैलोक्येपुंडरीकाक्षोदेवदेवः सनातनः आस्तेहरिरचिंत्यात्मातत्रैव
मधुसूदनः ३ यत्रनारायणोदेवः परमात्मासनातनः तत्रकृत्स्नंजग
त्पार्थतीर्थान्यायतनानिच ४ तत्पुण्यंतत्परंब्रह्मतत्तीर्थंतत्तपोवनं
तत्रदेवर्षयः सिद्धाः सर्वेचैवतपोधनाः ५ आदिदेवोमहायोगीयत्रास्ते
मधुसूदनः पुण्यानामपितत्पुण्यंमाभूत्तेअत्रसंशयः ६ कृत्स्नएवहि
लोकानामुत्पत्तिरपिचाव्ययं कृत्स्नस्यहिकृतेभूतमिदंविश्वंचराचरं ७
इत्यादीनिभूयांसिमहर्षिवचनानिश्रूयंते भूमिरापइत्याद्यहंसर्वस्यप्र
भवइत्यनेनस्वयंचब्रवीषि १३ ॥

ऊत्तमवैजयंतीटीका ५

कस्मात्वमीदृशंमांवेत्सीत्यपेक्षायामाहपुरुषमिति यस्मात्सर्वेऋषय।

श्चेतनाचेतनब्रह्मस्वरूपयाथार्थ्यविदो गर्गगौतमादयस्तथा तेषामपि
सर्वेषां योगस्थो देवर्षिः श्रीनारदस्तथासितः तथा देवलस्तथा व्यासः
कृष्णद्वैपायनस्त्वां पुरुषमादिपुरुषं शाश्वतं शश्वद्वाच्याभ्यामुक्त्वा
हुः पुरुषोत्तममिति शाश्वतं सदैकरसस्वरूपं दिव्यं प्रकृतिकालाभ्यां
परं द्योतमानं आदिदेवं ब्रह्मरुद्रादीनां देवानामादिकारणं यद्वा आ
दिः सर्वकारणं देवः प्रकाशात्मकः आदिश्चासौ देवश्चादिदेवस्तं अजं
जन्मादिषड्विकारशून्यं यद्वा अजगतिक्षेपणयोरित्यस्य रूपं अजति
सर्वं ब्रह्मादिस्थावरांतं चेतनाचेतनरूपं प्रभूतं ततं देहवर्णाभिरू
पेण गच्छति प्राप्नोति तत्तच्छरीरांतर्नाति वा अजस्तं अजति तत्तत्कर्मानु
सारेण स्वर्गनरकादिषु योनिषु तानि भूतानि क्षिपति प्रेरयतीति वा अजस्तं स
र्वभूतप्रेरकमित्यर्थः विभुं सर्वव्यापकं आहुः ब्रुवंति एष नारायणः
श्रीमान् क्षीरार्णवनिकेतनः नागपर्यंकमुत्सृज्य ह्यागतो मथुरां पुरीं पु
ण्या द्वारवती तत्र यत्रास्ते मधुसूदनः साक्षाद्देवः पुराणोऽसौ स हि धर्मः
वि॰ सनातनः यं च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ते वदंति महात्मानं कृ
ष्णं धर्मं सनातनं पवित्राणां हि गोविंदः पवित्रं परमुच्यते पुण्यानामपि
पुण्योऽसौ मंगलानां च मंगलं त्रैलोक्यं पुंडरीकाक्षो देवदेवः सनातनः आ
स्ते हरिरचिंत्यात्मा तत्रैव मधुसूदनः एष नारायणो देवः परमात्मा सना
तनः तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च तत्पुण्यं तत्परं ब्रह्म तत्ती
र्थं तत्तपोवनं तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः आदिदेवो महायो
गी यत्रास्ते मधुसूदनः पुण्यानामपि तत्पुण्यं मा भूत्ते संशयः नैवेह कृ
ष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः कृष्णस्य हि कृते भूतमिदं विश्वं
चराचरमित्यादिभिर्बहुभिर्वाक्यैः तथा स्वयं चैव श्रीकृष्णस्त्वमपि मेम
ह्यं ब्रवीषि मत्तः परतरं नान्यत्किंचिदस्ति धनंजय मत्तः सर्वं प्रवर्तते भू
दा॰ मिरापोऽनलो वायुः खं मनो बुद्धिरेव चेत्यादिभिर्वचनैः १३ ॥

मधुसूदनी टीका ९

आहुः कथयंति त्वामनंतमहिमानमृषयस्तत्वज्ञाननिष्ठाः सर्वे भृगुव
सिष्ठादयः तथा देवर्षिर्नारदः असितः देवलश्च धौम्यस्य ज्येष्ठो भ्राता
व्यासश्च भगवान् कृष्णद्वैपायनः एतेऽपि त्वां सर्वोत्कर्षविशेषणैमेवमा

हुः साक्षात् किमन्यैर्वक्तृभिः स्वयमेव मे च मह्यं ब्रवीषि ब्रह्मऋषित्वे
पि साक्षाद्द्रष्टॄणां नारदादीनामपि विशिष्टत्वात् पृथक्ग्रहणं १३

सदानंदी टीका १९

कथयंति वसिष्ठाद्या ऋषयस्त्वां विदांवराः देवर्षिर्नारदो लोकशास्त्रा
र्थाहृतदर्शनः १ असितो देवलो धौम्यः प्रज्ञानात्मैव च व्यासश्च भ
गवान् कृष्णद्वैपायन उदारधीः एतेपि मुनयस्त्वामाहुः पूर्वोक्तगुणसं
युतं किमन्यैर्वक्तृभिः साक्षात्स्वयमेव ब्रवीषि मे २ नारदादेर्विशिष्ट
त्वादृषित्वेपि पृथक्स्मृतिः ४ १३ ॥

नीलकंठी टीका १३

स्पष्टार्थं १३ ॥ ॥ ॥ ॥ ॥

आनंदी टीका

पवित्रं परमं मोहलक्षणमहापातकनाशनात् ऋषयः परावज्ञा
मरीच्यादयः १३

रामकंठी टीका

उक्तार्थावगमस्यागमं भगवद्वचनैकवाक्यतां प्रतिपादयितुमाह
यस्मात्त्वैवं ऋषयः परावरज्ञा वेदमुनयः शाश्वतं नित्यं पुरुषं परमात्
मानं त्वामाहुः कथयंति कीदृशं दिव्यं परमव्योमस्थं तथादिं सर्वेषामपू
र्वं देवं परप्रकाशात्मतया द्योतनशीलं अतएवाजं जन्मरहितं विभुं
व्यापकं न केवलं सर्वे ऋषयो यावन्नारदासितदेवलाभिधाना महर्षयस्त्वा
मेवंविधमा[illegible]हुः स्वयं च साक्षाद्ब्रवीषि १३ ॥

लासिकी [illegible]टीका

एवंविधं पुरुषं पुरुषोत्तममीश्वराख्यं त्वामेव मम पुरोवर्तिनं वसुदे
वात्मजं सर्वे ऋषयः साक्षात्कृततत्त्वा भृगुवसिष्ठादयः तथा देवर्षिर्ना
रदोसितो देवलो व्यासश्च कृष्णद्वैपायनश्चाहुः कथयंति आस्तां तावत्त
दुक्तिः स्वयं च मह्यं त्वं ब्रवीषि सर्वे ऋषय इत्युक्तेपि नारदादीनां पृथग्ग्रह कु
णामतिवैशिष्ट्यार्थम [illegible]
[illegible] १३ ॥

पंचोलीटीका

किंच आहुरिति सर्वे ऋषयः महर्षयः वसिष्ठाद्याः तथा देवर्षिनार
दादयः असितः देवलः व्यासः त्वामाहुः चाप्यत्स्वयंत्वमेवमेमसंब्र
वीषि १३

रत्नवीरसमिद्बोधिनी॥

नन्वन्येपि द्योतनादिगुणात्मका ब्रह्मांडांतर्गता इति कोविशेषस्त
स्मिन्नित्यत आह आदिदेवमिति निरुत्तरप्रकाशकमितिभावः अजं
जन्मादिभावविकारशून्यम तएव विभुं व्यापकमिति स्वयमपीत्थं
ब्रवीषीति १३॥

मधुभाष्य

१३॥

कौन ऐसा कहते हैं तो इसपर कहते कि भृगु आदि ऋषि सकल।
और आप भी साक्षात् हमसे देवर्षिनारद असित ऋषि देवल व्यास
देव ये सब कहते और आपभीसाक्षात् हमसे कहते हौ १३॥

दोहा

केशव मानहुं सत्य यह जो तुम कहहि मोहि भगवन्त
तेरा रूप नहि लखें सुर असुर सोहि १३॥

तोहि सभी ऋषि देवऋषिनारद से कहें जोहि असितदेव
ल व्यास फिर आप कहत तुम मोहि १४॥

49

सर्वमेतदृतं मन्ये यन्मां वदसि केशव नहि
ते भगवन्व्यक्तिं विदुर्देवा न दानवाः १४ ॥

शंकरभाष्यटीका १

सर्वमिति सर्वमेतद्यथोक्तमृषिभिस्त्वया चैतदृतं सत्यमेव मन्ये य
न्मां प्रति वदसि भाषसे हे केशव नहि ते तव भगवन्व्यक्तिं प्रभवं विदुः
देवा न दानवाः १४ ॥

आनंदगिरिकृतटीका २

ऋषिभिस्त्वया चोक्तत्वादुक्तं सर्वं सत्यमेवेति मम मनीषेत्याह स
र्वमिति किं तदित्याशंक्यात्मरूपमित्याह यन्मामिति देवादिभिः स्व
वैरुच्यमानतया तद्रूपे विशिष्टवक्तृग्रहणमनर्थकमित्याशंक्याह
नहीति प्रभवो नाम प्रभवो निरुपाधिकस्वभावः यदा देवादीनामपि
दुर्विज्ञेयं न वक्तृत्वेन तदा का कथा मनुष्याणामित्यर्थः १४ ॥

स्वामिकृतटीका ३

अतो ममेदानीं त्वदैश्वर्ये संभावना नितरामित्याह सर्वमेतदिति यत्त्वं
भवानेव परं ब्रह्मेत्यादि सर्वमपि ऋतं सत्यं मन्ये यन्मां प्रति त्वं कथ
यसि न मे विदुः सुरगणा इत्यादि तदपि सत्यमेव मन्ये इत्याह नही
ति हे भगवन् तव व्यक्तिं देवा न विदुः अस्मदनुग्रहार्थमियमभिव्यक्ति
रिति न विदुर्न जानन्ति दानवाश्चास्मन्निग्रहार्थमिति न विदुरेव १४

पिशाचभाष्यटीका ४

सर्वमेतदृतमिति यथोक्तं सर्वमृतं सत्यं मन्ये व्यक्तिं प्रभुत्वमिति १४ ॥

रामानुजभाष्यटीका ५

सर्वमेतदृतं मन्ये इति अतः सर्वमेतत् यथावस्थितवस्तुकृतं मन्ये
न प्रशंसामात्रमित्यभिप्रायः यन्मां स्नेहेन शिष्यत्वेन च वर्तमानं प्र
त्यनन्यसाधारणं स्वाभाविकं त्वैश्वर्यं कल्याणगुणान् त्वं च वदसि अ
तो भगवन् निरतिशयज्ञानशक्तिबलैश्वर्यवीर्यतेजसां निधे ते व्यक्तिं त्व स्तु
त्प्रकारं न हि प्रकाशानप्रकारपरिमितज्ञाना देवा दानवाश्च विदुः १४

श्री· गी· टी· ८·

50

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं १४ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

एवं प्रहृष्टमनसा सर्वं श्रुत्वा सत्यं मन्येतत्किं भो भगवन्ते व्यक्तिः स्वरूपं दे
वा दानवाश्च हीति निश्चयतज्ज्ञानविदुरिति १४ ॥

वनमालीटीका ८

सर्वमेतदुक्तमृषिभिश्च त्वया च यदुक्तं तत्सत्यमेवाहं मन्ये यन्मां प्रतिवद
सि केशव न हि त्वदीयाचिंत्यमहिमबोधकेन त्वदीयेन त्वदीयेवाव च स्मिन्
मां माप्राणिणा शंकास्ति न च सर्वं ततानं ज्ञानासीति केशौ ब्रह्मरुद्रौ सर्वेषा
वशत्वेन यानियमनयाविषयेन यस्य स इति निरतिशयैश्वर्यप्रति
पादकं केशव पदेन सूचितो अतो यदुक्तं न मे विदुः सुरगणाः इत्या
दि तत्तथैव हि यतः हे भगवन् समग्रैश्वर्यसंपन्नेन न ते व्यक्तिं प्रभावं
ज्ञानातिशयशालिनोपि देवा न विदुर्नापि दानवा न महर्षयः इत्यपि द्र
ष्टव्यं १४ ॥ ॥ ॥

ऊसमैवजयंती टीका ९

ननु सर्वेषामृषीणां मम च वचनं सत्यं मन्यसे न वेति चेत्तत्राह सर्वमेतदि
ति हे केशव के ब्रह्मरुद्रौ तावादितर देवाः येन तथा सर्वेषामपि तौ आ
ज्ञाविषयत्वं प्राप्तेनैव भासीति तथा प्रजापतिं च रुद्रं च सृजामि च
हरामि च तौ हि मां न विजानीतो मोहितौ मम माययेति त्वदुक्तेः इत्या
नेन स्वस्यातिशयसाम्यशून्यत्वं दर्शितमिति तेन यन्मे त्वं वदसि मामं मा पूष्यतेनव
प्रति यत्तन्मे विदुः सुरगणाः प्रभवं न महर्षयः इत्यादि स्वस्य स्वाभावि
कमनंतकल्याणगुणान्निरवधिकातिशयैश्वर्यं च वदसि स्फुटं यथा
स्थानस्थानिष्कपटेन कथयसि यत्तथावस्थितं सर्वं वस्तु ऋतं सत्यं मा
हं मन्ये न तु प्रशंसामात्रमेव जानामीत्याशयः हे भगवन्ननंतावि
ध षड्भैश्वर्यरत्नाकर त्वं नेन स्वस्य नरदेवादिदुर्बोधस्वरूपत्वं सर्वेषा
स्वांतं च बोधितं हि यस्मात्ते परिमितज्ञानशक्तेः तव व्यक्तिं प्रभावं श्री
मूर्तिं वा न दानवाः स्थिति प्रकृतिका स्व दैत्येष्वपि मत्वदृप्त परिच्छिन्न

त्तानाईश्वरत्वाभिमानिनो देवाः इंद्रादयो दानवाः हिरण्याक्षादय।
श्चनविदुः याथार्थ्यान्नजानन्ति तस्मात्त्वमसजातीयत्वद्ज्ञानां तु ये
त्यवज्ञानेनतिचेतिविशेषः १४ ॥

मधुसूदनीटीका ९

सर्वमेवतदुक्तमृषिभिस्त्वयाचऋतंसत्यमेवाहंमन्येयन्मांप्रतिवद
सिहेकेशव नहितद्वदसि ममकुत्राप्यप्रामाण्यशंका तथ्यसर्वज्ञत्वा
त्वंजानासि कस्त्वंईशश्चइतिकेशौब्रह्मरुद्रौसर्वेशावपत्यत्वेनया
वातिश्चवगच्छतीति व्युत्पत्तिमाश्रित्यनिरतिशयैश्वर्यप्रतिपादके
नकेशवपदेनसूचितं अतोयदुक्तं नमेविदुः सुरगणाः प्रभवंनम।
त हर्षयइत्यादितत्तथैवहियस्माद्हेभगवन्समग्रैश्वर्यादिसंपन्नतेनव स्य
व्यक्तिंप्रभावंज्ञानातिशयशालिनोपिदेवानविदुः नापिदानवाःन
महर्षयइत्यपिद्रष्टव्यं १४

सदानंदीटीका ११

सर्वमेतत्त्वयोक्तंयदृषिभिश्चयदीरितं सत्यमेवाथहंमन्येयन्मांप्रति
वदस्यत्र नमेअप्रामाण्यशंकास्तिकथापि तदुदीरितेविधीशावपत्य
ग्रात्वौकिमज्ञानेनतवप्रभो २ सर्वैश्वर्यादिसंपन्नप्रभावेनसुराअपि।
ज्ञानातिशयसंपन्नानविदुर्नापिदानवाः ३ नवामहर्षयस्तेवतत्त्व
वेंतत्तथैवहि ४ १४ ॥

नीलकंठीटीका १२

व्यक्तिंप्रभवं १४ ॥ ॥ १४ ॥

आनंदीटीका

एतत्सर्वंद्वितीयात्प्रभृत्युपदिष्टम् १४

रामकंठीटीका

एतत्सर्वंयथाप्रतिपादितंस्वविभूतियोगादिरूपंवस्तुयत्सात्त्वाहर
सितदहमृतंसत्यंमन्येयत् देवाअपितवव्यक्तिंपारमार्थिकींमूर्तिंन
विदुर्महर्षयोपितथैवनविदुः ततोमहर्षिभ्यःऋतेममप्रत्ययाना
सोदिसानीतुभगवद्वचनादज्ञाथैर्निस्संशयाप्रतीति

नकेवलंवचनमात्रेणैतद लासिकी वसन्तीटीका भ्युपगच्छामि यावत्संभावनयापी
त्याह॥ हेकेशवयत्त्वंमांप्रतिकथयसि पतत्सर्वमहंसत्यमन्ये किमित्या
ह नहीति हेभगवंस्तवव्यक्तिमैश्वररूपेणाभिव्यक्तिंदेवा दान
वाश्चनहिविदुर्नैवजानंति विदुर्देवमहर्षयइत्यपिमान्तरम्
१४ ॥

पंचोली टीका

अतोममइदानींत्वदैश्वर्येऽसंभावनानिहृतेत्याह सर्वमि
ति हेकेशवयत्त्वंमांप्रतिवदसिपतत्सर्वंत्वयाऋषिभिश्च
यथोक्तं तद्दृतंसत्यमितिमन्ये हियस्मात्हेभगवान्तेतव
व्यक्तिंप्रादुर्भावंदेवदानवाः नविदुःनजानंति १४

रणवीरसमिद्धोयिनी॥

अपिच केशवमांप्रति यद्यहूतंभव्यंचवाक्यजातं वदसि त
देतद्दृतंमन्येसत्यंजाने सत्यज्ञोनेदेतमाह नहितेइति भ
गवन्देवास्तेतवव्यक्तिंवैश्वरूप्यंनजानंति कुतोदानवाइति
भवदीयवाक्यावधारणेसमाहितोस्मीतिभावः १४॥

मधुभाष्य

१४॥

इससे अब आपके ऐश्वर्य मे असंभावना बुद्धि निवृत्तहो गई यहक हतेहैं किहे केशव आपजो कहते हो कि सबरूप हमहैं सो मैने स त्यकरि माना औरजो अपने कहा कि सकल देवता हमको नही जानते वह भीयथार्थ करके मैनेजानाहै सोई अर्जुन कहते हैं कि हेभगवान भक्तों औ देवतोंके अनुग्रह अर्थ जो तुमारे अवतार यह देवता नही जानते है औरदानवभी यह नही जानते किहमारे नि ग्रह के लिये भगवानका शरीर धारणभयाहै १४ ॥

दोहा

केशव मानहुं सत्ययह जोउ तुमकहहि मोहि भगव
न तेरारूप नहिं लखैं सुरासुर सोहि १४॥

52

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूत
भावन भूतेश देवदेव जगत्पते १५ ॥

शांकरभाष्यटीका १

यतस्त्वं देवादीनामादिरतः स्वयमिति स्वयमेवात्मनात्मानं वेत्थ जानासि त्वं कथंभूतं निरतिशयज्ञानैश्वर्यबलादिशक्तिमन्तमीश्वरं पुरुषोत्तम भूतानि भावयतीति भूतभावनः तत्संबुद्धौ हे भूतभावन भूतेश भूतानामीश हे देवदेव जगत्पते १५ ॥

आनंदगिरिकृतटीका २

कश्चिदेव महता कष्टेनानेकजन्मसंसिद्धो जानाति त्वदनुगृहीतस्तद्रूपमित्यभिप्रेत्याह यत इति स्वयमेवोपदेशमन्तरेणेत्यर्थः आत्मना प्र
मेकेनाविषयतयेत्येतावत् आत्मानं निरुपाधिकं रूपं तवतव सोपाधि
त्व कमपि रूपमैश्वर्यं वेत्सीत्याह निरतिशयेति पुरुषश्चासावुत्त
मश्चेति त्वरात्वराणीतपुरुषांश्चैतन्यरूपेणं संबोधनेन बोधने सर्वप्रकाशि
त्वं सर्वकर्तृत्वं च कथयति भूतानीति सर्वेश्वरत्वमाह भूतानामिति
रूपं उक्ते तेसोपाधिकं देवादीनामाराध्यतामधिगच्छतीत्याह देवेति जगतः सर्वस्य स्वामित्वेन पालयितृत्वमाह जगदिति १५ ॥

स्वामिकृतटीका ३

किंतर्हि स्वयमिति स्वयमेव त्वमेवात्मानं वेत्थ जानासि नान्यः तदप्यात्मनास्वेनैव वेत्थ न साधनांतरेणात्यादरेणाबहुधा संबोधयति हे पुरुषोत्तम पुरुषोत्तमत्वे हेतुगर्भाणि संबोधनानि हे भूतभावन भूतोत्पादक भूतानामीशानियंतः देवानामादित्यानां देव प्रकाशक जगत्पते विश्वपालक १५ ॥

पिशाचभाष्यटीका ४

स्वयमेवात्मनैव भूतानि भावयतीति भूतभावनस्तस्य संबोधनं १५ ॥

रामानुजभाष्यटीका ५

स्वयमिति हे पुरुषोत्तम आत्मना आत्मानं स्वयमेव स्वेनैव ज्ञानेनैव वेत्थ

भूतभावन सर्वेषां भूतानामुत्पादयितः भूतेश सर्वेषां
भूतानां नियंतः देवदेव देवतानामपि परमदैवत यथा मनुष्यभूगपतिर्म
रीरूपादीनसौंदर्यसौशीलादिगुणगणो देवतानामपि नेतिगोचरतां यवर्त
मान जगत्पते जगत्स्वामिन् एवंरूप महैश्वर्यसंपन्न ततो नान्वयः १५ ॥

स्पष्टार्थं १५ ॥ अभिनवगुप्तकृतटीका ८ परमार्थप्रपा टीका ७

किंतु स्वयमेव आत्मना स्वरूपेण प्रमाणानगोचरमात्मानं वेत्थ नाना
सिद्धत एव पुरुषोत्तमेति संबुद्धिः श्रुतिरपि एतावानस्य महिमातो ज्या
यांश्च पूरुष इति भूतानि भावयतेक ल्पते यस्मिन्निति भूतभावन भूतेश पृ
थिव्यादि महाभूतस्वामिन् १४ ... विभूतयो अशेषेण

वनमालीटीका ८

स्वयमेवात्योपदेशं विनैवात्मना स्वरूपभूतनित्यज्ञानेन निरतिशयानंत
ज्ञानबलैश्वर्यादिशक्तिमंतं वेत्थ अन्यैर्ज्ञातुमशक्यमनेनैश्वर्यमहं कथं
वं० कथं जानीयामिति शंकामपाकुर्वन्नेभ्यः कृपया बहुधा संबोधयति हे पुरुषोत्तम
महदपेक्षया सर्वेभ्यः मुक्तेभ्यः पुरुषेभ्यः प्रकृष्टा एवान्ये तेषामशक्यमपि
पुरुषोत्तमस्य न वशक्यमिति भावः पुरुषोत्तमत्वमेव चतुर्भिः संबोधनै
र्विवृणोति भूतानि सर्वाणि भावयन्नुत्पादयतीति हे भूतभावन सर्वभू
तपितः पितापि कश्चिन्नेशितेत्यत आह हे भूतेश सर्वभूतनियंतः नियंतापि
कश्चिन्नाराध्यस्तत्राह हे देवदेव देवानां सर्वाराध्यानामप्याराध्य आराध्योपि
कश्चिन्न पालयितृत्वेन पतिस्तत्राह हे जगत्पते हिताहितोपदेशकवेदप्र
णेतृत्वेन सर्वस्य जगतः पालयितः एतादृशविशेषणविशिष्टस्त्वं सर्वेषां
पिता गुरुः राजा नः सर्वप्रकारैः सर्वेषामाराध्य इति किं वाच्यं पुरुषोत्तमत्वं
तेनैवेति भावः १५ ॥

ऊरुमवैजयंतीटीका ९

देवादीनां जन्यत्वेन परिच्छिन्नज्ञानत्वात्त्वज्ज्ञानाभावः स्यादित्युक्तमिदानीं
मपरिच्छिन्नज्ञानत्वान्त्वापरिच्छिन्नस्वरूपादिकं त्वमेव वेत्सि नान्यैः न सर्व
लोकव्यापनात्मिकाः स्वविभूतीर्मां प्रत्येवमेव वदेत्याह द्वाभ्यां स्वयमेवे
ति हे पुरुषोत्तम क्षराक्षराभ्यां पुरुषाभ्यामुत्तमोत्कृष्ट आत्मना स्वेनैव ज्ञा
नेनैवात्मानं स्वस्वयमेव वेत्थ वेत्सि अनन्तमेवात्मविभूतीर्वक्तुमर्हसीत्य

नरेणान्वयः एवकारेणान्येदेवदानवादयो नजानंतीतिप्रज्ञानात्मत्वदन
तानाद्यनंतत्वेनात्मानंसाकल्येनत्वमेववेत्सीतिसूचितं चतुर्भिर्वि
शेषणैः पुरुषोत्तमत्वं विवृणवन्संबोधयति हेभूतभावनसर्वेषांचेतना
चेतनरूपाणांब्रह्मादिस्थावरांतानांभूतानामुत्पादयितृणामपिभूतानां
भावनोत्पादयितः प्रकृतिकालकर्मादीनामपिभूतभावनत्वमस्ति
तेषामतिप्रसंगंवारयन्नाह हेभूतेशसर्वेषांभूतानांचेतनानामचेतनानांचे
शानियंतः ननुभूतेशत्वमपियदिशानिकाम्यादिगुणैर्हिरण्यगर्भस्यपु
रुषोत्तमत्वंकथमितिचेत्तत्राह हेदेवदेवदेवानामिंद्रादीनामीशील्यप्र
त्पत्त्यादिगुणयोगितमानानामपिदेवस्यासाधारणत्वमितिकांतिकाह
एपादिकल्याणगुणोल्लासुहृद्योतमानत्वदेवदेवत्वेपियदितत्को
नमेवमर्हितत्कथमितिचेत्तत्राह हेजगत्पते चेतनाचेतनरूपस्यजगतः
पतिः पालकस्त्वमसाधनेनतथासर्वभूतोत्पादकः सर्वभूतप्रेरकः स
र्वदेवपूज्यः सर्वजगत्पालकस्त्वमेवपुरुषोत्तमोनान्य इतिभावः १५

यतस्त्वंतेषांसर्वेषामादिरपा
कयज्ञानस्वातः

स्वयमेवान्योपदेशादिकंमंतरेणैवत्वमेवात्मनास्वरूपेणात्मानंनिरु
पाधिकंसोपाधिकंच निरुपाधिकंप्रत्यक्चेतनः विषयतयासोपाधि
कंचनिरतिशयैश्वर्यज्ञानादिशक्तिमत्त्वेनवेत्थजानासिनान्यःकश्चित्
ग्रन्थेतीनमशाक्यमहंकथंजानीयामित्याशंकामपनुदन्संबोधनेन
बहुधासंबोधयतिहेपुरुषोत्तमेतिवदयत्नयासर्वेपिपुरुषाअपकृ
ष्टापवत्वात्तेषामशाक्यंसर्वोत्तमस्यतवशाक्यमेवेत्यभिप्रायः पुरु
षोत्तमत्वमेवविवृणोतिपुनश्चतुर्भिः संबोधनैः भूतानिसर्वाणिभा
वयत्युत्पादयतीति हेभूतभावनसर्वभूतपितः पितापिकश्चिन्नेष्टेत
त्राह हेभूतेशसर्वभूतनियंतः नियंतापिकश्चिन्नाराध्यस्तत्राह हेदेव
देवदेवानांसर्वाराध्यानामप्याराध्यः आराध्योपिकश्चिन्नपालयतृत्वेन
पतिस्तत्राह हेजगत्पते हिताहितोपदेशकवेदप्रणेतृत्वेनसर्वस्य
जगतःपालयतः एतादृशसर्वविशेषणविशिष्टस्त्वंसर्वेषांपितास
र्वेषांगुरुः सर्वेषांराजाअतःसर्वैःप्रकारैःसर्वेषामाराध्यइतिकिंवा
॥ ॥ ॥ अपुरुषोत्तमत्वेनवेत्तिभावः

श्री॰
गी॰ टी॰
द॰

54

१५ ॥

सदानंदीटीका ११

यतस्त्वमेषांसर्वेषांपिताचिंत्यगतिः प्रभुः स्वयमेवोपदेशादिमंतरे।
णात्मैवच १ अन्यकेनस्वरूपेणात्मानंनिरुपाधिकं जानास्यवि
षयत्वेनतथासोपाधिकंस्वयं २ त्वंसर्वातिशायज्ञानैश्वर्यादिशक्तिमत्त
या जानासिनापरः कश्चित्त्वांज्ञातुंपुरुषोत्तम ३ समर्थोस्तियतः सा
वैश्वरुपास्त्वदपेक्षया अपकृष्टा अतस्तेषामशक्यंज्ञानमस्तिते ४ सर्व
भूतपितासर्वोत्पादकत्वेनसंमतः पितापिकश्चिदेवेहेत्वत्तसर्वनिया
मकः नियंताकश्चिदाराध्यस्तत्राराध्योपिदिवौकसां आराध्योपिनक
श्चित्स्यात्पालयितृतयापतिः ६ त्वंतुवेदप्रणेतृत्वाद्धितादेरुपदेश
तः पतिःसर्वस्यजगतोरक्षकत्वेनसंमतः सर्वैरेतादृशैरेवविशि
ष्टत्वंविशेषणैः सर्वेषांजनकःस्वामीगुरूराजामहेश्वरः ७ अतः
सर्वैःप्रकारैस्त्वमाराध्यः सर्वदेहिनां किंवाच्यतेजगत्स्वामिन्पुरु
षोत्तमप्रसद्यते ९ १५ ॥

नीलकंठीटीका १२

हेभूतभावनभूतानांभावक १५ ॥ १५ ॥

आनंदीटीका

ज्ञातस्त्वंदेवाऋषयश्चनविदुरि रामकंठीटीका

त्पत्रहेतुमाह॥ स्वयमेवेत्यादि जगत्पतेविश्वंभरतथाभूतभावन भूतानांचराचराणां
सत्त्वानांभावं वेद्यतापादनमात्रेणोत्पादक तथातेषामेवयथेष्टवि
नियोगैकस्वतंत्रतया ईशस्वामिन् स्वयमेवात्मनात्मानंस्वरूपेणेव
वेदैकैकस्वभावतात्कथंवेद्यपरवीमनुष्यदेवादेवनरसि सर्वहित
वैकस्यसर्वज्ञस्यवेद्यंनतत्त्वंकस्यचिद्धेयस्ततोह्योतोः १५ ॥

लासिकी टीका

किंतर्हि॥ अत्यादरेणाबहुधासंबोधयति हेपुरुषोत्तमेश्वर ईश्वरत्वेहेतुगर्भा
णिविशेषणान्याह हेभूतभावन चतुर्दशविधभूतोत्पादक हेभूते
शभूतानांयथेष्टंनियंतः हेदेवानांदेवउपासनीय हेजगत्पतेविश्वा
पालक त्वमात्मानमैश्वरंरूपंस्वयमेवनान्येनप्रयोजकेन आत्मनैव

नतसाधनांतरेणात्मनमेववे[त्था]जानासिनान्यः एवकारः सर्वत्रसंबध्यते न
तुतिष्ठतभगवदभिव्यक्तेर्महर्षिभिरप्यनवधृतायाअस्मद्विधानामववो
धने आग्रहः किंतु विज्ञप्तिः योगस्याविकंपनहेतुभूतयोर्विभूतियो
गयोर्ममजिज्ञासास्तीत्याह १५॥

पंचोलीटीका

किंतर्हि स्वयमेवेति हेपुरुषोत्तम हेभूतभावन भूतानि भावय
तीति भूतभावनः भूतेश देवदेव जगत्पते त्वमात्मानं निरतिश
यं ज्ञानैश्वर्यबलादिशक्तिमंतमीश्वरं स्वयमेव वेत्थ जानामि १५

रत्नवीरसमिद्बोधिनी॥

परमार्थतस्तु स्वयमेव सर्वं जानासीत्याह स्वयमेवेति पुरुषोत्त
मादिसंबोधनं सर्वज्ञत्व प्रतिपादनपरमतस्त्वं स्वयमेवानन्यवा
ज्ञात्मानं स्वरूपमात्मना स्वसाधनेनैव वेत्थ जानामीति भवत्स्वरू
पपरिज्ञाने देवादयोपि समर्था न संति अतोन्येस्मदादयः इति
स्वस्मिन पर्याप्तत्वमवधार्य भगवंतं प्रार्थयते वक्तुमिति १५॥

मधुभाष्य

१५॥

55

तोइसका फलित अर्थ क्याहै इस आकांक्षापर कहतेहैं किहे पुरुषो
त्तम आपही अपने कोजानतेहो और कोई तमको नहीं जाने है यह
अति आदरसे वारंवार संबोधन देकहते है किहेभूतभावन भूतेश दे
वदेव जगत्पते इन सब संबोधनो से श्रीकृष्ण का पुरुषोत्तमत्वसाधा
नकियाहै १५ ॥

दोहा

आपहि आपको जानहि तुम पुरुषोत्तम ईश हे देवदेव
जगतिपति भूतभावनभूतेश १५

95

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः या
भिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि १६

शांकरभाष्यटीका १

वक्तुमिति वक्तुं कथयितुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः आ
त्मनो विभूतयो याः ता वक्तुमर्हसि याभिर्विभूतिभिरात्मनो माहा
त्म्यविस्तरैरिमान् लोकांस्त्वं व्याप्य तिष्ठसि १६ ॥

आनंदगिरिकृतटीका २

यस्मादस्मदृशामगोचरस्तवात्मा जिज्ञासितश्च तस्मात्त्वयैव तद्रूपं
वक्तव्यमित्याह वक्तुमिति दिव्यत्वमप्राकृतत्वं संभाव्यत्वयमवाचा
हे आत्मनः इति वक्तव्याविभूतीर्विशिनष्टि याभिरिति यत्त्वं ता लो
कान् प्रदर्शयित्वा वर्तसे ता विभूतीरशेषेण वक्तुमर्हसीत्यर्थः १६ ॥

स्वामिकृतटीका ३

यस्मात्त्वदापित्व्यक्तिं त्वमेव वेत्थ न देवादयः तस्माद्वक्तुमर्हसीति या आ
त्मनस्तव दिव्या अप्राकृता विभूतयस्ताः सर्वा वक्तुं त्वमेवार्हसि या यो
सि याभिरिति विभूतीनां विशेषणं स्पष्टार्थः [illegible]
[illegible] १६ ॥ पिशाचभाष्यटीका ४

वक्तुमर्हसीति आत्मविभूतयो दिव्याः अप्राकृतास्तस्मात्त्वयमेव व
क्तुमर्हसि १६ ॥ रामानुजभाष्यटीका ५

विक्तुमिति दिव्यास्तवासाधारण्यो विभूतयो यास्तास्त्वमेवाशेषेण
वक्तुमर्हसि त्वमेव वक्तुं जयेत्यर्थः याभिरनंताभिर्विभूतिभिर्यैर्नियमन
प४ विशेषैर्युक्तः इमान् व्याप्तिष्ठसि १६ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः १६ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

विस्तरेण वक्तुमर्हसि याभिर्विभूतिभिरिमान् लोकान् भूर्भुवः स्वरा
दीन् व्याप्य तिष्ठसि भो १६ ॥

श्री· गी· टी· द·

भूति

वनमालीटीका ८

याभिर्विभिरिमां सर्वांल्लोकान्व्याप्य वर्तिष्ठसि तास्त्वासाधारणावि-
भूतयो दिव्याः सर्वज्ञेतरैर्ज्ञातुमशक्या हि यस्मात्सर्वज्ञस्त्वमेवता अशेषेण
वक्तुमर्हसि १६ ॥

ऊरमवैजयंतीटीका ९

ननु यद्देवादिभिरपि दुर्ज्ञेयं मत्स्वरूपं तन्मया तुभ्यं कथमिव कथ्यतामित्याशंक्या-
नवविभूतिविषयिका मम जिज्ञासा न तु स्वरूपविषयिकेत्याशयेनाह
याः वक्तुमिति हीति निश्चयेन याः दिव्याः देवस्य गायत्रीमंत्रप्रतिपाद्यस्य
तवैव मा दिव्याः अन्यासाधारणरूपाः त्वदसाधारणभूता विभूतयः आत्मनः
स्वस्य तव विभूतयः ऐश्वर्याणि संति ता विभूतीरशेषेण सामग्र्येण म-
ह्यं वक्तुं कथयितुं अर्हसि योग्यो भवसि आत्मविभूतितत्त्वमेवास्य
नत्वात्त्वमेव वक्तुं योग्यः अर्थः कास्ता विभूतयस्तत्रापेक्षायामाह याभि-
रिति याभिः संख्यावच्छेदशून्याभिर्विभूतिभिर्विशिष्टस्त्वमिमान्दृ-
ष्टश्रुतगोचरान्लोकान्समस्तदेशपरिमितान्व्याप्य नियम्य तिष्ठ-
सि स्थितोसि १६ ॥

यस्मादन्येषां सर्वेषां ज्ञातुमशक्या-
नवविभूतयस्त-
स्मात् ॥

मधुसूदनीटीका १० अवश्यं ज्ञातव्यास्त्वा। त्वमे,

याभिर्विभूतिभिरिमान्सर्वांल्लोकान्व्याप्यवर्तितिष्ठसि तास्त्वासा-
धारणा विभूतयो दिव्याः असर्वज्ञैर्ज्ञातुमशक्या हि यस्मात्तस्मात्सर्व-
ज्ञस्त्वमेवताः अशेषेण वक्तुमर्हसि
१६ ॥

सदानंदीटीका ११

यस्मादात्मनो हि सर्वेषामशक्यास्ते विभूतयः ज्ञातव्यास्त्वावश्यमेतस्मा
याभिर्विभूतिभिः सर्वांल्लोकान्निव्याप्यतिष्ठसि त्वं नवैवताः दिव्याः माः
ज्ञातुमशक्या हि यस्मात्तस्मात्त्वमेव च सर्वज्ञः सर्वशक्तिश्च वक्तुमर्हा-
स्यशेषतः १६ ॥

नीलकंठीटीका १२

एवंकृतात्मनोनुभक्तिनमाह वक्तुमिति १६ ॥

आनंदीटीका

विभूतीः ज्ञानैश्वर्यादिविशिष्टभूतीः येननावेतनेष्वात्मनः प्रादुर्भावात् [illegible]येननस्माह् १६

रामकंठीटीका

आत्मनोविभूतीः स्वैश्वर्यविजृम्भाअशेषेणासाकल्येनवक्तुमर्हसिकथयि तुंप्रसीदेत्यर्थः कीदृशीर्विभूतीः शुभाः सर्वस्यसदसद्विभागेनव्यवस्थित स्यमायावभासितस्यजगत्पदार्थजातस्यशुभाशुभत्वेसतियत्रयत्रसर्गेया याशुभरूपाविभूतिस्तांतामादिशेत्यर्थः कास्ताविभूतयोयाभिरिमांलो कांस्त्वंभुवनानित्वंव्याप्यातिक्रम्यवर्तसे अत्रदिव्याआत्मविभूतयः इति प्रथमांतपाठंकेचित्पठंतितेचयत्रच्छद्वाभ्याहारेणाक्षान्दस्यप्रयोगेनवा समर्थयंति [illegible]मस्माह् १६

लासिकी [illegible]टीका

यास्तवात्मविभूतयआत्मतयैवविदितत्वेनविशिष्टतयावाभवनरूपाः शक्तयोदिव्याअसद्भूताः संतिताः सर्वावक्तुमर्हसिकथयितुंप्रसीदेत्यर्थः कास्ताइत्याह याभिर्विभूतिरूपाभिः शक्तिभिरिमांलुकोंश्चतुर्दशभुव नानिव्याप्यापित्वमेवइश्वरस्तिष्ठसि स्वस्वभावादप्रच्युतएववर्तसे तदुक्त मागमे शक्तिश्चशक्तिमांश्चैवपदार्थद्वयमुच्यते शक्तयोस्यजगत्कृत्स्नं शक्तिमांस्तुमहेश्वरइति [illegible] १६॥

पंचोलीटीका

यस्मात्त्वाभिव्यक्तिंत्वमेववेत्सिनदेवादयः तस्माद्वक्तुमर्हसीत्या ह वक्तुमिति हियस्मात् तादिव्याः अलौकिकाआत्मविभूतयः स्वकीयमाहात्म्यविस्तारअशेषेणसाकल्येनवक्तुमर्हसियाभि र्विभूतिभिस्त्वमिमांल्लोकान् व्याप्यतिष्ठसि १६

रणवीरसंस्कृतबोधिनी

आत्मविभूतयइति द्वितीयार्थेप्रथमा आत्मविभूतीः सर्वार्थसंग्रहे णोक्ता अपितादिव्यादिवः स्वस्वरूपभूमैर्भवा अशेषेणवक्तुमर्हसि

याभिर्विभूतिभिरिमाल्लोँकानभिव्याप्यतिष्ठसि स्वसत्तावभासितभा
स्यभासकविभूत्यात्मकोसीतिभावः १८॥

मधुभाष्य

१८॥

जिस हेतु तुमारा तत्व औ अभिव्यक्ति तुमको छोडि देवादि भी नही जानते इससे तुमारी जो अद्भुतः विभूति सो तुमारे ही कहने योग्य है कि जिन विभूतियों से तुम सकल लोकमे व्यापरहे हो सो अपनी उन दिव्य विभूतियों को कृपाकरि के कहो जो मेरे मन का सन्देह जाय १६ ॥

दोहा

तुमहि दिव्यविभूति निजसमहि कहनके योग होवें स्थित
जिह भूतिसें तुम इहव्यापहुं लोग १६

59

कथंविद्यामहंयोगिंस्त्वांसदापरिचिंतयन् के
षुकेषुचभावेषुचिंत्योसिभगवन्मया १७ ॥

शांकरभाष्यटीका १

कथमिति कथंविद्यां विजानीयां अहं योगिन्त्वांसदापरिचिंतय
चभावेषु न् केषुकेषु वस्तुषुचिंत्योसि ध्येयोसिभगवन्मया १७ ॥

आनंदगिरिकृतटीका २

किमर्थं विभूतीः आत्मनिक्ष्यसीत्याशंक्य ध्यानसौकर्यं प्रकारप्रश्नस्य फ
लं कथयति कथमिति योगोनामैश्वर्यं तदस्यास्तीति योगिन्त्वं संबु
द्धौ हे योगिन्नहं स्यविहमतित्वा केन प्रकारेण सततमनुसंदधानो
विशुद्धबुद्धिर्भूत्वा निरुपाधिकंत्वा विजानीयामिति प्रश्नः प्रश्नांतरमवता
रति केषु केष्विति चेतनाचेतनभेदादुपाधिबहुत्वाच्च बहुवचनं १७

ˇकथनप्रयोजनंदर्शयन्प्रार्थयति स्वामिकृतटीका ३

ˇकथमितिद्वाभ्यां हेयोगिन्कथंकैर्विभूतिभेदैः सदापरिचिंतयन् त्वा
महंविद्यांजानीयांविभूतिभेदेनचिंत्योपित्वंकेषुकेषुपदार्थेषुमयाचिंत
नीयोसि १७ ॥ पिशाचभाष्यटीका ४

कथंविद्यांविजानीयांभावेषुपदार्थेषु १७ ॥

रामानुजभाष्यटीका ५

किमर्थमेतत्प्रकाशनमित्यपेक्षायामाह कथमिति अहंयोगीभक्तियो
गनिष्ठः सन् भक्त्यात्वांसदापरिचिंत[illegible]पित्वंअहं नः परिचिंतनीयंत्वा
परिपूर्णंस्वर्यादिकगुणयोगंचकथंविद्यांसर्वोत्कृष्टज्ञानादिभावव्या
क्तिरिक्तेषुकेषुकेषुभावेषुमयानियंतृत्वेनचिंत्योसि १७ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १७ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

योगिन्विशेषैश्वर्यंत्वांव्यवहितरूपेणास्थितमहंकथंकेनप्रकारेणविद्यांजा
नामि केषुकेषुभावेषुस्वकीयवासनास्थलेषुमयाचिंत्योसि तत्त्वंभवद् द
र्शनेनतवस्मरणंभविष्यतीत्यर्थः १७ ॥

श्री·
गी·टी·
द·

60

वनमालीटीका ८

किंप्रयोजनं तत्कथनस्य तत्राह कथमिति द्वाभ्यां योगो निरतिशयैश्वर्या
दिशक्तिः सोऽस्यास्तीति हे योगिन् निरतिशयैश्वर्यादिशक्तिशालिन् त
न्महद्विभूतेषु मां ध्यायन् ज्ञास्यामि तत्राह केषु केषु भावेषु चेतनाचेतना
त्मकेषु तद्विभूतिभूतेषु मया चिन्त्योऽसि हे भगवन् १७ ॥

उत्तमवैजयंतीटीका ९

ननु विभूतिकथनस्यैव किंवा प्रयोजनं स्यादित्यपेक्षायामाह कथं विद्या
मिति हे योगिन् निरतिशयाचिन्त्यानन्तज्ञानैश्वर्यादिशक्तिरस्यास्तीति त
था हे निरतिशयाचिन्त्यानन्तज्ञानैश्वर्यादिशक्तिशालिन् यद्वा योगमा-
याशक्तिरस्यास्तीति हे योगिन् योगमायाशक्तिधारिन् यद्वा प्रथमान्तो
यं योगिशब्दो भक्तियोगोऽस्यास्तीति योगी अहं प्रपन्न इति तस्यैवं तन्वा-
योगिनं सदा सर्वस्मिन्काले सर्वावस्थायां वा परिचिंतयन् ध्यायन् चिन्तयि
तेऽहं तः सन्निकर्षः अहमल्पज्ञो निरतिशयैश्वर्यादिकमनन्तकल्या-
णगुणयोगं च चिंतनीयं त्वां कथं केन प्रकारेण विद्यां जानीयां च पुनः हे
भगवन् निरतिशयैश्वर्य धर्म यशः श्री ज्ञान वैराग्य निधे केषु केषु भावा-
षु पूर्वोक्तबुद्धिज्ञानादिभावव्यतिरिक्तेषु कस्तु तद्विभूतिभूतेषु चेतना-
नाचेतनात्मकेषु पदार्थेषु मया त्वज्ज्ञेन त्वत्प्रपन्नेन त्वच्छिष्येण त्वं चिन्त्यो
ध्येयोऽसि यतस्तु भयं त्वं वदेत्याशयः १७ ॥

मधुसूदनीटीका १०

किंप्रयोजनं तत्कथनस्य तदाह द्वाभ्यां ॥ योगो निरतिशयैश्वर्यादिशक्तिः सोऽस्यास्तीति हे योगिन् निरतिशया-
ज्ञानैश्वर्यादिशक्तिशालिन् अहमतिस्थूलमतिः त्वां देवादिभिरपि
ज्ञातुमशक्यं कथं विद्यां जानीयां सदा परिचिंतयन् सर्वदा ध्यायन् त्वत्
महद्विभूतिषु मां ध्यायन् ज्ञास्यामि तत्राह केषु केषु च भावेषु चेतनाचेत-
नात्मकेषु वस्तुषु तद्विभूतेषु मया चिन्त्योऽसि हे भगवन् [illegible] १७ ॥

सदानंदीटीका ११

योगिन् हे निरतिशयैश्वर्यशक्तिशालिन् जगद्गुरो अतिस्थूलमतिस्त्वां हे देवाद्यैरपि-
सर्वथा १ अशक्यं संपरिज्ञातुं जानीयां कथमीदृशं सदा ध्यायंस्त्वां के
षु केषु चिज्जडवस्तुषु तद्विभूतिस्वरूपेषु चिन्त्योऽसि भगवन्मया २ १७

नीलकंठीटीका १७

योगापेश्वर्येनह्वनहेयोगिन् त्वांकथंचमेवत्त्वाविद्यांनकथमपीति। विश्वरूपदर्शनस्यदौर्लभ्यंमन्वानःकतिपयेष्ववस्थानेषुभगवंतंचिंतयि ष्यामिविश्वरूपदर्शनेऽधिकारसिध्यर्थमित्याशयेनाह केष्विति ७

आनंदटीका

विभूतिज्ञानेप्रयोजनमाह ॥

योगिन्निति योगःसर्वस्मिंजगतिप्रोक्तेनोतप्रोतमायेनसंबंधोयस्य तस्यामंत्रणम् भवंतीतिभावाश्चेतनाचेतनाः प्राणिनस्तेषु ७

रामकंठटीका

विभूतिश्रवणेप्रयोजनमाह ॥

हेभगवन्सर्वज्ञत्वादिगुणोकाश्रयतथामहायोगिन्नन्यसाधारणस माधिकनिष्ठत्वामेवंरूपंकथंकेनप्रकारेणाहंपरिचिंतयंस्त्वस्वरवि द्यांजानीयां केषुकेषुचभावेषुपदार्थेषुमयाचिंत्योसिध्यातव्योसि १७

विभूतिश्रवणेप्रयोजनमाह ॥ लासिकी [illegible]टीका

हेयोगिन् भेदवैविध्यविस्फारेसत्यपियोगेनात्मसमाधानेननित्य विमुक्त अहंसदापरिचिंतयन्स्वात्मानंप्रत्यवमृशन् त्वामीश्वरंकथंवि द्यांस्वात्मतयोपलभेय प्रकारमेवविवृणोति केष्विति केषुकेषुभावे षुविभूतिरूपेषुपदार्थेषुमयाचिंत्योसि तत्प्रकारमुपदिशेत्यर्थः ७

पंचोलीटीका

कथनप्रयोजनमेवप्रार्थयंतेद्वाभ्यां कथमितिहेयोगिन् अ हंत्वांसदापरिचिंतयन् कथंविद्यांकथंजानीयांहेभगवन् के षुचभावेषुपदार्थेषुचिंत्योसिध्येयोसि १७

रसावीरसमिद्धोधिनी ॥

इदानींविस्तरेणविभूतिकथनस्यप्रयोजनमाह कथंविद्यामि ति योगिन्नितियोगः स्वसामर्थ्यंतद्विद्यते यस्यतत्संबोधनंस ति योगिन्निति योगः स्वसामर्थ्यंतद्विद्यते यस्यतत्संबोधनं हेयोगिन् अहंपरिचिंतयन्स्वरूपत्वा दानित्यंकालांतरेपिचिंतनीयत्वादहंपरिचिंतयन्स्वरूपत्वा भवन्तं भवन्तेव त्वांवद्याध्यात्म्यकथंकयोपासनयाविद्यांजानी

यामितिप्रार्थनापूर्वकः प्रश्नः अपिच भगवन्मयाकेषुकेषुभा
वेषुचिंत्योसि काभिःकाभिस्त्वद्वैपाविधमर्गणितगतदेवति
र्यङ्नरस्थावरविशिष्टमूर्तिभिश्चिंत्योभिध्येयोसीत्यर्थः १७॥

मधुभाष्य

१७॥

भाषाअनुवाद टीका १७

इससे अर्जुनअपने कहने का प्रयोजन देखलाय कर प्रार्थना करते है कि हे योगिन श्रीकृष्ण मैं तुमको किसप्रकार हे तुम्हारी विभूति भेदके द्वारा निरंतरभावना करि जानने सकौंगा और भिन्न भिन्न विभूति मे चिंतनीय तुम कौन कौन पदार्थ मे मेरी भावना के योग्य हो अर्थात किस किस वस्तु मे तुमैं हम जानै १७ ॥

दोहा

हे योगी तुमकूं सदा क्यों जानहुं मैं करध्यान किह किह भाव विषैं मोहि चिंतनीय भगवान १७॥

62

विस्तरेणात्मनोयोगंविभूतिंचजनार्दन भूयः
कथयतृप्तिर्हिशृण्वतोनास्तिमेमृतं १८ ॥

शंकरभाष्यटीका १

विस्तरेणेति विस्तरेणात्मनोयोगं योगैश्वर्यं शक्तिविशेषं विभूतिं।
चविस्तरं ध्येय पदार्थानां हेजनार्दन अर्दतेर्गतिकर्मणोरूपं असुराणां
देवप्रतिपक्षभूतानां जनानां नरकादिगमयितृत्वाज्जनार्दन अभ्युदयनिः
श्रेयसपुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यतइतिवाभूयः पूर्वमुक्तमपि।
कथय तृप्तिर्हि परितोषोयस्मान्नास्तिमेममशृण्वतः त्वन्मुखनिःसृ।
तवाक्यामृतं १८ ॥

आनंदगिरिकृतटीका २

प्रकृतप्रश्नमुपसंहरति विस्तरेणेति अर्दतेर्गतिकर्मणोजनार्दनेति
रूपं तत्प्रत्यादयति असुराणामिति प्रकारांतरेण याच्ञार्थं व्युत्पादय
ति अभ्युदयेति नत्पूर्वमेव सममेव तवमेव विभूतिरैश्वर्यं चेदा।
यस्य दर्शितं तत्किमिति योगमिष्यते तत्राह भूय इति अमृतममृततुल्य
त्वमितमर्थः १८ ॥

स्वामिकृतटीका ३

नदेवंबहिर्मुखैरपिचिंतनेनयतत्रविभूतिभेदेनत्वच्चिंतैवयथाभवेत् तथावि
स्तरेणाकथयेत्याह विस्तरेणेति आत्मनस्तवयोगंसर्वज्ञत्वसर्वशक्तित्वा।
दिलक्षणंयोगैश्वर्यंविभूतिंचविस्तरेणपुनःकथय हियस्मात्त्वद्वा।
क्यममृतंरूपंशृण्वतोममतृप्तिरलंबुद्धिर्नास्ति १८ ॥

पिशाचभाष्यटीका ४

विस्तरेणात्मनोयोगंविभूतिंविस्तारममृतं १८ ॥

रामानुजभाष्यटीका ५

विस्तरेणेति अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्ततइत्यादिनासंक्षेपेणोक्तं
तवसृष्ट्यादियोगंविभूतिंनियमनंचभूयोमेविस्तरेणकथयत्वदीयाख्या।
मानंत्वन्माहात्म्यंशृण्वतोमेअमृतंपिवतइवतृप्तिर्नास्तिअसितत्वाद्धिममात्र
मिस्त्येवविदितस्याभिप्रायः १८

श्री॰ गी॰ टी॰ ६

63

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १८ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

सर्वसामान्यतः सप्तमादिषु कथितमप्यपरं तद्भूयः विस्तरेण कथय यतस्ते वचनामृतं शृण्वतो मे न तृप्तिरस्ति ॥

वनमालीटीका ८

आत्मनस्तव योगं सर्वशक्तित्वादिलक्षणमैश्वर्यातिशयं विभूतिं संक्षेपेण सप्तमे नवमे चोक्तमपि भूयः पुनः कथय सर्वैर्जनैरभ्युदयनिःश्रेयसप्रयोजनैर्याच्यस इति हे जनार्दन अतो ममापि याच्ञा न युक्तिविरुद्धा उक्तस्य पुनः कथने कौतुकं याचमेतन्नाह तृप्तिरलेशमात्रयोऽपि नास्ति हि यतः शृण्वतः श्रवणेनापिबतस्त्वद्वाक्यममृतं अतस्त्वद्वाक्यमित्य[illegible]। तुनेरपकृत्य तिशयोक्तिरूपसंकरोऽयं माधुर्यातिशयानुभवेनोक्तं तातिशयत्वेनोक्ति १८ ॥

ऊहमवैमयंतीटीका ९

ननु एवं स्मिन्पूर्वास्मिन्नध्याये अपि सप्तमाध्याये मत्तः परतरं नान्यदित्यादिना जगत्कारणत्वेन कल्याणगुणाः योगो अहं सर्वस्येत्यादिना विभूतयश्च संक्षेपतः कथिताः पुनः किं पृच्छसीति चेत्तत्राह विस्तरेणेति हे जनार्दन आत्मनः स्वस्य योगं अहं सर्वस्य प्रभव इत्यादिना जगत्कारणत्वादिगुणयोगं विभूतिमात्मनः सर्वे प्रवर्तन्त इत्यादिना नियमनं च यत्संक्षेपेणोक्तं तद्विस्तरेण भूयः पुनरपि कथय हि यस्मात्त्वद्वचनरूपममृतं शृण्वतः श्रवणरसनया पिबतो मे मम तृप्तिरलंबुद्धिर्नास्ति अत्र त्वद्वचनमित्यत्र नक्रेरपह्नुतिरलंकारः ज्ञेनेनोक्तं तथाहि तल्लक्षणम् अतत्त्वमारोप्यते तत्त्वं यत्रापह्नुतिः पालिरपह्नुतिः १८ ॥

मधुसूदनीटीका १०

अतः आत्मनस्तव योगं सर्वज्ञत्वसर्वशक्तित्वादिलक्षणमैश्वर्यातिशयं विभूतिं च ध्यानालम्बनं विस्तरेण पुनः कथय संक्षेपेण सप्तमे नवमे चोक्तमपि भूयः कथय सर्वैः जनैरभ्युदयनिःश्रेयसप्रयोजनं याच्यस इति हे जनार्दन अतो ममापि याच्ञा न अनुचितैव उक्तस्य पुनः कथनं कथं तत्राह नहि तृप्तिः अलमत्ययेनकाविच्छिन्ना नास्ति

ह्रियस्मात् शृण्वतः श्रवणेन पिबतस्त्वद्वाक्यममृतमतृप्त्या
देपदे स्वादु स्वादु श्रवणवाक्यमित्यत्र केवलं परमातिशयोक्तिरूपक
मेकरोत्ययं माधुर्यातिशयात् न भवेनोत्तरकेदातिशयं प्रत्यनकि [illegible]

सदानंदीटीका १८

१८ ॥

आत्मनस्तव योगं तं सार्वज्ञ्यादि निरंकुशं ऐश्वर्यातिशयं तद्वद्विभूतिं
ध्यानगोचरां । संक्षेपेण प्रागुक्तां सम्यमेनव मे तथा पुनर्देवेश
कथय विस्तरेणाधुना स्फुटं याच्यसे त्वं जनैः सर्वैर्भोगमोक्षप्रयोजने
अतो ममापि याच्येयं सर्वैषैवाविनाश्यपि कथं न पुनरुक्तस्य किमर्थं
याचसे शृणु त्वद्वाक्यममृतं यस्माच्छ्रोत्रेणापिबतो मम नास्त्यलमा
त्ययेनेच्छाविच्छित्तिः स्वादु स्वादु पदे माधुर्यातिशयादेव त्वद्वाक्यमिति
देति उक्तातिशयेनोक्तममृतं चेति केवलं १८ ॥

नीलकंठीटीका १८

योगं वैश्वरूप्यं विभूतिं ध्यानालंबनं अमृतममृतसमं मोक्षसमा
यतं १८ ॥

आनंदीटीका [illegible] १८ स्पष्टार्थं

रामकंठीटीका

अतः प्राक्तनमैश्वर्यं समाधिं विभूतिं च त्वं जगदाभासलक्षणां सैश्वर्य
विजृंभां विस्तरेणार्वेतत्त्वेन मह्यं भूयो बहुतरं कथय यादिश यस्मादेतत्
स्वरूपप्रतिपादनलक्षणाममृतं त्वत्कथारसं शृण्वतो मे श्रवणाभ्यां पिबत
स्तृप्तिः संतोषो नास्ति [illegible] १८ ॥

लासिकी [illegible]टीका

अतः हे जनार्दन आत्मनो योगमैश्वर्यरूपसमाधानं पूर्वमुक्तमपि भूयः पुन
र्वैतत्त्वेन मह्यं कथय तथा विभूतिमैश्वर्यध्यानालंबनभूतां विस्तरेण
मह्यं कथय ननूक्तस्यार्थस्य किं भूयः कथनेनेत्यत आह ह्रियस्मात् ।
मम श्रवणांजुलकाभ्यां त्वद्वाक्यामृतं पिबतस्तृप्तिरलंबुद्धिर्नास्ति [illegible]
[illegible] १८

पंचोलीटीका

तदेवं बहिर्मुखचित्तेन तत्र तत्र विभूतिभेदेन त्वच्चिंत्यैव यथा भ
वेत्तथा विस्तरेण कथयेत्याह विस्तरेणेति हे जनार्दन भूयः
पुनरपि आत्मनो योगं ऐश्वर्यं सामर्थ्यं ध्येयं पदार्थानां विस्ता
रं कथय हि यस्मात्ते मम त्वन्मुखनिःसृतवाक्यामृतं शृण्वतः
तृप्तिर्नास्ति १८

रणवीरसमिद्धोधिनी॥

अथ भगवतो विभूतिमहत्त्वामृतं पिबतोऽर्जुनस्य तृप्तिमसाध
न देतत्काङ्क्षार्थनामाह विस्तरेणेति जनार्दनेति जनैरर्थ्यते
याच्यते इति यत्तत्संबोधने आत्मनो विभूतिमैश्वर्ययोगं सा
मर्थ्यं च भूयो विस्तरेण कथय यद्यपि वर्णनेन वक्तुं न स्यामिति
हि हेतौ यतो भवद्वचनामृतं पिबतो मम तृप्तिर्नास्तीति १८

मधुभाष्य

१८॥

चित्तकी वृत्ति वहिर्मुख होने पर भी उस समै तुमारी विभूतियोंके द्वा
रा जिसप्रकार तुमारा चिंतन होय ऐसी उपाय विस्तार से कहो यह ऋ
र्जुन पूछते हे कितुमारा सर्वज्ञत्व और सर्व शक्तिमत्व ऋादि स्वरूपजोयो
ग का ऐश्वर्य्य और संपूर्ण विभूति जोहै सो सब हे जनार्दन विस्तार सेपु
बार नवीरं कहो क्यों कि ऋापके ऋमृत स्वरूप वचन श्रवणकरते हुये भीमे
रामन तृप्त नहीं होताहै १८ ॥

दोहा

विस्तरसें निजयोगको विभूति जनार्दन मोहि कथन करो
नहि तृप्ति स्रवणहोउं वचामृत कोहि १८ ॥

65

श्रीभगवानुवाच हंततेकथयिष्यामिदिव्याह्या
त्मविभूतयः प्राधान्यतःकुरुश्रेष्ठनास्त्यंतोविस्त
रस्यमे १९ ॥

शंकरभाष्यटीका १

हंततइति हंतेदानींते तव दिव्यादिविभवाआत्मविभूतयः आत्मनोम
म विभूतयोयास्ताःकथयिष्यामीत्येतत् प्राधान्यतोयत्र यत्र प्रधानाया
प्रधानां याविभूतिस्तांतां प्राधान्यतः कथयिष्याम्यहं कुरुश्रेष्ठ अशेषतस्तु वर्षश
तेनापिनशक्याते वक्तुमतोनास्त्यंतोविस्तरस्यमे विभूतीनामित्यर्थः १९

आनंदगिरिकृतटीका २

प्रष्टारंविश्रमयितुं भगवानुक्तवानित्याह श्रीभगवानिति हंतेत्यनु
मतिं आवदति विज्ञासावच्छिन्नं कालं दर्शयति इदानीमिति दिविभव
त्वमप्राकृतत्वमस्मदगोचरत्वं वाक्यानयं द्योतयति यास्ताइति सर्ववि
भूतीनां वक्तव्यत्वप्राप्तावुक्तं यत्रेति किमित्यनवशेषतोविभूतयोनो
च्यंते तत्राह अशेषतस्त्विति नच हेत्वंतरमिति १९ ॥

स्वामिकृतटीका ३

एवंप्रार्थितःसन् श्रीभगवानुवाच हंतेत्यनुकंपासंबोधने दिव्याममया
विभूतयस्ताः प्राधान्येनतेनमुख्यंकथयिष्यामियतः प्रत्येकविभूतिवि
स्तरस्यमदीयस्यांतोनास्तिइत्यतः प्रधानभूताकतिचिद्दर्शयिष्यामि १९

पैशाचभाष्यटीका ४

श्रीभगवानुवाच हंततेप्राधान्यतः प्राधान्यात् १९ ॥

रामानुजभाष्यटीका ५

श्रीभगवानुवाच हंतेतिहंतकुरुश्रेष्ठमदीयाः कल्याणीर्विभूतीः प्रा
धान्येनतेकथयिष्यामिप्राधान्यशब्देनाकर्षोविवक्षितः प्रदेशः सामा
न्यमितिवचनेजगन्नाथ कृष्णः काश्चनविभूतीर्वदामिविस्तरेणावा
क्यश्रोतुंवक्तुंशक्यतेतासामानंत्यात् विभूतित्वंनाम नियाम्यत्वंसर्वेषां
भूतानांब्रह्मादयः इत्यविधाभावामत्यवभवंतीत्युक्ता एताविभू
तिंयोगंचममयोवेत्तितत्त्वतः इतिप्रतिपादनात् तत्रयोगशब्देननिर्दि

श्री॰ हंतत्ववर्त्यंतमितिपुनरप्यहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत इति मत्वा भ
गी॰ टी॰ जंते मां बुधा भावसमन्विता इत्युक्तेनच सर्वभूतानां प्रवर्तनरूपं नियं
द॰ मनमात्मनया वस्थानात् [illegible] ॥

अभिनवगुप्तकृतटीका ६

श्रीभगवानुवाच स्पष्टार्थं हंत ते कथयिष्यामि यत्कांशेन स्थितो जगत् इत्यंतां ;

तत श्रीभगवानुवाच

परमार्थप्रपाटीका ७

उपक्रमते ॥ हंतेति हंतेत्यादरेणानेन भो दिव्या आत्मविभूतयः प्राधान्यतो मुख्या ते
न कथयिष्यामि हि यस्मात्कारणात् भो कुरुश्रेष्ठ मे विस्तरस्यांतो नास्ति १९॥
[illegible] ॥

वनमालीटीका ८

उत्तरमाह हंतेति हंतेत्यनुमतौ यन्मया प्रार्थितं तत्करिष्यामि मा व्या
कुलो भूरित्यर्जुनं समाश्वास्य तद्देवकर्तुमारभते कथयिष्यामि प्राधान्य
तस्ता विभूतीर्या दिव्या हि प्रसिद्धा आत्मनो मम असाधारणा विभूतयः हे
कुरुश्रेष्ठ विस्तरेण कथनमशक्यं यतो नास्त्यंतो विस्तरस्य मे विभूतीनां
अतः प्रधानभूताः कांश्चिदेव विभूतीर्वक्ष्यामीत्यर्थः १९ ॥

कुसुमवैजयंतीटीका ९

एवमर्जुनेन प्रार्थनया प्रसन्नस्तत्सारथिः श्रीभगवानुवाच हंत ते कथ
यिष्यामीति हंतेत्यनुमतौ त्वत्प्रार्थितं सर्वमहं करिष्ये व्याकुलत्वं मा भवेति मा ग
पार्थं समाश्वास्य तद्देवकर्तुमारभत इत्यर्थः हे कुरुश्रेष्ठ या दिव्याः देवस्य
मम असाधारणभूताः आत्मविभूतयः ममैश्वर्यरूपाः सर्वनियामकता द्यु
वाताः प्राधान्यतः प्राधान्येनेत्यनेनोत्कर्षः सूचितः कथयिष्यामि मा
हि भूतीनामसंख्येयः प्रधानभूतास्ता एव वक्ष्यामीत्यर्थः ननु मुख्याः गौ
णाश्च सर्वा एव विभूतीः कथं न वदसीति चेत्तत्राह नास्तीति मे मम नैते
श्वर्यवतः सर्वेश्वरस्य सर्वासां तासां विभूतीनां विस्तरस्यासंख्येयस्या
न्तोऽवधिर्नास्ति अतो नत्वं तस्त्वं तेन वक्तुमशक्यमित्यर्थः १९ ॥

मधुसूदनीटीका १० अत्रोत्तरं श्रीभगवानुवाच ॥

[illegible]

हंतेत्यनुमतौ यत्त्वया प्रार्थितं तत्करिष्यामि मा व्याकुलो भूरित्य
र्थेन समाश्वासयन्देवकर्त्तुमारभते कथयिष्यामि प्राधान्यतस्ता विभू
तीः या दिव्या हि प्रसिद्धाः आत्मनो मम असाधारणा विभूतयः हे कु
रुश्रेष्ठ विस्तरेण तु कथनमशक्यं यतो नास्त्यंतो विस्तरस्य मे विभूती
नां अतः प्रधानभूताः काश्चिदेव विभूतीर्वक्ष्यामीत्यर्थः १९ ॥

सदानंदटीका १९

परमोक्तं दिव्यं पार्थं विश्रमयितुमीश्वरः श्रीकवाननुं समस्तकरु
णानिधिराह हंत हंते त्यनुमतौ तेऽयं यत्त्वया प्रार्थितं किल तत्करि
ष्यामि मा भूस्त्वं व्याकुलोऽनुमतिरिवयं इत्यर्थेन समाश्वासयन्कर्तुमा
रभते हि तत् मम असाधारणा दिव्याः प्रसिद्धा या विभूतयः हे अर्ध
का विस्ताराद्धक्तं नास्त्यंतो विस्तरस्य मे अतः प्रधानभूतास्ता विभूतीः
काश्चिदेव हि तुभ्यं संकथयिष्यामि कुरुश्रेष्ठो यतो भवान् १९ ॥

नीलकंठटीका १९

अथोत्तरं श्रीभगवानुवाच हंतेति हंत इदानीं हंतेत्यनुमतौ वा दिव्याः
पुराणांतरेष्वपि श्रेष्ठत्वेन प्रसिद्धाः या आत्मविभूतयस्ताः कथयामी
ति योजना प्राधान्यत इति योगोपकारित्वेन विभूतयः प्राधान्येन
योगस्तु संक्षेपेणैवोच्यते तस्याग्रे वक्ष्यमाणत्वादिति भावः अन्यथा
योगं विभूतिं च कथयेति पृष्टे विभूतिमात्रकथनेनानवहितचित्तत्वं
भगवतः स्यात् नास्त्यंतो विस्तरस्य मे विभूतीनामिति विपरिणामे
नानुषंजनीयं १९ ॥

ज्ञानेश्वरीटीका

दिव्यां मानुषीं बुद्धिमतिक्रांताः तत्र यावत्प्रथमां पद्मात्मस्वरूपां पर
मां विभूतिमाह १९

तथैवमभ्यर्थितो भगवानुवाच ॥ रामकंठीटीका

हंत अभ्युपगमे वाढं यथा पृष्टा याचिताः शुभाः स्वविभूतीस्तुभ्यं वक्ष्यामि
किंतु प्राधान्येन चेतनाचेतनपदार्थेषु पर्यंततत्वर्गभेदविभेदितेषु यत्र यत्र

गी· वर्गेयायाकाचित्तथानत्वादृतिशापिनीविभूतिस्तांतांवक्ष्यामि यतो
टी ट· महिभूतीनांविस्तरस्यवितन्तत्स्यांतोनिष्टानविद्यते नत्वेदानींनाना
विभूतिकथनप्रस्तावनस्यांतेप्यभिधायिष्यमाणांपरमार्थस्वरूपलक्ष
णांपरांविभूतिंतावत्प्रथममेवप्रतिपादयितुमाह १९ ॥

67 अथैवंविज्ञप्तःश्रीभगवानुवाच ॥ लासिकीव[illegible]टीका

हंतेत्यभ्युपगमेवाढमित्यर्थे हेकुरुश्रेष्ठयाविभूतयोदिव्यास्त्वयाशु
श्रुषितास्तास्तुभ्यंवाढंकथयिष्यामि किंतुप्राधान्येन यतोमहि
भूतीनांविस्तरस्यांतोनविद्यते अतःप्रधानभूताःकाश्चिद्विभूती
र्वक्ष्यामीत्यर्थः यस्यसर्वैश्वर्यरूपव्याप्तिस्वेतस्मिनोपारोहतितांव
जिज्ञासति तेप्रत्ययंविभूतियोगोपदेशः येनतैलविंदुविस्तारणा
वस्थनकैःसर्वत्रव्याप्तिमुपलभंते येश्वरयोगस्यविभूतिसमुत्था॰
येनष्टष्टस्याप्येकादशोध्यायेप्रापयिष्यमाणत्वादिहकेवलोविभू॰
त्युपदेशापवादीकृतोभगवता[illegible]
[illegible]यति १८

पंचोलीटीका

एवंप्रार्थितःसन्श्रीभगवानुवाच हंततइतिहेकुरुश्रेष्ठहं
तइदानींतेदिविभवाःदिव्याआत्मविभूतयःआत्मनोममसा
हात्म्यविस्तारःप्राधान्यतःकथयिष्यामिमेममविस्तारस्यअं
तोनास्ति १९

रसावीरसमिह्लोथिनी ॥

प्रष्टारमर्जुनमुपदिशन्भगवानुवाच हंतेति हंतदर्शेनुकं
पायांवाक्यारंभविषादयोरित्यनुशासनाद्धंतशब्दोत्रहर्षादिषु
दिव्या अपूर्वदृष्टा अप्राकृताविभूतयस्तत्रापिप्राधान्येयास्ताविः
भूतीस्तेकथयिष्यामि अत्रकुरुश्रेष्ठेति संबोधनपदंकुरुषन्

कंपितताद्योतनार्थं दिव्याविभूतयोममसर्वैरपि विस्तरेणमयापि
पूर्वार्धेसंग्रहेणश्रुताइति तत्रनकुतो किमाश्चर्यमित्याशंक्या
ह नास्तीति यतोममविस्तरस्यविभूतिप्रतानस्यांतोमर्यादानास्ति
तोनपुनर्वचने किंतु तासुचप्राधान्येनयाविशिष्टाविभूतयस्ता·
हितरेभ्युताप्राधान्यतः कथ्यतेइति त्वद्विषयामदनुकंपानान्य
विषयेति संबोधनपदेनद्योत्यतेइति १९॥

मधुभाष्य

१९॥

67/2

भाषाअनुवाद टीका १९

जब अर्जुन ने ऐसी प्रार्थना किया तब भगवान कहते है कि हे कुरुश्रे
ष्ठ अर्जुन मेरी जो दिव्य विभूतीहै सोतुमको अच्छी प्रकारसे कहूं गाऔ
रविस्तार सेकहने को तोमेरी विभूतियों का अंतः [illegible]
[illegible] नही है इससे प्रधान [illegible] जोहै सो
सबकहूंगा १९॥

दोहा

और कहिन हों तोहि निज दिव्य विभूति जोय कुरुश्रेष्ठ याया
न मम अंत न विस्तर कोय १९॥

68

अहमात्मा गुडाकेश सर्वभूताशयस्थितः
अहमादिश्च मध्यं च भूतानामन्त एव च २०

शांकरभाष्यटीका १

तत्र प्रथममेव तावच्छृणु अहमिति अहमात्मा प्रत्यगात्मा गुडा
केश गुडाका निद्रा तस्या ईशो गुडाकेशो जितनिद्र इत्यर्थः घनकेश इ
ति वा सर्वेषां भूतानां आशयेन्तर्हृदि स्थितोहमात्मा प्रत्यगात्मा नि
त्यं ध्येयस्तदशक्तेन चोत्तरेषु भावेषु चिंत्योहं चिंतयितुं शक्यः यस्मा
दहमेवादि[illegible]भूतानां कारणं तथा मध्यंच स्थितिरंतः प्रलयश्च एवंच
ध्येयोहं २०॥

आनंदगिरिकृतटीका २

विभूतिप्रदर्शने प्रस्तुते सत्यादावेव पारमार्थिकं पारमेश्वरं रूपं दर्श
यितुं श्रीतरर्जुनस्य मनःसमाधानार्थं प्रदर्श्यते तत्रेति सोपाधिक
मपि काल्पनिकं परस्य रूपं पश्चाद्वक्ष्यमाणं आतस्थितसमाधानंच
कर्तव्यमेवेत्याह तावदिति आशेरतेस्मिन् विद्याकर्मपूर्वप्रज्ञा इत्या
शयो हृदयं सर्वेषां भूतानां हृदयेन्तःस्थितो यः प्रत्यगात्मा सोहमेवे
ति वाक्यार्थमाह सर्वेषामिति यस्तु मंदो मध्यमो वा परमात्मानमात्म
त्वेन ध्यातुं नालं तं प्रत्याह तदशक्तेनेति वक्ष्यमाणादित्यादिषु परस्य
न ध्येयत्वमन्यदेव कारणं किंचित्तत्र तत्र ध्येयमित्याशंक्याह यस्मादि
ति सर्वकारणत्वेन सर्वज्ञत्वेन सर्वेश्वरत्वेन च परस्य ध्येयत्वमंत्रेपि त
न्नान्यस्य कस्यचित् कारणस्यादित्यादिषु ध्येयतेत्यर्थः उक्तध्यानाशक्ते
र्ध्यावक्तव्यं विभूतियोगमुपदिशति एवंचेति तत्र तत्र प्रधानत्वेन प
रस्य ध्येयत्वं २०॥

स्वामिकृतटीका ३

तत्र प्रथममैश्वरं रूपं कथयति अहमिति हेगुडाकेश सर्वेषां भूतानामा
शयेष्वंतः करणेषु सर्वज्ञत्वादिगुणैर्नियंतृत्वेनावस्थितः परमात्माहं
आदिर्जन्म मध्यं स्थितिः अंतः संहारः सर्वभूतानां जन्मादिहेतुश्चाह
मित्यर्थः २०॥

पिशाचभाष्यटीका ४

श्री॰ अहमात्मेति गुडाः पिंडीकृताः केशा यस्य गुडाकेशः सर्वाणि भूता
गी॰टी॰ न्याशयो यस्य स सर्वभूताशयः २० ॥
द॰ ^इममर्थं योगशब्दनिर्दिष्टंस रामानुजभाष्यटीका ५ र्वस्य स्वमूलत्वं पालयितृत्वं संहर्तृत्वं चेति
सप्रपञ्चमाह ॥^ अहमिति सर्वेषां भूतानां मम शरीरभूतानाम् आशये हृदये अहमात्म
तयाऽवस्थितः आत्मा हि नाम शरीरस्य सर्वात्मना आधारो नियन्ता
शेषी च तथा च वक्ष्यते सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञान
मपोहनं च ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूता
नि यन्त्रारूढानि मायया इति श्रूयते च यः सर्वेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्त
रो यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि
भूतान्यन्तरो यमयति एष त आत्मान्तर्याम्यमृतः इति स त आत्मान्त
र्याम्यमृत इति च एवं सर्वभूतानामात्मतयावस्थितोऽहं तेषामादिर्मध्यं
तश्च तेषामुत्पत्तिस्थितिप्रलयहेतुरित्यर्थः एवं भगवतः स्वविभूतिभू
तेषु सर्वेषामात्मतयावस्थानेनैवं तत्तच्छब्दसामानाधिकरण्यनिर्देशहेतुं
प्रतिपाद्य विभूतिविशेषान् सामानाधिकरण्येन व्यपदिशति भगवा
नात्मतयावस्थिते हि सर्वे शब्दास्तस्मिन्नेव पर्यवस्यन्ति यथा देवमनुष्य
पक्षिवृक्षादयः शब्दाः शरीराणि प्रतिपाद्य तत्तदात्मनि पर्यवस्य
न्ति तथा भगवतस्तदात्मतयावस्थानमेव तत्तच्छब्दसामानाधिकरण्य
निबंधनमिति विभूत्युपसंहारे वक्ष्यते न तदस्ति विना यत्स्यान्म
या भूतं चराचरं सर्वेषां तेन विनाभाववचनात् अविनाभावश्च नियाम्य
तयेति मत्तः सर्वं प्रवर्तत इत्युपक्रम उदितं २० ॥
अभिनवगुप्तकृतटीका ६
स्पष्टार्थं २० ॥ ॥ ॥ ॥
अथ विभूतिरूपेण तावत् कीदृक् त्वं परमार्थप्रपाटीका ७ लक्षितं स्वरूपमाह ॥
अहमिति समासेन भो गुडाकेश जितनिद्र अनतिव्याप्तोऽहमात्मा
हिरण्यगर्भो यजीव्यः किंभूतः सर्वभूताशयस्थितः सर्वाणि महाभूता
नि विशन्ते यस्मिन्निति सर्वभूतो विराट् तदाशयेष्वनु लिंगदेहरूपेणास्थि
तः अतस्यनाभावश्चैकमर्पितमित्यादि श्रुतयः आम्नुरूपिताएव अथ

तदेवाह अहमेव भूतानामादिर्मध्यञ्चान्तश्च मध्येव भूतानां जन्मस्थि
तिलयाः सलिलेतरंगाणामिव भवंति [illegible] २० ॥

वनमालीटीका ८

तत्र तावद्ध्यानमात्यधिकारिणां मुख्यं चिंतनीयं शृणु अहमिति सर्वभूता
नामाशये हृदेशेऽन्तर्यामिरूपेण स्थितोऽहं सर्वेश्वरो वासुदेवश्चिन्त्यः अहमे
वादिश्चोत्पत्तिहेतुर्भूतानां अन्तश्च नाशकः मध्यं चेतनवर्गाणामुत्पत्ति
स्थितिनाशकर्तृत्वेनाहमेव मध्ये स्थितश्चेत्यर्थः २० ॥

कुसुमवैजयंतीटीका ९

एवं स्वविभूतिवक्तुं प्रतिज्ञायेदानीं स्वस्य सर्वात्मत्वविभूतिश्चात्मत्वेनाव
स्थानेन तत्स्रष्ट्रादेः कारणत्वेनाह अहमात्मेति हे गुडाकेश जितनिद्र स
र्वभूताशयस्थितात्मसर्वेषामदात्मीयरूपाणां भूतानां चेतनाचेतनात्मका
नां महद्भूतिभूतानामाशये हृदये स्थितोऽयमात्मा तदात्मतयावस्थितस्य
आत्माहमेवाहमर्थाभिन्नरूपः संप्रज्ञातमानं देहलेत्यादिश्रुतिगतश
ब्दवाच्यस्तन्मात्रलेपो वासुदेवः कस्य एव आत्मत्वेनामनमदाधारत्वे सति
तन्नियामकत्वे सतिजीवस्थितिप्रवृत्तिहेतुत्वे स्वतंत्रसत्ताश्रयत्वाभिन्नत्वं
भिन्नाभिन्नात्मत्वस्य लक्षणेन तदर्थे यत्नत्नियम्यत्वतद्व्याप्यपरतंत्रसत्ता
श्रयत्वाधाराधारेयौ स्वयमेवाप्तश्चेतनाचेतनात्मकं जगद्ब्रह्मणः सकाशात्स्व
रूपेणाभिन्नमपि आधारत्वनियंतृत्वव्यापकत्वस्वतंत्रत्वादिधर्मैर्भिन्नलक्षणमि
भ्योऽपृथक्सिद्धमेवेदं नोब्रह्माभिन्नाभिन्नविषयं भवतीति भगवतोऽभिप्रा
यस्तृचितः एवं स्वस्य सर्वभूताशयावस्थानेन सर्वात्मत्वमभिप्रायेदानीं
सृष्ट्यादिकर्तृत्वेनापि सर्वात्मतामाह अहमादिरिति भूतानां महद्भू
तिरूपाणां ब्रह्मादिस्थावरांतानामहमादिः सृष्टिकर्ता निमित्ताभिन्नो
पादानकारणमहमेवेत्यर्थः अहं सर्वस्य प्रभवश्चेत्युक्तत्वात् तथा सर्वे
षां भूतानामहं मध्ये पालनकर्ता च तथा सर्वेषां भूतानामहमंतः संहा
रकर्ता जन्माद्यस्य यतो यतो वा इमानि अहं सर्वस्य जगतः प्रभवः प्रलय
१०४ रुद्ररूपो सृष्टिसंहारकर्तृत्वेनारायणेश्चरूपस्यममैवाधीनेन ततत्वात् तमस्य प्र
केयत्नस्त्वयोरपि सजन्मान्तश्चावतानस्थाच्छ्रुतयः नारायणाद्ब्रह्माजाय

श्री· गी· टी· द·

नेनारायणाद्रुद्रो जायते यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहि-
णोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इत्या-
द्युश्रुतिसूचितं चकारेण कालकर्मस्वभावं सूचितम् २० ॥

मधुसूदनीटीका १

तत्र प्रथमं तावन्मुख्यं चिंतनीयं शृणु

सर्वभूतानामाशये हृद्देशेऽन्तर्यामिरूपेण प्रत्यगात्मरूपेण च
स्थितस्त्वात्मा चैतन्यानंदघनस्त्वया हं वासुदेव एवेति ध्येयः हे गुडा-
केशगुडाकानिद्रातस्या ईशो जितनिद्रियः हे जितनिद्रियेति ध्यान-
सामर्थ्यं सूचयति एवं ध्यानासामर्थ्ये तु वक्ष्यमाणानि ध्यानानि का-
र्याणि तत्राद्यादौ ध्येयं जितनिद्रियः हे जितनिद्रियेति ध्यानसाम-
र्थ्यं सूचयति एवं ध्यानासामर्थ्ये तु वक्ष्यमाणानि ध्यानानि कार्याणि
तत्राद्यादौ ध्येयमाह अहमादिश्चोत्पत्तिर्भूतानां प्राणिनां चेतनचे-
तनलोकैकश्च वहिर्माणानां मध्यं च स्थितिः अन्तश्च नाशः सर्वचेतन-
वर्गाणामुत्पत्तिस्थितिनाशरूपेणानंतकारणरूपेण वाहमेव ध्येय
इत्यर्थः [illegible]
२० ॥

सदानंदीटीका १

तत्रादौ चिंतनीयं यत्स्वं तत्तावच्छृणु हृद्देशे सर्वभूतानामंतर्या-
मितया स्थितः अप्रगात्मात्मना चैव परानंदघनोऽच्युतः स एव वा-
सुदेवोऽहं ध्येयो नित्यप्रमाजिता २ चेतनानां समस्तानामपत्तेर्हजन्म-
कारणं मध्यस्थितिर्लयोऽनेच मत्तो भिन्नं न किंचन सर्वचेतनवर्गा-
णां जनिस्थितिलयात्मना तत्कारणात्मना वाहमेव ध्येय इतीरितः
२० ॥

नीलकंठीटीका १

संक्षेपेण योगमाह अहमिति हे गुडाकेश हे जितनिद्र घनकेशेतिवा आ-
त्मा वासुदेव आत्मा अतनीत्यात्मा व्यापकः अत एव सर्वेषां भूतानामाशयः प-
कीभावस्थानं जलानामिव कासारो जलाशयस्तद्वदहं सर्वभूताशयः स्थि-
तः अचलः एवंपरे शरि वा विसर्गलोपो वक्तव्य इति वार्तिकेन पक्षे विसर्गलोपः
भाष्ये तु सर्वेषां भूतानामाशये हृदि स्थित इति व्याख्यातं सर्वभूताशयत्वादे-
व अहमादिः जन्मकारणं मध्यं स्थितिकारणं भूतानामंतः लयस्थानं सर्व-
मिदं ब्रह्मांडमहमेवास्मीति भावः २० ॥

आनंदीटीका

सर्वेषांभूतानांचेतनाचेतनानामाशयेहृदिसर्वज्ञोंतर्यामित्वेनस्थितः
एवंपरांविभूतिंयोगिध्येयामुक्त्वास्थूलामाह २०॥

रामकंठीटीका

सर्वेषांचेतनानामाशयेहृदिस्थितःकृतप्रतिष्ठआत्माहंसकलचेत्र
नत्वृद्याभिव्यक्तसामान्यसंविद्रूपएकएवपरमार्थतआत्मासैवपरा
विभूतिर्यतःस्तत्रैवचतत्पवायेस्वमायाशक्तिप्रकाशितविश्वभावा
त्मकनानाविभूतिप्रपंचस्वरूपतयाचिंतितोहमनंतविभूतिविस्तरैक
कारणतयात्तातोभवामि यतः सर्वभूतानामादिःप्रागवस्थासर्गरू
पांतस्वनाशावस्थामध्येचस्थितावस्थाहमेवैकोयतोमत्तःयावशान्त
गोस्थितिविनाशावस्थायोगित्वेनपरस्परमवभासमानेषुसर्वभूतेषु
नित्यनिर्विशेषैकचिन्मात्रस्वभावोहमेवस्थितः येस्तुताद्दृशामहा
यामस्यांचिंतयितुमशक्तास्तैस्तदपिरमाभ्यासाययद्यत्रयत्रवर्गेयद्य
त्रकृष्टंतत्तन्मद्विभूतेमातयाचिंतयद्भिर्निकृत्तरामसर्वव्यापिनीसामा
न्यसंविदात्मिकापरामदीयाविभूतिरधिगंतुंशक्यते यांनानाविभूति
प्रतिपादनप्रकरणस्यांतेपिसामान्यरूपजडांशव्यतिरेकिणींविष्टभ्या
हमिदंकृत्स्नमेकांशेनस्थितोजगदितिवक्ष्यति तदेवंविधेचतुर्दशवि
धेभूतसर्गप्रपंचेएषविधायोदेवयोन्यामादित्यादिषुदेवादिसर्गेषुषड्
धायांमनुष्यादियोनौमनुष्यादिसर्गेषुयद्यदुत्कृष्टंतत्तन्मदीयपरम
प्रकाशलेशतयाभावयतानिकृष्टप्रकर्षासामान्यसंविन्मकाशम
यीपरामद्विभूतिरधिगंतव्येत्यभ्यासतात्पर्यतानिदानीमुत्कृष्टान्वा
न्वविभूत्यंशानहंतयाप्रतिपादयितुमाह २०॥

तत्रतावदीश्वररूपाधिगमसौलभ्यसिद्धौ [illegible]टीका ध्यानभूतानांविभूतीनांमध्यात्प्रथमोपायभूतांपरांविभू
तिंकथयति॥

हेगुडाकेश अहमीश्वरःसर्वेषांचतुर्दशविधानांभूतानांप्राणिनामा
शयेहृदयेप्रत्यगात्मतयासामान्यसंविद्रूपात्मलक्षणाविभूत्याभिन्नः
स्थितः अप्रच्युतस्वातंत्र्यतयाहंस्थितः ननुभूतानामाशयस्थित १

इतिसंबन्धः षष्ठाभूतास्वविलक्षणानिवप्रतीयंतेऽतस्तत्रआह अह
मादिरिति अहमीश्वरोभूतानांजीवानामादिश्च जीवत्वरूपेणविव
तेलक्षणोकार्यकारणभूतः तथामध्यंचजीवत्वम् तथांतश्चजी
वत्वावसानभूतोमोक्षरूपः शुक्तिकेवरजतायाःस्वस्य अतोनन्तेम
त्तोभिन्नः एवमात्मरूपायाःपरस्याविभूतेर्लाभेसत्यन्याअपिविभूत
यः क्रमेणसर्वत्रव्याप्तिकारणभूताअपिगणेनुशाकाने इत्यतः पूर्वमि
यमेवध्येयत्वेनोदिष्टा किंचयथात्माशयस्थितस्यममानुचिंतनाभ्या
सतारतम्येनभूतेष्वात्मतयाभिव्याप्तिर्भवति यतः पूर्वमप्युक्तम्
फंजनेवमिति सर्वभूतस्थमात्मानमित्यादि एवंचसमात्माख्यवि
भूतिषुप्रथमोक्तपदार्थजाताचिंतनेनतद्व्यंतेषुपदार्थजातेष्वभि
व्याप्तिर्भवतीतिबोध्यम् उक्तेप्रश्नावसरे याभिर्विभूतिभिर्लोकानिमां
स्त्वंव्याप्यतिष्ठसीति [illegible] २० ॥ ॥

पंचोलीटीका

तत्रप्रथममैश्वरंरूपंकथयति अहमिति हेगुडाकेश सर्वभूता
शयः सर्वेषांभूतानामंतर्हृदिस्थितोआत्माजीवात्मनोअहंचपुन
भूतानामादिर्मध्यमंतएवचाहं २०

रमावीरसमिहोयिनी ॥

तत्रतावत्परांविभूतिमाह अहमात्मेति अयगुडाकेशेतिसंबोधन
पदंसर्वज्ञतासूचनार्थमहंहिसर्वभूताशयस्थितःसर्वभूतानां
सर्वप्राणिनांआशयोऽभिमतार्थस्तत्रतिष्ठतीतियोहृदयगूढत्वेनोपा
स्तितस्यतद्भवफलंसंपादयसीत्यर्थः ननुस्वोपासकोपासनायां
तदाशयोद्भवनंभवतीत्यतआहआत्मेति आत्मा अततिसातत्यगमन
इतिधातोःसततगामीत्यंतर्यामितयातदाशयानहुलफलोद्भ
वक इत्यहमेवभूतानामादिर्मध्यमंतश्चस्वयंत्वनंतयानादित्वादि
तिभावः २० ॥

मधुमाधव

२०॥

7/2

अब प्रथम ईश्वर स्वरूप कहते है कि हे गुडाकेश जितनिद्र अर्जुन परमात्मारूपमें तावत भूतमात्र के अंतःकरणमें सर्वज्ञत्व आदि गुणोसे नियंतारूपस्थित हो और आदि मध्य अंत कहे सर्वभूतोंके सृष्टिस्थिति संहारका हेतु भीमै ही हो यहजानो गुडाका निद्राको कहते हे अथवागुडा कहे गुडविषाले ऊंघराले हे केशजिसके सोगुडाकेशहे २० ॥

दोहा

गुडाकेश में आत्महों सर्वप्राणि हृदिवास आदी मध्य सम भूतकों में हिं हों पुन नास २० ॥

72

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१

शांकरभाष्यटीका १

आदित्यानामिति आदित्यानां द्वादशानां विष्णुर्नामादित्योऽहं ज्यो
तिषां रविः अंशुमान् प्रकाशयितॄणामंशुमान् रश्मिमान् मरीचिर्ना
म मरुतां मरुद्देवताभेदानां अस्मि नक्षत्राणामहं शशी चंद्रमाः २१

आनंदगिरिकृतटीका २

एवं शाब्दार्थमेव दर्शयति आदित्यानामित्यादिना २१ ॥

स्वामिकृतटीका ३

इदानीं विभूतीः कथयति आदित्यानामित्यादिना यावदध्यायसमा
प्ति आदित्यानां द्वादशानां मध्ये विष्णुरहं वामनोऽहं ज्योतिषां प्रकाशा
कानां मध्येंऽशुमान् विश्वव्यापिरश्मियुक्तो रविः सूर्योऽहं मरुतां वायूनां म
ध्ये मरीचिर्नामाहमस्मि यद्वा सप्तमरुद्गणा देवविशेषास्तेषां मध्ये इति
नक्षत्राणां मध्ये चंद्रोऽहं अत्र चादित्यानामहं विष्णुरित्यादिषु प्रायशो नि
र्धारणे षष्ठी क्वचिच्च भूतानामस्मि चेतनेत्यादिषु संबंधे षष्ठी तत्र तत्रैव द
र्शयिष्यामः विष्णुरित्यादिष्ववतारेष्वपि प्रभावातिशयमात्रविवक्षया
विभूतित्वेन निर्दिश्यते अतः परं चाध्यायसमाप्तिपर्यंतमपि किंचि
द्व्याख्यास्यामः २१ ॥

पिशाचभाष्यटीका ४

आदित्यानामिति द्वादशादित्यानां मध्ये विष्णुरहं तेजसां मध्ये रविरहं
मरुतां देवानां मध्ये मरीचिरहं नक्षत्राणां मध्ये शशिनो निर्धारणं अहं शशी ननु नक्षत्राणां मध्ये
नोपपद्यते तस्मान्नक्षत्ररूपत्वाभावेन देवं शशी च नक्षत्रमेव कथमिह
प्राप्तः फलभोगार्थं स्वर्लोकं नक्षत्रं तेन गच्छतीति नक्षत्रं तथा हि श्रु
तिः यो वा इह यजमानः स्वर्लोकं नक्षत्रेण नक्षत्राणां नक्षत्रमिति २१ न्ना

रामानुजभाष्यटीका ५

आदित्यानामिति द्वादशसंख्यानां द्वादशोपयुक्तकोऽपि विष्णुर्नामा

श्री॰ गी॰ टी॰ द॰

73

दित्यः सोऽहं ज्योतिषां जगति प्रकाशकानां योंऽशुमान् रविरादित्यः सोऽहम
रुतामष्टमरुद्गणानां यो मरीचिः सोऽहमस्मि नक्षत्राणामहं शशीनेये निर्द्धारणे
षष्ठी नक्षत्राणां पतिर्यश्चन्द्रः सोऽहमस्मि २१ ॥

अभिनवगुप्तकृतटीका ८

स्पष्टार्थः २१ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

आदित्यानां देवानामपि आदित्याख्यभेदाः सप्ताश्वस्य मरीचेः यतोऽहं विसर्ज्जा
पनशीलः मय्येव समष्टिरूपेण देवा अपि सवहंतीत्यर्थः यद्वा सर्वादि
अनुशासनात् भूतवाची श्रुतिसिद्धेन सर्वेषामादिभूतानि तान्यादिभूतानि
महदादीनि तेषामादित्यानां व्यापनशीलो विष्णुर्वैकुंठवास्यहमस्मीति
सकोपसगुणं स्वरूपान्तरं प्रकटीकृतं श्रुतिश्च अहं रुद्रेभिर्वसुभिश्च
राम्यहमादित्यैरुत विश्वदेवैः अहं मित्रावरुणोभाविभर्म्यहमिंद्राग्नी
अहमश्विनोभेति भाष्यं अत्र सर्वानुक्रमस्त्वावत् अहमित्यष्टर्चस्य सूक्त
स्याम्भृणस्य महर्षेर्दुहिता वाक्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौषीत् अ
तः स ऋषिः सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता अनेन ह्यृषि
षाता तादात्म्यमनुभवन्ती सर्वस्याधिष्ठानत्वेनात्मानं स्तौतीति तत्राप्याह मा॰
रुद्रेभिरिति अहं ब्रह्मस्वरूपा रुद्रेभिः रुद्रैरेकादशभिश्चरामि तथा वसुभि
रष्टभिश्चरामि अहंभावेन तत्तदात्मना चरामि तथा आदित्यैर्द्वाद
शभिर्विश्वैर्देवैश्च अथानर्थामित्वेनापि चरामीत्याह अहमिति मित्रा
वरुणा मित्रवरुणाश्चेति द्विवचनस्याऽऽछंदसीति द्वितीयाया आकारः
परिभाषायामपि यस्याकारो द्विवचने क्वचिदभूदिति यथाह्वा विभवह्वा
विभ्यानेन्यत्र बिभ्याउभौ मित्रावरुणौ विद्वान्विभर्मि अथ विभूतीर्व
र्णयन् प्रसङ्गाद्देवरूपिणीर्विभूतिर्दर्शयति ज्योतिषामिति ज्योतिषां
तेजसा पदार्थानामग्न्यादीनां मध्ये अंशुमान् स्वकरप्रकाशेन त्रिलोकीप्र
काशको रविः सूर्योऽहं पूर्वमादित्यरूपः सोऽसावहमिति श्रुतेः मरु
तां मरुद्गणानां देवविशेषाणां मध्ये मरीचिरहं तथा नक्षत्राणां तारकाणां
मध्ये शशी चन्द्रोऽहं २१ ॥

वनमालीटीका ८

एतादृशः सर्वान्तर्यामित्वव्यापकत्वादिना ध्यानासामर्थ्ये केचित्केचिद्
ब्बाह्यध्यानानि कार्याणीत्याह यावदध्यायसमाप्ति आदित्यानां द्वादशा
नां मध्ये विष्णुर्नामकोऽहं ज्योतिषां प्रकाशकानां मध्ये अंशुमानहं मरुतां सप्तस
प्तकानां मध्ये मरीचिरहं नक्षत्राणां मध्येऽहं शशीति निर्धारणे षष्ठी क्वचित्स
म्बन्धे यथा भूतानामस्मि चेतनेत्यादौ वामनादयश्चावताराः सर्वैश्वर्यशा
लिनो ह्यनेन रूपेण ध्यानविवक्षया विभूतिषु पठ्यंते हसीनां वासुदेवोऽस्मी
त्यनेन रूपेण ध्यानविवक्षया स्वस्यापि स्वविभूतिमध्ये पाठवत् २१ ॥

कृष्णवैजयंतीटीका ९

एवं स्वस्य सर्वसामानाधिकरण्येन सर्वकारणत्वं च प्रतिपाद्येदानीं सर्ववि
यास्यत्वं दर्शयन्विभूतीः संकथयति आदित्यानामिति आदित्यानामदि
तिपुत्राणां द्वादशानां मध्ये यो विष्णुर्वामननामादित्यः सोऽहमस्मि ज्यो
तिषां जगति प्रकाशकानां मध्ये योऽंशुमान् विश्वव्यापिरश्मिवान् रविः
सूर्यो नामादित्यः सोऽहमस्मि मरुतां मरुद्गणानां देवविशेषाणां मध्ये म
रीचिनामा देवोऽहमस्मि यद्वा मरुन्नामकानां पंचाशद्वायूनां मध्ये मरीचि
नामा वायुरहमस्मि नक्षत्राणामनुगणानां मध्ये योऽमृतवर्षी शशी चंद्रः
सोऽहमस्मि अत्र सर्वत्र षष्ठी निर्धारणे शशिनो नक्षत्राधिपतित्वात् प
वं क्वचिन्निर्धारणे क्वचित्संबंधे षष्ठी ध्यानविनियोगस्तु तत्र तत्रैव वक्ष्यामि
२१ ॥

मधुसूदनीटीका १०

+ आदित्यानां द्वादशानां मध्ये विष्णुर्नाम आदित्योऽहं वामनावतारो वा ज्यो
तिषां प्रकाशानां मध्ये रविरंशुमान् विश्वव्यापिप्रकाशः मरुतां सप्त
सप्तानां मध्ये मरीचिनामाहं नक्षत्राणामधिपतिरहं शशी चंद्रमाः नि
र्धारणे षष्ठी अत्र प्रायेण निर्धारणे षष्ठी क्वचित्तु संबंधे यथा भूतानाम
स्मि चेतनेत्यादौ वामनरामादयश्चावताराः सर्वैश्वर्यशालिनोऽप्यनेन रू
पेण ध्यानविवक्षया विभूतिषु पठ्यंते हसीनां वासुदेवोऽस्मीत्यनेन रूपे
ण ध्यानविवक्षया स्वस्यापि स्वविभूतिमध्ये पाठवत् अतः पंचप्रायेण
यमध्यायः स्पष्टार्थ इति क्वचित्क्वचिद्व्याख्यास्यामः २१ ॥

+ एतदशक्तेन बाह्यानि ध्यानानि कार्याणीत्याह यावदध्यायसमाप्ति ॥

सदानंदीटीका ११

तत्र शास्त्रैर्बुद्धेर्विभूतीनां योगेषु तांश्च वदाम्यहं आदित्यानां द्वादशानां मध्येऽहं वि।

श्री·
गी· टी·
१०·

स्तु संज्ञितः आदित्यो वामनो वास्मि षष्ठी निर्धारणे विलासग्रन्थायेणास
बंधे कश्चिद्देवेति संग्रहः २ रश्मादयो वन्तारा स्तु समस्तो सर्वभ्यशालिनः
तेन तेन स्वरूपेणाध्यत्राध्यानविवक्षया स्वयमेवांशुमाः साक्षात्प्रदीते ने
विभूतिषु ३ हलीनां वासुदेवोस्मीत्यत्र स्वस्यापि शार्ङ्गिणः ४ श्रीविलो
कतुर्द्धपाणां समर्थानविवक्षया दर्शिन न्नानन्थवाग्रवस्तेन नमतयच
५ प्रकाशकानां मध्येऽहं रविर्विश्वप्रकाशकः मरुतां सप्तसप्तानां मरी
चिर्नामतोस्म्यहं ६ नक्षत्राधिपतिश्चंद्रो नक्षत्राणामहं हरिः ७ २१

नीलकंठीटीका १२

योगस्तु कर्कविभूतीराह आदित्यानामित्यादिना यावदध्यायसमाप्ति ।
आदित्यानां द्वादशानां मध्ये विष्णुर्नामादित्योऽहं वामनावतारो वा ज्यो
तिषां रश्मीनां मध्ये रविः अंशुमान् अंशवस्तप्तपनशीलानि दायमथा
न्हेनीद्यान्तपवान्रविरहमेवस्थः मरुतां सप्तसप्तकानां मध्ये मरीचिरा
हं नक्षत्राणां तारकाणां अत्र आयेणा निर्धारणे षष्ठी भूतानामस्मि चेतनेत्या
दौ संबंधेऽपि षष्ठी चंद्रमाः २१ ॥

आनंदीटीका

आदित्यानामदितेः पुत्राणां मध्ये विष्णुस्त्रिविक्रमः द्वादशानां सूर्या।
णां मध्याद्दिम्ननामा सूर्यश्च सर्वत्र निर्धारणे षष्ठी २१

रामकंठीटीका

आदित्यापत्यत्वात्सर्वदेवानामादित्यत्वे प्रसिद्धेऽपि द्वादशसंख्यावच्छि
न्नपुराणपठितधातृमित्रार्यमादित्यजातीदेवविशेषसर्गे आदित्य
संज्ञाप्रसिद्धा तेषां मध्ये तृतीयांतः पठितो विष्णुस्तेन आदित्योऽहम्
तस्य जगत्स्थितिपालनलक्षणप्रभावातिशययोगात्मद्विभूतित्व
श्रवणम् तथा ज्योतिषां दीप्तिमतां सर्वतेजसां मध्ये रविरंशु
भा २ मान् अहं कीदृशोऽहं अंशुमान् सकलभुवनप्रकाशनादिशक्तिसंपन्नो बहुरश्मि।
तिप्रकृष्टैरंशुभिर्युक्तः अत एव तस्य मद्विभूतिश्रवणम् तथा मरुतां
देवविशेषाणामेकोनपंचाशतां मध्ये मरीचिर्नामा मरुदहम् तस्य त
न्मध्ये प्रजासर्गकर्तृत्वलक्षणप्रभावयोगात्मद्विभूतित्वश्रवणम् तथा न
क्षत्राणामष्टाविंशतिसंख्यानां मध्ये शशी चंद्रमा अहं शशिनो नक्षत्रना
थत्वात्तन्मध्ये गणने तस्याप्यायनहेतुत्वादिसामर्थ्ययोगान्मद्विभू

74

तंशतं तथैवदर्श्यानप्याह २१ ॥

अथान्या अपिविभूतीः कथयति ॥ लासिकी[illegible]टीका

आदित्यानामुपास्यानाममराणांव्याप्तिहेतुरहमीश्वरोविष्णुःस्थिति हेतुःकारणंविभूतित्वेनस्थितः एवमग्रेऽवबोध्यम् तथाज्योतिषांप्रकाशानांज्योतिष्व्याप्तिहेतूरंशुमान्विश्वव्यापिरश्मिभृद्धोरविः सूर्योहं नत्ततन्मंडलाधिष्टातादेवता मरुतांकालचक्रप्रवर्तकानामावहादीनामर्जुनवायूनांमरीचिर्नामवायुरहम् नत्तत्राणांशशीचंद्रमाअहं २१ ॥

पंचोलीटीका

इदानींअध्यायसमाप्तेविभूतिंकथयति आदित्यानामिति आदित्यानांद्वादशादित्यानांमध्येविष्णुर्नामाआदित्योहंज्योतिषांप्रकाशयितॄणांमध्येअंशुमान् रश्मिवान्रविः अहंमरुतामेकोनपंचाशद्वायूनांमध्येमरीचिर्नामावायुरहंनक्षत्राणांमध्येशशीचंद्रमाअहं २१

रसावीरसमिहोधिनी ॥

इदानींताविभूतीःप्राधान्यतोविशिनष्टि आदित्यानामित्यादि आदित्यानांविशिष्टतेजोरूपाणामादित्यगणानांमध्येविष्णुर्नामादित्योहमस्मि तथैवमद्विभूत्यंशत्वादिति तथाज्योतिषांद्युयोतकानांदेवगणानांचमध्येंशुमांल्लोकप्रकाशकोरविर्नामज्योतिरस्मि एवंमरुतां मरुतोवातरूपानादेवसंज्ञकास्तेहि सूर्यमनुरश्मिभिः सहचारिण ऋषयोपि मरुन्नामानस्तेषांचमध्येमरीचिनामामरुदस्मि नक्षत्राणामस्मित्यादि तारकानांमध्येशशिनामतारकास्मि २१ ॥

मधुभाष्य

२१

75

भाषाअनुवादटीका २१

अब इस श्लोक से लेकर अध्याय समाप्ति पर्यंत अपनी विभूति कहते हैं कि बारह अदिति के पुत्रोमे विष्णु नाम आदित्य मै हूं और प्रकाश रूपों के मध्य सर्वत्र व्यापी रवि रूप मै हों और सब देवतो के बीच मरीचि नामक हमै जानो और नक्षत्रगणोंमे चंद्रमा भी मही को मानो २१

दोहा

आदित्यहि मे विष्णु हों ज्योतिन मे रवि होंहि मारुत मांहि
मरीचि हों तारक मे शशी सोंहि २१॥

76

वेदानां सामवेदोस्मि देवानामस्मि वासवः इं
द्रियाणां मनश्चास्मि भूतानामस्मि चेतना २२

शांकरभाष्यटीका १

वेदानामिति वेदानां मध्ये सामवेदोस्मि देवानां रुद्रादित्यादीनां वास
व इंद्रोस्मि इंद्रियाणामेकादशानां मनश्चास्मि चक्षुरादीनां संकल्पवि
कल्पात्मकं मनश्चास्मि भूतानामस्मि चेतना कार्यकारणसंघाते नित्याभिव्य
क्ता बुद्धेर्वृत्तिश्चेतना २२ ॥

आनंदगिरिकृतटीका २

मंत्रब्राह्मणसमुदायानामृगादीनां मध्ये सामवेदोस्मीति ध्यानांतरमु
दाहरति वेदानामिति संघाते शीवाधिष्ठिते यावत् पंचत्वं सर्वत्र व्यापि
नी चैतन्याभिव्यंजिकेति शेषः २२ ॥

स्वामिकृतटीका ३

देवानामिति वासवइंद्रो भूतानां संबंधिनी चेतना ज्ञानशक्तिरहमस्मि २२

पिशाचभाष्यटीका ४

वेदानां सामवेदोस्मि भूतानां कर्मकारणसंघातानां संबंधिनी चेतना २२

रामानुजभाष्यटीका ५

वेदानामिति वेदानामृग्यजुः सामाथर्वणां यदुत्कृष्टं सामवेदः सोहं देवाना
मस्मि वासवः देवानां यदुत्कृष्टं इंद्रः सोहं इंद्रियाणां मनश्चास्मि एकादशाना
मिंद्रियाणां यदुत्कृष्टं मन इंद्रियं तदहमस्मि भूतानामस्मि चेतना इयमपि
न निर्धारणे षष्ठी भूतानां चेतना वतां या चेतना साप्यहमेव २२ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २२ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

वेदानामिति ऋगादिचतुर्णां वेदानां मध्येहं सामवेदोस्मि सामात्मकः साम
वेदः सर्वाम्नातीति विग्रहात्साम्नः ऋक्प्रमाणीति रूपः स्वरत्वाभिशुद्धे सा
म ब्राह्मणाच सैवनाम ऋग्गासीदमो नाम तत्साम्नः सामत्वमित्याहुः
श्रुतेः संभवात्प्रजापत्याः इति नेत्यब्रवीत्साम सौपर्णा ग्रता मम महिमेति भाष्य
मानं मस्येति क्रमेणाद्यो पदार्थौ नयेत् तिनिष्ठेवृत्तर्ऋगेवशोभताय मस्य गीति
रूपः स्वरः तत्र काकुवाग्रापि तस्यहेतस्य साम्ना संवेदभवति हास्य

श्री·गी·टी· ८ संतस्यैव स्व पवसमिति एवं साक्षकसामोपसमीपं गताऽस्यवदन् इति
किंग्राबं भूजास्वैप्रजास्यैमिथुनेदं पत्संसमभवावेति ततः सामतेस्यब्रवीत्
निषेधं चकार यतः ममज्यायान् आदिभूतस्ततो मम महिमा मत्तो मर्थ्य
मधिकं वर्तते किमेकया ऋचा ग्रस्तदेऋचो भूताउपावदतामित्यादि स
र्वस्मृगाभूपेतया सा ग्रउपजीव्यतेनाधिकत्वमित्युक्तं यद्वा सामसंबंधितया
या अंततः सर्वेश्वरत्वावकतेतपावमात्योभवति अथातः पवमानानाम
मम्यारोहइतिश्रुतेः एवंतः पठनमात्रेणापापहेत्याभवतितस्यावमा
दै नीभिरहस्रनामीति परिशिष्टोक्तेः तेनापिसामवेदस्यविभूतित्वं तथादे
वानां मध्ये वासवः इंद्रोहं तयाइंद्रियतिजानातीद्रःपरमात्मा तत्संबंधिनामिंद्रि
याणामेकादशानां मध्ये मनः साक्षादात्मसंबंधोः स्पष्टोपरंपरयातीम
नोहं भूतानां संबंधिनीचेतनाज्ञानशक्तिरहं २२ ॥

वनमालीटीका ८

वेदानां मध्ये गानमाधुर्येण रमणीयः सामवेदोहं इंद्रियाणामेकादशानां
मनोहं भूतानां प्राणिसंबंधिनीचेतनाबुद्धेर्हेतिरहं २२ ॥

ॐसमवेजयंतीटीका ९

ना किंचवेदानामिति वेदानां चतुर्णां मृग्यजुःसामथर्वणां मध्ये गीतिमाधुर्ये
णोत्कृष्टोयस्सामवेदस्सोहमस्मि देवानां देवगणानां मध्ये यो वासवः इंद्रस्ते
षामधिपतिः सोहमस्मि इंद्रियाणां मध्ये अनिरुद्धियुनस्प्रवर्तकतउत्कृष्टा
यन्मनोनामेंद्रियंतदहमस्मि भूतानां चेतनवतां संबंधिनीयावाचेतनाज्ञा
नशक्तिः साप्यहमेवास्मि २२ ॥

मधुसूदनीटीका १०

चतुर्णां वेदानां मध्ये गानमाधुर्येणातिरमणीयः सामवेदोहमस्मि वासवः
इंद्रः सर्वदेवाधिपतिः इंद्रियाणामेकादशानां प्रवर्तकं मनः भूतानां स
शारीरक र्वप्राणिसंबंधिनां परिणामानां मध्ये चिदभिव्यंजिकाबुद्धेर्वृत्तिः चेतनाहम
स्मि २२ ॥

सदानंदीटीका ११

मध्ये चतुर्णां वेदानां सामवेदोस्म्यहं हरिः रुद्रादित्यादिदेवानां मध्येहं पाक
शासनः १ एकादशेंद्रियाणां च मनोहं तत्प्रवर्तकं कार्यकारणसंघाते नवि
दभिव्यंजकाधिका २ हतिस्समस्तभूतानां चेतनानामहं हरिः ३ २२ ॥

नीलकंठीटीका १२

सामवेदोगानेनरमणीयत्वात् वासवः देवराजत्वात् मनः इंद्रियांतरप्रवर्तक

त्वात् चेतनाधीवृत्तिः चिदभिव्यक्तिहेतुत्वात् एतेवेदादीनांमध्ये
श्रेष्ठः २२ ॥

आनंदीटीका

भूतानांपृथिव्यादीनांशरीरेंद्रियविषयाख्यात्रिप्रकाराणांमध्ये
चेतनास्मिचेत्यतेनयेतिचेतनाविषयग्रहणशक्तिःशक्तिशक्तिमतो
रभेदादिंद्रियाख्यःप्रकाशोस्मि २२

रामकंठीटीका

वेदानांत्रयाणांचतुर्णांवाप्रसिद्धानांमध्येसामवेदोहंतस्यभगवतो
वशाधान्यमाविष्कृतंयेनप्रणवेद्धेवेदेषुवाजिवदन्नकृष्णोद्गीथप्रभु
यैसपवसर्वप्रत्याश्चेतोतत्स्यमद्विभूत्यंशत्वम् देवानांत्रयस्त्रिंशद्गण
भेदेनप्रगणपठितानांवासवइंद्रोहम् तस्यतदीश्वरत्वान्मद्विभूत्यं
शत्वं इंद्रियाणामेकादशानांमध्येमनोहंतस्यप्रवृत्तिनिवृत्तिहेतुत्वात्
प्राधान्येनमद्विभूत्यंशत्वं द्विविधानिभूतानिचराणिस्थावराणिच
तेषामप्यमध्येषामपिचेतनाप्रधानंयतस्तेनैवोपलक्षितत्वेनचराणां
स्थितिः प्रसिद्धैवचेतनानिबंधनाचस्थावराणामपिचवस्थानतदनुग्र
हीतानांतेषांसंकल्पात् अतःसर्वभूतप्राधान्यव्यवस्थिताचेतनाभिः
नापिदेहकृतशक्तिरहंतस्याप्राधान्यतयामद्विभूत्यंशत्वं केचित्तुचेतनांतु
द्विमाहुः तस्याश्चकार्यकारणभेदेनप्रसृतानांजडानामेवभूतानामेव
मध्येप्राधान्यमाहुः साहितानिसर्वाणिप्रकृष्यसन्निधिसमद्भूतचेतनभा
वाश्चेतयतेइति [illegible] २२ ॥

लासिकी टीका

किंच वेदानांचतुर्णांसामवेदोहमस्मि देवानांवैभवयुक्तानांवासवइंद्रोहं
इंद्रियाणांव्याप्तिहेतुमनोंतःकरणमस्मि भूतानांभूतत्वव्याप्तिहेतु
तद्गततनावहिर्मुखव्यापकशक्तिरहमस्मिविभूतित्वेन ननुरूपभेदेट
कप्राकेलीनतयाकिंतत्रभूतत्वनिहत्विलस्याहद्भिर्भवत्वाभावादिति
चेत् मैवम् यतःपूर्वरूपमित्युक्तम् प्रमाणैकात्म्यमानयेततोभेदाहिवा
र्यतइत्यतःरूपप्रभावपितत्रत्यप्यतमसोनुभूयमानतयाचेतनायावहि

गी॰ स्त्रवलमेव यतेनैव स्तभमतमोंतृतिनां स्थावराणामपि भूत
टी॰ तमुत्रेय अत्रवाध्यायो प्रायेण स्पष्टार्थतया उर्वी यमेव विव्रियते २२
८॰

78

पंचोलीटीका

वेदानामिति वेदानां चतुर्णां ऋग्यजुःसामाथर्वणां मध्ये साम
वेदोस्मि देवानामिंद्रादीनां मध्ये वासवः इंद्रोहं इंद्रियाणामेका
दशानां मध्ये त्वक्श्रवणरसनत्वग्घ्राणवाक्पाणिपादपायू
पस्थमन एषां मध्ये मन अहं भूतानां मध्ये चेतना सर्वदा अव्य॰
क्ताबुद्धिरहं २२

भगवीरसमिद्धोधिनी॥

वेदानामिति वेदानां मध्ये सामवेदोस्मि तस्य हि उद्गीथे
भूरस्य परवादतस्तत्परपादैः सम्यग्भूतस्य यज्ञस्य संपूर्ण फ
ल साधनत्वादिति देवानामिति देवा देव्यंते नु मोदंते यज्ञैरिति
देवादि विध्यिनापि एष्वी भागं कुर्वतीति तेषां मध्ये वासव इंद्र
स्तदधीनत्वाय तस्येति इंद्रियाणामिति इंद्रियाणां ज्ञानक
र्मेंद्रियाणां मध्ये मनश्चास्मि तन्मूलत्वात्तेषामिति भूतानामि
ति भूतानां चराचराणां चेतना ज्ञानशक्तिरस्मि इति २२॥

मधुभाष्य

२२॥

भाषाअनुवादटीका २२

औार वेदों मे साम वेद देवता मे इंद्रऔार इंद्रियों के मध्ये मे मन अथा न इंद्रीमे हौ तथा भूत कहे प्राणियोंके विषे चेतना जो ज्ञान शक्ति सोमै हौं २२ ॥

दोहा

सामवेद वेदन विषें देवनमे सुरराज हों मन इंद्रियके वि
षें जन मध चेतन आज २२

79

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां व
सूनां पावकश्चास्मि मेरुः शिखरिणामहं २३

शंकरभाष्य टीका १

रुद्राणामिति रुद्राणामेकादशानां शंकरश्चास्मि वित्तेशः कुवेरोय
क्षरक्षसां यक्षाणां रक्षसां वसूनामष्टानां पावकश्चास्मि अग्निः मेरुः
शिखरिणां शिखरवतामहं २३ ॥

आनंदगिरिकृतटीका २

स्पष्टार्थं २३ ॥ ॥ ॥ ॥ ॥

स्वामिकृतटीका ३

रुद्राणामिति राक्षसानामपि क्रूरत्वादिसामान्याद्यक्षैः सहैकीकृत्या
निर्देशः तेषांमध्ये वित्तेशः कुवेरोस्मि पावकोग्निः शिखरिणां शिख
रवतामुच्छ्रितानां मेरुः २३ ॥

पिशाचभाष्यटीका ४

रुद्राणामेकादशानां शंकरश्चास्मि वित्तेशो यक्षः वैश्रवणः वसूनाम
ध्ये पावकोस्मि २३ ॥

रामानुजभाष्यटीका ५

रुद्राणामिति रुद्राणां शंकरश्चास्मि रुद्राणामेकादशानां शंकरोह
मस्मि वित्तेशो यक्षरक्षसां पतिर्यो वैश्रवणः सोहमस्मि वसूनामष्टा
नां पावकोहं शिखरिणां पर्वतानां मेरुरहं २३ ॥ ५८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २३ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

रुद्राणामिति रुद्राणामेकादशानां मध्ये शंकरोहमस्मि तथा यक्षर
क्षसामतिक्रूराणां मध्ये वित्तेशः कुवेरोहं तथा वसूनां मध्ये पावको
ग्निनामाहं तथा शिखरिणां पर्वतानां मध्ये मेरुरहं २३ ॥

वनमालीटीका ८

१मध्ये शंकरः रुद्राणामेकादशानां वित्तेशः कुवेरः वसूनामष्टानां पावकोग्निः मेरुः
समेरुः शिखरिणां पर्वतानां २३ ॥

कुसमवैजयंतीटीका ९

श्री·
गी·टी·
द·

60

किंच रुद्राणामिति रुद्राणामेकादशरुद्राणां मध्ये यः शंकरनामारु
द्रः सोप्यहमेवास्मि यक्षरक्षसामधिपतिर्यो वित्तेशो धनाधिपः कुबेरः
सोहमेवास्मि वसूनामष्टानां वसूनां मध्ये यः पावकोग्निनामा वसुः सो
प्यहमेवास्मि शिखरिणां शिखरवतामत्युच्छ्रितानां पर्वतानां मध्ये
यो मेरुः सुवर्णाचलस्तमेरुः सोप्यहमेवास्मि २३ ॥

मधुसूदनीटीका १

मध्येशंकरः

रुद्राणामेकादशानां वित्तेशो धनाध्यक्षः यक्षराक्षसायतानां राक्ष
सानां कुबेरोहं वसूनामष्टानां पावकोग्निः मेरुः सुमेरुः शिखरि
णां शिखर वतामत्युच्छ्रितानां पर्वतानां २३ ॥

सदानंदीटीका ११

य एकादशरुद्राणां शंकरः सोस्म्यहं हरिः यक्षाणां रक्षसां मध्ये कु
वेरोहं धनाधिपः १ वसूनामग्निरष्टानां मध्ये ध्येयोहमीश्वरः
मेरुः शिखरिणां मध्ये देवतानां निवासभूः २ २३ ॥

नीलकंठीटीका १२

रुद्राणामेकादशानां वसूनामष्टानां शिखरिणां रत्नविशेषात्त
द्वतां मध्ये मेरुरहं २३ ॥

आनंदीटीका

रुद्राणामेकादशानां शिखरिणामुन्नतानां शैलानां मध्ये मेरुः २३

रामकंठीटीका

किंच रुद्राणामजैकपादादिसंज्ञाभिः पुराणप्रोक्ताभिः प्रसिद्धानामेकादशसं
ख्यानां मध्ये शंकरोहं तन्मध्ये तस्यैश्वर्यातिशयात्तद्विभूतित्वं प्राप्तं तथा
यक्षाणां गुह्यकानां तथा रक्षसां पिशिताशिनां सारूप्यात्पिशाचाना
मपि देवयोनिविशेषाणां मध्ये वित्तेशो धनेश्वरोहं तस्य तद्वर्गाधिकृतत्वा
त्तद्विभूतित्वं प्राप्तं तथा वसूनां धरादिसंज्ञाभिः प्रसिद्धानामष्टानां मध्ये
पावकाख्यो वसुरहं तस्य नानाविधयागविधिनाधिकरणभूतत्वाद्दि
ताश्रयात्वमतिमहिभूतित्वं प्राप्तं तथा शिखरिणां मध्ये मेरुः कनकाच
लोहं तस्य देवालयत्वसूर्योदयहेतुत्वादिनानेकप्राधान्येन महिभूतित्वं प्राप्तम
स्मत्तत्र सर्वत्रैव दिनत्वम् २३ ॥

वसगतीटीका

रुद्राणामनंतानांशंकरोहम् वित्तेशः कुवेरः पावकाख्योवसुः शि
खरवतामुछ्रितानांपर्वतानांमेरुः सुमेरुः २३ ॥

पैवोलीटीका

रुद्राणामिति चपुनः रुद्राणामेकादशानांमध्येशंकरोनामरु-
द्रोहं यक्षरक्षसांमध्येवित्तेशः धनदः कुवेरोहंचपुनः वसूनामष्टा
नांमध्येपावकनामावसुरहं शिखरिणांकुलाचलानांमध्येमेरु-
रहं २३

रसगवीरसमिद्धोधिनी॥

रुद्राणामिति रुद्राः रुद्ररूपगणाविशिष्टवामरधिमरूपास्तेषांम
ध्ये शंकरनामारुद्रोस्मि भूतसंहारकर्तत्वादिति तथा यक्षरक्ष
सांचवित्तेशनामयक्षोस्मि वसूनामिति वसवोग्निरूपा वसुनामा
नोगणास्तेषांमध्येपावकश्चास्मि पावकः पुनाति शोधयति पा
पेभ्यः कर्तारमिति तथाशिखरिणांपर्वतानांमध्ये मेरुनामाशि
खर्यस्मि तस्यैवाब्रह्मपिपीलकांतंजीवजातादिधारणसमर्थ
त्वादित्यर्थः २३॥

मधुभाष्य

२३॥

और एकादश रुद्रो मे शंकर औ यक्ष राक्षसो मे कुवेर मै हो वसवो के वीचमे अग्नि औ पर्वतो मे और सरसो सुमेरु हमे जानो २३ ॥

दोहा

शंकर रुद्रनमांहिहौं यक्ष रक्षमांहि कुवेर पावक वसुव
नकेविषें शैलनमांहिसुमेर २३॥

पुरोधसांचमुख्यंमांविद्धिपार्थबृहस्पतिं से-
नानीनामहंस्कंदः सरसामस्मिसागरः २४

शंकरभाष्यटीका १

पुरोधसामिति पुरोधसां राजपुरोहितानां मुख्यं प्रधानं मां विद्धि।
जानीहि हे पार्थ बृहस्पतिं स हीन्द्रस्येति मुख्यः स्यात् पुरोधाः सेनानीनां
सेनापतीनामहं स्कंदो देवसेनापतिः सरांसि यानि देवखातानि सरांसि ते
षां सरसां सागरोस्मि भवामि २४ ॥

आनंदगिरिकृतटीका २

पुरोहितेषु बृहस्पतेर्मुख्यत्वे हेतुमाह सहीति २४ ॥

स्वामिकृतटीका ३

पुरोधसामिति पुरोधसांमध्येदेवपुरोहितत्वान्मुख्यंबृहस्पतिंमांविद्धि
सेनानीनांमध्येदेवसेनापतिः स्कंदोहमस्मिसरसांस्थिरजलाशयानां।
मध्येसमुद्रोस्मि २४ ॥

पैशाचभाष्यटीका ४

पुरोधसांचमुख्यंमां २४ ॥

रामानुजभाष्यटीका ५

पुरोधसांपुरोहितानांमध्येयउत्कृष्टोबृहस्पतिः सोहमस्मिसेनापती
नांस्कंदोहमस्मिसरसांसागरोस्मि २४ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २४ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

पुरोधसामिति पुरोधसांदेवपुरोहितानांमध्येमांबृहस्पतिंमुख्यंविद्धि।
तथासेनानीनांदेवसेनानीनांमध्येस्कंदोहंतथासरसांजलाशयानांमध्ये
सागरोहं २४ ॥

वनमाली टीका ८

पुरोधसांराजपुरोहितानां सेनानीनांसेनापतीनांस्कंदोगुहः सरसांदे-
वखातजलाशयानांसागरः सगरपुत्रैः खातः २४ ॥

कुमरमवैजयंतीटीका ८

किंच पुरोधसामिति हे पार्थ पुरोधसां पुरोहितानां मध्ये यो मुख्यः शक्र-
स्य सर्वराजमुख्यत्वात्तत्पुरोहितोपि मुख्यः सर्वोत्कृष्टो बृहस्पतिस्सुराचार्य-
स्तं मां कृत्स्नं विद्धि सोप्यहमेवेति त्वं जानीहीत्यर्थः सेनानीनां सेनान्यां
नुडागमस्त्वार्षः सर्वसुरासुरसेनापतीनां मध्ये यः स्कंदः कार्तिकेयः सोप्य-
हमेवास्मि सरसामचलागाधस्थीजलाशयानां मध्ये यस्सागरः समुद्रः
सोप्यहमेवास्मि २४ ॥

मधुसूदनी टीका ९

इंद्रस्य सर्वराजश्रेष्ठत्वात्तत्पुरोधसं बृहस्पतिं सर्वेषां पुरोधसां राजपुरो-
हितानां मध्ये मुख्यं श्रेष्ठं मामेव हे पार्थ विद्धि जानीहि सेनानीनां सेनाप-
तीनां मध्ये देवसेनापतिः स्कंदो गुहः अहमस्मि सरसां देवखातजलाश-
यानां मध्ये सागरः सगरपुत्रैः खातो जलाशयोहमस्मि २४ ॥

सदानंदी टीका ११

राज्ञां पुरोधसां मध्ये शक्राचार्यो बृहस्पतिः देवसेनापतिः स्कंदः सेनानी-
नामहंबली १ सागरः सरसां मध्ये निर्मितानां चदैवतैः २४ ॥

नीलकंठी टीका १२

पुरोधसां पुरोहितानां बृहस्पतिर्देवराजपुरोहितत्वात् सेनानीनां से-
नापतीनां स्कंदः कार्तिकेयः सरसां जलाशयानां २४ ॥

आनंदी टीका

सरसां देवखातादीनां मानसादीनां मध्ये २४

रामकंठी टीका

किंच पुरोधसां राजगुरूणां मध्ये मुख्यं प्रधानं बृहस्पतिं देवराजगुरुं मां विद्धि
तस्य तेषु प्रकृष्टत्वात् सेनान्यां चमूनायकानां मध्ये चमूनायकः स्कन्दः
कुमारोहं तस्य तन्मध्ये वीर्यातिशययोगात्प्राधान्यम् सरसां जलाशया-
नां मध्ये सागरोहं तन्मध्ये नानारत्नप्रभवहेतुत्वादिना सागरस्य प्राधा-
न्ये २४

लासिकी [illegible]टीका

पुरोधमांमखंबृहस्पतिंमांविद्धि सेनानांचमूनायकानांदेवसेना
पतिः स्कंदोहम् सरसांस्थिरजलाशयानाम् २४ ॥

पंचोलीटीका

हेपार्थवपुनःदेवपुरोहितानांमध्येमुख्यंबृहस्पतिंमांविद्धिसेना
नीनांमध्येस्कंदोहंसरसांजलाशयानांमध्येसागरोहं २४

रणावीरसमिद्धोथिनी ॥

पुरोधसामिति पुरोधसः पुरोहितास्तेहियजमानंप्रतिस्वर्गादि
काम्यात्कर्मणः फलोत्पत्त्याप्रतिपादयंतिइतितेषांमध्येप्राधा
न्यतोबृहस्पतिनामानंविद्धिजानीहि तथाचसेनानीनामिति
सेनाधिपतीनांमध्येस्कंदः कुमारस्तन्नियंतात्वेनहि देवसेनास
र्गादिपुप्रजाः पालयितेस्वदेवनलक्षणाद्गृहरचनाः कुर्वंतेइति
तद्गृहोपदेशकः सेनान्यहमेवास्मि सरसामिति सरंत्यनवच्छि
न्नप्रवाहप्रसरेणगच्छंतिइतिसरांसि जलरूपाः स्वात्मस्मूर्तयः
तेषांमध्येसागरः सागरइवातिगंभीरतातिद्रवणादत्वात्सहशोस्मि
इति २४ ॥

मधुभाष्य

२८ ॥

84

भाषाअनुवादटीका २४

औौर हे अर्जुन पुरोहितो मे मुख्य बृहस्पति हमहैं औौरसेनापतियों मेंस्वामिकार्तिक भी हमहैं औौर सरसा कहे थिर जलाशयों के मध्य समुद्र हमकोजानो २४ ॥

दोहा

पार्थ पुरोहितके विषें मुख्य गुरु मोहिजान सेनापति में
स्कंद हों सरन मांहि सरस्वान २४ ॥

85

महर्षीणांभृगुरहंगिरामस्म्येकमक्षरं य।
ज्ञानांजपयज्ञोस्मिस्थावराणांहिमालयः २५

शंकरभाष्यटीका १

महर्षीणामिति महर्षीणां भृगुरहं गिरां वाचां पदलक्षणानामेक
मक्षरमोंकारोस्मि यज्ञानामिति यज्ञानां जपयज्ञोस्मि स्थावराणां
स्थितिमतां हिमालयः २५ ॥

आनंदगिरिकृतटीका २

एकमित्योंकारस्य ब्रह्मप्रतीकत्वेन तदभिधानत्वेन च प्रधानत्वमुच्यते।
जपयज्ञस्य यज्ञांतरेभ्यो हिंसादिराहित्येन प्राधान्यमुपेत्याह यज्ञानामि
ति शिखरवतामुच्छ्रितानां पर्वतानां मध्ये मेरुरहमित्युक्तेपि स्थिति
शीलानां तेषामेव हिमवान् पर्वतराजोस्मीत्यर्थभेदं गृहीत्वाह स्थिति
मतामिति २५ ॥

स्वामिकृतटीका ३

महर्षीणामिति गिरांवाचां पदात्मिकानांमध्येएकमक्षरमोंकाराख्यं।
पदमस्मि २५ ॥

पिशाचभाष्यटीका ४

महर्षीणांभृगुरहंगिरांवाचांमध्येएकमक्षराणांप्रणवोस्मि २५ ॥

रामानुजभाष्यटीका ५

मरीच्यादीनांमहर्षीणांमध्येभृगुरहंगिरांवाणीनांमध्येएकंप्रसावाख्य
मक्षरंयज्ञानांमध्येयउत्कृष्टोजपयज्ञोस्मि पर्वतमात्राणांमध्येहिमा
लयोस्मि २५ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २५ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तथामहर्षीणांसप्तानांमध्येहंभृगुरस्मि गिरांवक्तविधवाणीनांमध्येएक
मक्षरमोंकारोहं यज्ञानांज्योतिष्टोमेदीनांमध्येजपयज्ञोहं स्थावराणांमध्ये
हिमावलोहं २५ ॥

वनमालीटीका ८

महर्षीणांसप्तानांगिरांवाचामेकमक्षरमोंकारोहं जपयज्ञोहिंसादि

दोषशून्यत्वेन सर्वशोधकोऽहं स्थावराणां स्थितिमतां स्थावरत्वा
शिखरित्वयोर्भेदान्मेरुः शिखरिणामित्युक्तेऽप्यदोषः २५ ॥

ऊष्मवैजयंतीटीका ९

किंच महर्षीणामिति महर्षीणां मरीच्यादीनां ब्रह्मर्षीणां मध्येऽति
तेजस्वी भृगुरहमेवास्मि यज्ञानां सर्वेषां पंचयज्ञानां मध्ये योऽहिंसा
त्मको जपयज्ञः सोऽप्यहमेवास्मि स्थावराणां स्थितिमतामचलमा
त्राणां मध्ये हिमालयोऽहमेवास्मि मेरुहिमालययोः शिखरित्वेन स्था
वरत्वेन च भिन्नधर्माश्रयत्वेन भिन्नार्थपरत्वान्न पुनरुक्तिदोषः २५ ॥

मधुसूदनी टीका १०

महर्षीणां सप्तब्रह्मणां मध्ये भृगुरतितेजस्वित्वादहं गिरां वाचां पदल
क्षणानामेकमक्षरमोंकारोऽस्मि यज्ञानां मध्ये जपयज्ञः हिंसा
दिदोषशून्यत्वेनात्यंतशोधकोऽहमस्मि स्थावराणां स्थितिमतां मध्ये
हिमालयोऽहं शिखरवतां मध्ये हि मेरुरहमित्युक्तं अतः स्थावरत्वे
न शिखरवत्वेन चार्थभेदाददोषः २५ ॥

सदानंदी टीका ११

महर्षीणां महातेजा भृगुरस्मि विद्वांवरः वाचां पदानां मध्ये प्रणवमों
कार ईश्वरः १ जपयज्ञोऽस्मि यज्ञानां शोधकः प्राण्यहिंसकः अहं स्थि
तिमतां मध्ये ध्येयत्वेन हिमालयः २ २५ ॥

नीलकंठी टीका १२

एकं अक्षरं ओंकाराख्यं जपयज्ञो हिंसाशून्यत्वात् स्थावराणां स्थिति
मतां २५ ॥

श्रानंदीटीका

गिरां पदवाक्यरूपाणां नानार्थाभिधायिनां शब्दानां मध्ये एकमक्षरमोंका
रोऽस्मि परब्रह्मवाचकत्वात् स्थावराणामचलानां मध्ये हिमाचलः मेरु
हिमालययोः शिखरिस्थावरत्वेन भेदः २५

रामकंठीटीका

किंच महर्षीणां समर्षिनादिनाप्रजापतिनादिना च महतां प्रकृष्टानां मुनीनां म
रीच्यंगिरःप्रभृतीनां मध्ये भृगुरहं तस्यातपत्वयाज्ञानादिप्रकर्षश्रव
णात्माधान्यम् तथा गिरां गीनिवाप्यलाक्षीप्राह वाच्यानां मध्ये प्रणवाख्य

मेकमक्षरमहं तस्य हि पदत्वम् तस्य विश्वरूपत्वातिरिक्तपरमेश्वरस्वरूपवाचक
त्वात्प्राधान्यं यज्ञानां द्रव्यनिर्वर्त्यानां यागविशेषाणां प्रोक्तानां मध्ये जपः
प्रणवादिपवित्रावर्तनं स एव यज्ञो यागविधिरहं यथा मंत्रजपेन देवता
आराध्यते तथा द्रव्ययज्ञादिनेति तस्य प्राधान्यं यतः फलाभिसंधानेन
यज्ञनिष्ठस्य यत्फलं प्राप्यं तदमेत्याततल्लोकांतरप्राप्तिरपि निरयगति
त्वेन मोक्षधर्मे प्रतिपादिता तथा तत्रोक्तं चतुर्णां लोकपालानां शक्रस्यापि
बृहस्पतेः मरुतां विश्वेदेवानां साध्यानामश्विनोरपि रुद्रादित्यवसूनां च त
थान्येषां दिवौकसाम् एते वै निरयास्तात स्थानस्य परमात्मनः स्वत्वजा
पकप्राप्यस्येत्यर्थः तथा स्थावराणां जंगमव्यतिरिक्तलक्षणानां मध्ये
हिमालयः प्रालेयशैलोऽहं तस्य समस्तस्थावरभूतमध्ये नानारत्नौषधीप्रभ
वत्वादिना प्राधान्यम् गिरीणां मध्ये मेरोर्विशिष्टत्वमुक्तं स्थावराणां तु हिमा
लयस्येति न पौनरुक्त्यम् [illegible] २५ ॥

वासिकी [illegible] टीका

महर्षीणां ब्रह्मज्ञानमालिनाम् गिरां पदात्मिकानां वाचां एकमक्षरमों
काराख्यं यज्ञानां यागविशेषाणां जपयज्ञोऽहं तन्माहात्म्यं चोक्तं महाभा
रते जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते अहिंसया हि भूतानां जपय
ज्ञः प्रकीर्तितः जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा
कुर्यान्मैत्रो ब्राह्मण उच्यते इति स्थावराणां स्थितिमतां जंगमविलक्षणा
नां प्रालेयशैलोऽहम् २५ ॥

पंचोलीटीका

महर्षीणां वसिष्ठादीनां मध्ये भृगुनामा महर्षिरहं गिरां वाचां पदा
नां मध्ये एकाक्षरं ओंकारोऽहं यज्ञानां श्रौतानां स्मार्तानां मध्ये जप
यज्ञः जप एव यज्ञः अहं स्थावराणां मध्ये हिमालयोऽहं २५

रणवीरसमिद्बोधिनी ॥

महर्षीणामिति महर्षयो मरीच्यादयस्तेषां मध्ये भृगुनामा महर्षिरह
स्मि तस्यैव सर्वज्ञत्वादिगुणकत्वादिति गिरामिति गिरां वाहानां मध्ये

एकमक्षरमोंकारोस्मि परमगतिप्रापकत्वादिति यज्ञानामिति यज्ञाश्वमेधादयः पंच तेषांमध्ये जपयज्ञोस्मि परमगतिप्राप्तेःसाधनत्वादिति तथास्थावराणां स्थिरवस्तूनांमध्ये हिमालयोस्मि सुस्थिरत्वादिति २५॥

मधुभाष्य

२५॥

और महर्षियो मे भृगुमै हौं और अक्षर तथा पद आत्मक वाक्य के
बीच ओंकार अक्षर भीमै हो औयज्ञोमे हिंसा रहित होन्ने से जपरू
पयज्ञमै हौं स्थावरोमे हिमालय हमहै २५ ॥

दोहा

महांऋषियनमें हों भृगु शब्दनमे द्विं ओंकार यज्ञनमेंज
प यज्ञहों स्थावर हिमआगार २५॥

88

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गं
धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः २६

शांकरभाष्यटीका १

अश्वत्थ इति अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः देवा एव संत
ऋषित्वं प्राप्ताः मंत्रदर्शित्वादेते देवर्षयः तेषां नारदोस्मि गंधर्वाणां चि
त्ररथो नाम गंधर्वोस्मि सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिश
यं प्राप्तानां कपिलो मुनिः २६ ॥

आनंदगिरिकृतटीका २

सर्ववृक्षाणामित्यत्र सर्वशब्देन वनस्पतयो गृह्यंते २६ ॥

स्वामिकृतटीका ३

अश्वत्थ इति देवा एव संतो मंत्रदर्शनेन ये ऋषित्वं प्राप्ताः तेषां मध्ये नारदो
स्मि सिद्धानामुत्पत्त्यैव प्राप्त(?)परमार्थानां कपिलाख्यो मुनिरस्मि २६

पैशाचभाष्यटीका ४

स्पष्टार्थं २६ ॥ ॥ ॥ ॥

रामानुजभाष्यटीका ५

सर्ववृक्षाणां मध्ये पूज्योश्वत्थ एवाहं देवर्षीणां मध्ये परमवैष्णवो नारदोस्मि
२६ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २६ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अश्वत्थ इति सर्ववृक्षाणां मध्ये पिप्पलो महिमूर्तिः देवाः संतो ये
ऋषयस्तेषु नारदोहं गंधर्वाणां चित्ररथ उत्पत्ति एव प्राप्तपरमा
र्थानां सिद्धानां मध्ये कपिलोहं २६ ॥

वनमाली टीका ८

सर्वेषां वृक्षाणां वनस्पतीनामन्येषां च देवा एव संतो ये मंत्रदर्शित्वेनर्षित्वं
ते प्राप्तास्ते देवर्षयस्तेषां गंधर्वाणां देवगायकानां सिद्धानां जन्मनैव वि
ना प्रयत्नं धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानामधिगतात्मतत्वानां
कपिलोहमेव नान्य इति नरे २६ ॥

89

ब्रह्मवैजयंतीटीका ९

किंच अश्वत्थः सर्ववृक्षाणामिति सर्ववृक्षाणां सर्वेषां पारिजातादीना
मपि वृक्षाणां मध्ये पूज्यत्वेन वर्तमानो योऽश्वत्थः पिप्पलः सोऽहमा
स्मि देवर्षीणां दीव्यंति परापरस्वरूपादि ज्ञानेन दीप्यंते ते देवा मंत्रदृष्टा
र ऋषयः देवाश्च ते ऋषयो देवर्षयस्तेषां मध्ये यो नारदो वैष्णवाग्रसरो
मत्स्वरूपोपदेष्टा सोऽप्यहमेवास्मि चकारः उक्तसमुच्चयार्थकस्तेन
सर्वेषां परमहंसानामग्रगण्यः मत्संप्रदायप्रवर्तको नारदगुरुः सन
कादिः सोऽप्यहमेवेति सूचितं गंधर्वाणां गानधर्मिणां देवगायकानां
मध्ये अतिगायकत्वेनोत्कृष्टो यश्चित्ररथाख्यो गंधर्वराजः सोऽप्यहमेवास्मि
सिद्धानामाजन्मप्राप्ताणिमादिसिद्धीनां धर्मिणां यः परमोपास्यः पी^
कार्दमिः कपिलाख्यो मुनिः सोऽप्यहमेवास्मि २६ ॥

मधुसूदनीटीका ८

सर्वेषां वृक्षाणां वनस्पतीनां मध्ये अश्वत्थोऽहमस्मि देवाश्च ते ऋषयश्च मं
त्रदर्शित्वेन ऋषित्वं प्राप्तास्ते देवर्षयः तेषां मध्ये नारदोऽहमस्मि गंध
र्वाणां गानधर्मिणां देवगायकानां मध्ये चित्ररथोऽहमस्मि सिद्धानां
जन्मनैव विना प्रयत्नं धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानामधिग
तपरमार्थानां मध्ये कपिलो मुनिरहं २६ ॥

सदानंदी टीका ९

पिप्पलः सर्ववृक्षाणां मध्ये ध्येयोऽहमादरात् मंत्रदर्शितया देवाः सं
तो ये ऋषितां गताः १ ते च देवर्षयस्तेषां नारदोऽस्मि सुरेष्वहं गान
धर्मविशिष्टानां मध्ये चित्ररथोऽस्म्यहं २ जन्मनैव महात्मानो ये धर्मज्ञाना
दिभिर्गताः सिद्धत्वं कपिलस्तेषां सिद्धानां योऽपि ईश्वरः ३ २६ ॥

नीलकंठी टीका १२

स्पष्टार्थः २६ ॥ ॥ ॥ २६ ॥

आनंदीटीका

देवाः संतो मंत्रदर्शित्वेन ये ऋषित्वं प्राप्तास्ते देवर्षयः प्रयत्नं विना ये सि
द्धिं प्राप्तास्ते सिद्धाः २६

किंचझ्राकचयोदशकनिष्ठानांहत्वादीनांपदार्थवर्गाणामस्मत्यादी
नांतनद्विशेषाणां याज्ञियत्वादिनातेनविशेषेणप्राधान्यंप्रसिद्ध।
मितिप्रातिपद्येनसर्वेव्याख्याते किंतककविकिंचित्पदंव्याख्यायते।
तत्रमज्जनःमज्जनक्रियाकर्ता तस्यजातावेकवचनं तेनमज्जनयि
तॄणांमध्येमज्जनक्रियायांशुद्धिहेतुत्वात्कंदर्पः कामोहंसतिहि
तस्मिन्नेषांमज्जनकत्वप्रसिद्धिः यादःशब्देनाहेवताश्राद्धला
सांमध्येवरुणःप्रधानं तथायमोवैवस्वतोदेवताविशेषोयतस्त।
तोयोनेयत्रतत्रयोन्यंतरेसर्वक्षेत्रज्ञान्नियमयति तस्यसंयमतांनि
यमक्रियासमर्थानांसर्वेषांमध्येप्राधान्यं संयमतामितिव्याख्याने।
सायच्छादेशाभावः केचित्त्रिगुणाःसंयच्छतामितिपठंति कालः
कलयतामित्यत्रइहतावत्सर्वात्मनानिरवच्छिन्नमहिम्नोनित्य
स्यैकस्येश्वरस्यतत्वस्यपरमार्थसत्वात्कालोनामतद्व्यतिरिक्तः
पदार्थोनकश्चिद्भवितुमर्हति किंतुतन्मायावभासितजडाजड।
भावात्मकेजगत्यजडःक्षेत्रज्ञलक्षणोभावस्तस्यपरस्परविभिन्ना
र्थप्रमातृतायांसत्यामनित्यवस्तुविषयत्वेनकलनामात्रनिमि
त्तकःकालःसमुन्मिषति प्रतिन्याहिभावाउत्पत्तिस्थितिनिरो
धधर्मीणोभूतवर्तमानभविष्यद्रूपायोगित्वात्कलनीयतांतेनते
नतेनरूपेणावच्छेद्यतांप्रतिपद्यते तेषांचमायीयापवप्रमाता
रःकलयितारस्ततःकलनक्रियैवकालस्ततःकलनीयविष
यव्यवहारप्रविसाधनभूतकलनक्रियायामेकस्यकालस्यकल
यितॄणांमध्येमुख्यत्वमितिक्रियात्वेनपरिकल्पितस्यकालस्येहप्र
तिपादितस्वरूपे द्रव्यत्वेनापितस्यैकैवस्यकल्पनाव्यवस्थाप्यते
तामेवरूपति अक्षराणांपदावयवभूतानांमातृकावर्णानांसर्व
प्राणभूतत्वादकारस्यप्राधान्यं सहिजीवइवशरीराणांतेषांवर्णा
नांव्यापकत्वेनैकोव्यवस्थितः तस्यप्रनासादितदीर्घकाकारादिरू
पविकारत्वेसति यद्रूपंनादात्मकंशब्दतत्वमितितत्वविदोवदंति
तथासामासिकस्यतत्पुरुषबहुव्रीह्यादेस्समासस्यद्वंद्वस्यमध्येस

गी॰
टी॰
द॰

90

कलपदार्थप्राधान्यादिनाउभयपदार्थिकरणवचनत्वादिना च द्वंद्व॰
स्य प्राधान्यं तथाक्षयः काल इति यदाद्यत्वेन कालः कल्प्यते तदा
सर्गादीनां नित्यप्रवृत्तानां निमित्तत्ववत्तस्यापि नित्यत्वे सति क्षणि॰
कादिकल्पस्थायिपर्यंतभावभेदप्रदर्शपातितामनित्यानां स्वा
वयवानां निमेषादिकल्पांतानां मध्ये त्वयमनंतत्वमिति स्वाव
यवापत्तेर्यैवेतस्य प्राधान्यं अवयवनिर्देशस्तत्रार्थकल्पनीयः
कल्पनात्वकालस्य क्रियात्वेन द्रव्यत्वेन चोभयथापि प्रतिपत्ति॰
सिद्धिरत्वात्संभवत्येव संभवापत्तेर्येव च भगवतापुनः काल
निर्देशः कृतः यद्वा योऽहमक्षयः परमोऽर्थोऽनित्यत्वादविनश्वरः
स एव कालोऽहमेव ब्रह्मात्मा नेकालत्वेनावभासयामि इतिप्र
वीकालस्य मदिच्छामात्रकल्पितस्वरूपप्रतिपादनार्थं पुन
र्वचनमिति यद्वा दर्शनभेदेन कश्चित्क्रियात्वं कश्चिद्द्रव्यत्वं का
लस्य प्रपूपत्ता भगवतापि निर्देशः कृतः तथायः सततं जीविते
न्द्रियशरीरविषयादिकं युगपदेव हरति तस्य मृत्योः सर्वलभा
विनामरणहेतोर्वस्तुनोऽन्येषां हर्तॄणां मध्ये प्राधान्यं तथोद्भ॰
लयतां वर्धयतां मध्ये धृतस्य बलाधीनत्वेऽपि धर्मोदनपीतत्वा
प्राधान्यं धर्मघृतधनश्राद्धादिक्रियास्वशास्यते पुरवचनाभि
संधिमूलत्वात्तस्य बलवतिस्त्रीत्वं श्लिते तथा सत्ववतां गुणानां स
त्वरजस्तमोलक्षणानां सत्वगुणस्य प्रकाशात्मकत्वात्प्राधान्यं त
थायेन राज्ञा नेद्धविनीतान्दमयंति स दंडः शास्त्रनियमितो नि
ग्रहविशेषोऽशुभसाधनमिति स एव दमयितॄणां दमयतां म
ध्ये दंडस्य प्राधान्यं तथा जिगीषतां प्रतिद्वंद्विनः जेतुमिच्छतां॰
नीतिः कर्मारंभोपायादिकार्यसिद्धिपर्यंता या पंचकमयो नयप्र
वृत्ते साधनमिति नीतेरेव जिगीषतां मध्ये प्राधान्यं तथा गुह्या
नां रहस्योपायानां मध्ये मौनं वा नियमरूपमुनित्वमहं नानार्थ
विषयस्य संकल्पस्याप्युत्पन्नेर्मेषायत्र साहि समाधिलाभेऽपि च सं॰
तिसंकल्परूपा या वाचो नियमरूपस्य मौनस्यासिद्धिरिति तदे
व परमं गुह्यमित्यर्थः तथा ज्ञानवद्रूपेण नानार्थविषयाणां॰

भिन्नज्ञानानि गृह्यंते तेषां मध्ये परमार्थैकलक्षणैकतत्वविषय
स्याभिन्नज्ञानस्य प्राधान्यम् २६ ॥

लासिकी टीका

देवानां सतां ब्रह्मज्ञानेन ऋषित्वं प्राप्तानाम् सिद्धानां त्रैगुण्याती
तत्वेन धर्मज्ञानवैराग्यैश्वर्यादिसंपन्नत्वे सति ख्यातं त्रेण मोक्ष
जन्मनोऽन्यतरत्स्वीकुर्वताम् तदुक्तम् सिद्धा हि मुक्ता कपिली
लया विग्रहं कृत्वा भजंतीति २६ ॥

पंचोलीटीका

सर्ववृक्षाणां मध्ये अश्वत्थोऽहं च पुनः देवर्षीणां देवा एव ऋषि
त्वं प्राप्ताः मंत्रद्रष्टारो ये ते देवर्षयः तेषां देवर्षीणां मध्ये नारद
नामा देवर्षिरहं गंधर्वाणां हाहा हूहू प्रभृतीनां मध्ये चित्ररथः
नामा गंधर्वोऽहं सिद्धाः जन्मना एव धर्मज्ञानवैराग्यैश्वर्यातिश
यं प्राप्तास्तेषां सिद्धानां मध्ये कपिलनामा मुनिरहं २६ ॥

रणवीरसमिद्धोधिनी॥

अश्वत्थ इति सर्ववृक्षाणां वृश्च्यते छिद्यते परशुनेति वृक्षाः सर्वे
च ते वृक्षाः सर्ववृक्षाः सर्वे उद्भिदस्तेषां मध्ये अश्वत्थनामोद्भिदस्मि
यज्ञसाधनत्वात्कल्पवृक्षवत्सर्वमनोरथसाधकत्वाच्चेति देवर्षी
णामिति देवर्षयो देवाश्च ते ऋषयश्च देवर्षयस्ते दिव्यदृष्ट्या ऋ
षिरूपेण तपश्चरंतीति तेषां मध्ये नारदनामा देवर्षिरस्मि सर्वग
तिकत्वादिति गंधर्वाणामिति गांधर्वं गीतं धारयंतीति गंधर्वास्तेषां
मध्ये चित्ररथनामा गंधर्वपतिरस्मि भुव
नपतित्वादिति सिद्धानामिति सिद्धाः स्वसिद्धवैराग्यास्तत्र प्रणीता
स्तेषां मध्ये कपिलनामा देवसिद्धः सांख्यप्रणीता सोऽस्मि स्वांशाव
तारत्वादिति भावः २६॥

मधुमाध

२८॥

औरं वृक्षजातियों मे अश्वत्थ कहे पीपर औ देव ऋषियों मे हौ औगंध
र्व गणो मे चित्ररथ औसिद्ध कहे आजन्म से परमार्थ तत्व ज्ञानियो॰
मेंकपिल मुनिमैहौं २६ ॥

दोहा॥

वृक्षनमांहि अश्वथहों नारद सुरऋषिमांहि चित्ररथ गंध
र्वमें सिद्धमें मुनिकपिलाहि २६॥

92

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐ
रावतं गजेंद्राणां नराणां च नराधिपं २७ ॥

शांकरभाष्यटीका १

उच्चैरिति उच्चैःश्रवसमश्वानां उच्चैःश्रवानामाश्वस्तं मां विद्धि जानी
हि अमृतोद्भवं अमृतनिमित्तमथनोद्भवं ऐरावतमिरावत्याअपत्यं ग
जेंद्राणां हस्तीश्वराणां तं मां विद्धि इत्यनुवर्त्तते नराणां मनुष्याणां
च नराधिपं राजानं मां विद्धि जानीहि २७ ॥

आनंदगिरिकृतटीका २

स्पष्टार्थ २७ ॥ ॥

स्वामिकृतटीका ३

उच्चैःश्रवणामिति अमृतार्थं क्षीराब्धिमथनेउद्भूतमुच्चैःश्रवसं
नामाश्वमद्विभूतिं विद्धि अमृतोद्भवमित्येतदैरावतेपि संबध्यते नरा
धिपं राजानं मां विद्धि २७ ॥

पिशाचभाष्यटीका ४

स्पष्टार्थ २७ ॥ ॥ ॥

रामानुजभाष्यटीका ५ स्पष्टार्थम्

दिव्यास्त्रविनिकामग्रुक मथनतममहेतुः केदपि माकिसर्वाणामेक
सिरसांवाननिराक्ष २७ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थ २७ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

उच्चैःश्रवसमिति अमृतोद्भवं क्षीराब्धिमथनोद्भूतमुच्चैःश्रवसं सा
मनुत्रेमश्वमद्विभूतिं विद्धि गजेंद्राणां मध्ये चतुर्दंतमैरावतं मद्विभूतिं
विद्धि २७ ॥

वनमालीटीका ८

उच्चैश्रवसममृतमथनोद्भवं ऐरावतममृतमथनोद्भवं नराधिपं राजा
नं २७ ॥

ऊरुमवैजयंतीटीका ९

किंच उच्चैःश्रवसमिति अश्वानां कांभोजवाल्हीकासिंधादिदेशोद्भ

श्री· गी· टी· १०·

९३

वानां यथा मेककर्णादिवर्णविशेषाणां पारावतादिजातिमतां प्रा
तिवेगवतां मध्ये ऽमृतोद्भवममृतोत्पादनाय क्षीरोदमथनोद्भवमुच्चै
श्रवसं उच्चैःश्रवोनामानं निरतिशयवेगवन्तं मस्य सूर्यरथ
नेतारं वाजिनं मां बुद्ध्यस्व तथा सर्वेषु नरैर्विद्धि जानीहि गजेन्द्राणां भ
द्रे मन्द्रे मृगे चैव भद्रमन्द्रमृगे तथा भद्रमन्द्रो भद्रमृगो मृगमन्द्र इति ना
दिवाल्मीकि प्रोक्त गजजाति विशेषाणां सर्वेषां मध्ये ऽमृतोद्भवमैराव
ताख्यं गजेन्द्रं मां विद्धि नराणां सर्वेषां मनुष्यमात्राणां मध्ये नराधिपं रा
जानं मां विद्धि चकारात् वर्णानां मध्ये ब्राह्मणानामाश्रमाणां संन्या
सिनं च त्वं मां विद्धीत्याशयः २७ ॥

मधुसूदनी टीका ९

अश्वानां मध्ये उच्चैःश्रवसममृतमथनोद्भवमश्वं मां विद्धि ऐरावतं नराधि
गजममृतमथनोद्भवं गजेन्द्राणां मध्ये मां विद्धि नराणां च मध्ये पं
राजानं मां विद्धीत्यनुषज्यते २७ ॥

सदानंदी टीका ११

उच्चैःश्रवसमश्वानां मां जानीहि अमृतोद्भवं ऐरावतमिरावत्या अ
पत्यं हस्तिनां वरं । अमृतमथनेन विद्धि मामेव परमेश्वरं नृ
णां मध्ये नृपं विद्धि मामेव जगतः पतिं २७ ॥

नीलकंठी टीका १२

अमृतोद्भवं अमृतमथनावसरे उद्भवो यस्य तं २७ ॥

आनंदी टीका उपक्रमं २७ स्पष्टार्थम्

रामकंठी टीका उपक्रमं २७ स्पष्टार्थम्

त्रामिकी [redacted]टीका

अमृतोद्भवम् अमृतेन सहोद्भव आविर्भावो यस्य तं नराधिपं राजा
नं २७

पंचोलीटीका

अश्वानां मध्ये अमृतोद्भवं अमृतार्थं क्षीरोदधिमथनोद्भवं उच्चैः
श्रवः संज्ञं मां विद्धि गजेन्द्राणां मध्ये ऐरावतं इरावत्या अपत्यं मां
विद्धि नराणां पुरुषाणां मध्ये नराधिपं राजानं मां विद्धि २७

रणवीरसमिद्बोधिनी॥

उच्चैःश्रवसमिति अश्वानांमध्ये उच्चैःश्रवानामामृतोद्भवोश्वरत्न
मस्मि मनोजवत्वादिति ऐरावतमिति गजेंद्राणांमध्ये ऐरावतं
नामविद्धि भगवद्भक्तत्वादिति तथा नराणांमध्ये नराधिपंवि।
द्धि मदंशत्वादितिभावः २७॥

मधुभाष्य

२७॥

93/2

अश्व कहे घोडों से उच्चैःश्रवा औ गजेंद्रो में ऐरावत तथा मनु-
ष्योमे नरपति राजाभी मैंही हौ २७ ॥

दोहा

उच्चैश्रव सम अश्वमें अमृत भव मोहू जान ऐरावत गज
गजमें नरमांहि नृपमान २७॥

94

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् प्र
जनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः २८

शंकरभाष्य टीका १

आयुधानामिति आयुधानामहं वज्रं दधीच्यस्थिसंभवं मां वि
द्धि धेनूनां दोग्ध्रीणामस्मि कामधुक् वशिष्ठस्य सर्वकामानां दो
ग्ध्री सामान्या वा कामधुक् प्रजनः प्रजनयितास्मि कंदर्पः कामः
चास्मि सर्पाणां सर्पभेदानामस्मि वासुकिः सर्पराजः २८ ॥

आनंदगिरिकृतटीका २

प्रजनयतीत्युत्पत्तिमाश्रित्याह प्रजनयितेति सर्पानागाश्च जाति
भेदाद्भिद्यंते २८ ॥

स्वामिकृतटीका ३

आयुधानामिति कामान्दोग्धीति कामधुक् प्रजनः प्रजोत्पत्तिहेतुः
कंदर्पः कामो न केवलं संभोगमात्रप्रधानः कामो मद्विभूतिः अशास्त्रीयत्वा
त् सर्पाणां सविषाणां राजा वासुकिरस्मि २८ ॥

पिशाचभाष्यटीका ४

प्रजनः प्रजनयिता २८ ॥ ॥

रामानुजभाष्यटीका ५

दिव्यासुरभिः कामधुक्
प्रजननहेतुः

कंदर्पश्चास्मि सर्पाणामेकशिरसां वासुकिरस्मि २८ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थे २८ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

आयुधानामिति आयुधानां शस्त्राणां मध्ये वज्रमहं धेनूनां मध्ये समु
द्रोत्पन्नां कामधेनुं मद्विभूतिं जानीहि प्रजनः विधिवत्प्रजोत्प
त्तिहेतुः कंदर्पोऽहमस्मि सर्पाणां सविषाणां मध्ये वासुकिरस्मि २८

वनमालीटीका ८

आयुधानामस्त्राणां मध्ये दधीचेरस्थिसंभवमस्त्रमहमस्मि धेनूनां दो
ग्ध्रीणां कामं दोग्धीति कामधुक् समुद्रमथनोद्भवा धेनुरहं कामानां मध्ये

श्री॰
गी॰ टी॰
८॰
९५

प्रजनः पुत्रोत्पत्त्यर्थीयः कंदर्पः कामः सोहं सर्पाश्च नागाश्चैकफणानेकफणाभेदेनांवानरजातिभेदेन वाभिद्यन्ते सर्पाणां मध्ये वासुकिरहं २८ ॥

हनुमवैजयंतीटीका ९

किंच आयुधानामिति सर्वेषामायुधानामस्त्राणां मध्ये वज्रं दधीचेरस्थिसंभवमस्त्रमहमेवास्मि धेनूनां सवत्सानां दोग्ध्रीणां मध्ये कामधुक सर्ववांछितप्रदायिनी दिव्या सुरभिरहमेवास्मि शास्त्रोक्तक्रमसमुद्भवकले चं॰
नकामा गृह्यन्ते कामानां मध्ये यः प्रजनः प्रजोत्पत्तिहेतुः कंदर्पः कामस्सोप्यहमेवास्मि न तु रतिमात्रजनक इत्यर्थः सर्पाणां सर्पजातीनामेकशिरस्कानां मध्ये वासुकिस्तेषां राजाहमस्मि सहरतिमात्रजा से॰
नक इत्यर्थः २८ ॥

मधुसूदनी टीका १०

आयुधानामस्त्राणां मध्ये वज्रं दधीचेरस्थिसमुद्भवमस्त्रमहमस्मि धेनूनां दोग्ध्रीणां मध्ये कामदोग्धीति कामधुक समुद्रमथनोद्भवा वसिष्ठस्य कामधेनुरस्मि कामानां मध्ये प्रजनः प्रजनयिता पुत्रोत्पत्त्यर्थीयः कंदर्पः कामः सोहमस्मि चकारस्त्वर्थे रतिमात्रहेतुकामव्यावृत्त्यर्थः सर्पाश्च नागाश्च जातिभेदाद्भिद्यन्ते तत्र सर्पाणां मध्ये तेषां राजा वासुकिरहमस्मि २८ ॥

सदानंदी टीका ११

आयुधानामहं वज्रं दधीचेरस्थिसंभवं सर्वकामैकदोग्ध्रीणां वसिष्ठस्यास्मि कामधुक १ प्रजाः जनयिता कामो धर्मीहरहं हरिः वासुकिः सर्पराजोहं सर्पाणामस्मि धार्मिकः २ २८

नीलकंठी टीका १२

प्रजनः प्रजाजनयिता कंदर्पः कामः न तु हेयमैथुनरूपः २८

आनंदी टीका

प्रजनात्प्रजोत्पत्तिहेतवः जाताबेकवचनम् तेषां मध्ये कंदर्पोहम् २८

रामकंठी टीका [illegible] २८ स्पष्टार्थम्

लालिकी [redacted] टीका

वज्रं दधीचेरस्थिसंभवं कामधुक् सुरभिर्नामधेनुः प्रजनः प्रजनयि
तार्थस्तामर्थ्यं जनयितॄणामिति विभक्तिव्यत्ययो ज्ञेयः सर्पा नागाश्च
सविषत्वनिर्विषत्वाभ्यां जातिभेदाद्भिद्यंते २८ ॥

पंचोलीटीका

आयुधानां मध्ये वज्रमहं धेनूनां मध्ये कामधुक् कामधेनुरहं चप्र
नः प्रजनः पिताकंदर्पोहं सर्पाणां मध्ये वासुकिरहं २८

श्रीधरीसुबोधिनी॥

आयुधानामिति आयुधानां मध्ये वज्रमस्मि दधीचिमुनिकरंकसं
भवत्वादतएवात्यंतप्रभाववत्वादिति धेनूनामिति धेनूनां दोग्ध्री
नां मध्ये कामधुक् कामधेनुरस्मि सर्वलोकपावनत्वपोषकत्वादि
ति तथा सर्वजनयितॄणां मध्ये प्रजनः प्राधुर्येण प्रजायतेऽति
प्रजनः प्रजनयिता वा कंदर्पः कामः सर्वादकारित्वादिति स
र्पाणामिति सर्पा बिलेशया स्तेषां मध्ये वासुकिनामा सर्प
राजोस्मि श्रीकंठभूषणत्वादिति २८

मधुभाष्य

२८ ॥

और आयुधो मे वज्र औ धेनु सकल मे कामधेनु औ प्रजा उत्पत्तिका रीजो कंदर्प सोमै हौ तथा सर्पो मे वासुकी भी हमै जानो विषधारियो की सर्प संज्ञा है २८ ॥

दोहा

आयुधन मांहि वज्र हों कामधुक गावन मेहि प्रजाकारमें का
म हों वासुकि सर्पविषें हि २८

97

अनंतश्चास्मि नागानां वरुणो यादसामहं पितॄ
णामर्यमा चास्मि यमः संयमतामहं २९ ॥

शंकरभाष्यटीका १

अनंत इति अनंतश्चास्मि नागानां नागविशेषाणां नागराजः वरुणो
यादसामहमब्देवतानां राजाहं पितॄणामर्यमा नाम पितृराजश्चास्मि
यमः संयमतां संयमनं कुर्वतामहं २९ ॥

आनंदगिरिकृतटीका २

स्पष्टार्थं २९ ॥ ॥ ॥ ॥ ॥

स्वामिकृतटीका ३

अनंत इति नागानां निर्विषाणां राजानंतः शेषोस्मि यादसां जलचराणां
राजा वरुणोहमस्मि पितॄणां राजार्यमास्मि संयमतां नियमं कुर्वतां मध्ये
यमोहमस्मि २९ ॥

पिशाचभाष्यटीका ४

यादसां जलौकसां संयमतां संयमनं कुर्वतां २९ ॥

रामानुजभाष्यटीका ५

नागाः अनेकशिरसः यादांसि जलजंतवः अत्रापि निर्धारणे षष्ठी या
दसां पतिर्वरुणोस्मि २९ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २९ ॥ ॥ ॥

परमार्थप्रपाटीका ७

नि नागानामिति नागानां निर्विषाणां मध्ये अनंतो मद्विभूतिः यादसां जला
श्रयवासिनां वरुणोहं पितॄणां मध्ये अर्यमा देवोस्मि २९ ॥

वनमाली टीका ८

नागानामनंतः शेषाख्योहं यादसां जलचराणां मध्ये तेषां वरुणोहं पि
तॄणामर्यमा पितृराजोहं संयमतां संयमं यमीयमि फलदानेनानुग्रह
निग्रहं कुर्वतां मध्ये यमोहं २९ ॥

श्री॰ गी॰ टी॰ द॰

९८

ऊसमवैजयंतीटीका ९

किंच अनंतश्चेति नागानां नागजातीनामनेकशिरस्कानां मध्ये ऽनंतः शे-
षाख्यो ऽहमेवास्मि सर्पाः नागाश्च जातिभेदाद्भिद्यंते ऽतो न पुनरुक्तिदो-
षः यादसां जलजन्तूनामधिपतिर्वरुणो ऽहमेवास्मि अर्यमापितृदी-
रणो यथैव वरुणस्य जलजंतुविशेषाभावात् पितॄणां अग्निष्वात्तादिपि-
तृगणानां मध्ये ऽर्यमानामायः पितृदेवः सो ऽप्यहमेवास्मि संयमतां य-
मीयमं फलप्रदानेनानुग्रहं च कुर्वतां दंडयतां मध्ये न्यायदंडकर्ता यो य-
मः सो ऽप्यहमेवास्मि २९ ॥

मधुसूदनीटीका १०

नागानां जातिभेदानां मध्ये नेषां अनंतश्शेषाख्योऽहमस्मि यादसां
जलचराणां मध्ये तेषां राजा वरुणोऽहमस्मि पितॄणां मध्ये ऽर्यमा
णामपितृराजश्चाहमस्मि संयमतां संयमं धर्माधर्मफलदानेनानुग्रहं
निग्रहं च कुर्वतां मध्ये यमोऽहमस्मि २९ ॥

सदानंदीटीका ११

अनंतो नागराजोऽहं नागानां भगवत्कला जलेचराणां वरुणो राजाऽहं
सर्वयादसां १ अर्यमा पितृराजोऽहं पितॄणां सर्वभोगदः यमोऽहं धर्मरा-
जाख्यः संयमने प्रकुर्वतां २ २९ ॥

नीलकंठीटीका १२

नागानां सर्पाणां न वभेदानां यादसां जलचराणां संयमतां नियमनक-
र्तॄणां २९ ॥ २९

आनंदीटीका

संयमतां पापान्निवारयतां मध्ये यमोऽहम् २९

रामकंठीटीका [illegible] २९ स्पष्टार्थम्

लाक्षिनी[redacted]टीका

यादसां जलचराणाम् संयमतां नियमं कुर्वताम् २९

पंचोलीटीका

चअर्जुनःनागानांमध्येअनंतोहंयादसांअद्देवतानांमध्येवरुणोहंचअर्जु
नःपितृणांकव्यवाहादीनांमध्येअर्यमाहंसंयमतांसंयमकुर्वतांम॰
ध्येयमोहं २९

रणवीरसमिद्धोधिनी॥

अनंतश्चेति नागानां काद्रवीयाणांमध्ये नंतनामानागराजोस्मि
तस्यैवसर्वाधारत्वादिति वरुणेति यादसांजलजंतूनां राजावरु
णोस्मि सर्वरसपोषकत्वादिति पितृणामिति पितरःपितृग॰
णास्तेषांमध्येर्यमनामापितृपतिरस्मि तत्कव्यवाहकत्वादिति
यमइति संयमतां संयमनशक्तिमतांयमोस्मि सर्वांतकत्वादिति २९

मधुभाष्य

२९॥

99

भाषाअनुवादटीका २९

नागो मे अनंत शेष नाग और जल जीवोमे वरुण राजा मैंहों औ पितरो मे अर्यमा तथा दंड कारियो मे यमराज हूँ मै जानो नाग औ सर्प मे यह भेद है कि विषरहित को नाग कहते है २९ ॥

दोहा

नागनमांहि अनंतहों वरुण जलचरमांहि पितरनमें हों
अर्यमा संयमी महिं यम आहि २९

100

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं मृ
गाणां च मृगेंद्रोहं वैनतेयश्च पक्षिणां ३० ॥

शंकरभाष्यटीका १

प्रह्लादइति प्रह्लादोनाम चास्मि दैत्यानां दितिवंश्यानां कालः कलय
तां कलनं गणनं कुर्वतामहं मृगाणां च मृगेंद्रः सिंहो व्याघ्रो वाहं वैन
तेयश्च गरुत्मान् विनतासुतः पक्षिणां पतत्रिणां ३० ॥

आनंदगिरिकृतटीका २

स्पष्टार्थं ३० ॥ ॥ ॥ ॥ ॥

स्वामिकृतटीका ३

प्रह्लादइति दैत्यानां राजा प्रह्लादोस्मि कलयतां वशीकुर्वतां गणय
तां वा मध्ये कालोहमस्मि मृगानां राजा मृगेंद्रः सिंहोहमस्मि ३० ॥

पिशाचभाष्यटीका ४

कलयतां विच्छेदितां ३० ॥ ॥

रामानुजभाष्यटीका ५

अनर्थापकतया गणनीयानां मध्ये कालोहं ३० ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३० ॥ ३० ॥ ॥ ॥

परमार्थप्रपा टीका ७

प्रह्लादइति दैत्यानां मध्ये प्रह्लादो मद्विभूतिः कलयतामाक्रमवतां
पदार्थानां मध्ये कालोहं मृगाणां श्वापदानां मध्ये मृगेंद्रः सिंहो मद्वि
भूतिः पक्षिणां मध्ये वैनतेयो विनतासुतः गरुडः ३० ॥

वनमालीटीका ८

दैत्यानां दितिवंश्यानां मध्ये प्रकर्षेण प्रह्लादयति परमसात्विकतया
न सर्वानिति प्रह्लादोहं कलयतां संख्यानां गणनं कुर्वतां मध्ये कालोहं
मृगेंद्रः सिंहः मृगाणां पशूनां वैनतेयो विनतापुत्रो गरुडः ३० ॥

ऋषमैवेनयंतीटीका ९

श्री· गी· टी· ३· किंच प्रल्हादश्चास्मि दैत्यानां दितिवंश्यानां मध्ये प्रल्हादः प्रकर्षेणका
ल्हादयतीति प्रल्हादः सर्वदा शीलादिसद्गुणैर्जनानाल्हादयत्यानन्दयतीति तथा सः प्रल्हा
दोऽहमेवास्मि कलयतामर्थानर्थप्रापकत्वेन यागणनीयानां सर्ववेत
नवस्तुवशीकुर्वतां मध्ये कालः परमाण्वादिपरार्द्धांतस्वरूपोऽहमेवा। हृ·
स्मि मृगाणां पशुजातीनां मध्ये तिक्रमेणान्हरीणां मृगेंद्रः सिंहः सोऽ
प्यहमेव पक्षिणां पक्षिजातीनां मध्ये विष्णुवाहनत्वेनोत्कृष्टतमो यो वै
नतेयो विनतापुत्रो गरुडः खगेश्वरः सोऽप्यहमेवास्मि अत्रचकारौ
पुनरर्थकौ विशेषार्थत्वस्याभावात् ३· ॥

मधुसूदनी टीका १०
दैत्यानां दितिवंश्यानां मध्ये प्रकर्षेणाल्हादयत्यानंदयति परमसात्विक
त्वेन सर्वानिति प्रल्हादश्चास्मि कलयतां संख्यानां गणानां कुर्वतां म
ध्ये कालोऽहं मृगेंद्रः सिंहः मृगाणां पशूनां मध्येऽहं वैनतेयः विनता
पुत्रो गरुडः पक्षिणामस्मि ३· ॥

सदानंदी टीका ११
दितिवंशोद्भवानां च प्रल्हादोऽस्मि सतांवरः गणनं कुर्वतां मध्ये कालो
ऽहं सर्वविद्धरः मृगाणां मृगराजोऽहं पक्षिणां विनतासुतः ३· ॥

नीलकंठी टीका १२
कलयतां गणनं कुर्वतां ३· ॥

ज्ञानंदी टीका
कलयितृत्वं गणयितृत्वं प्रवृत्तिमात्रा इति हेतुमति णिच् कलयतां तः योऽयं पर्या तिलिचु
योगपर्यायविरलिप्रमत्यथाः मुहूर्तदिन पक्षादयो वा तेषां मध्ये कालोऽहं ३·

रामकंठी टीका [illegible] ३· स्पष्टार्थम्

लासिकी [illegible] टीका
कलयतां गणयतां यम ऐव रूपांतरभूतः कालोऽहं मृगाणां पशूनां
मृगेंद्रः सिंहः ३·

पंचोलीटीका

पुनः दैत्यानां मध्ये प्रह्लादोहं कलयतां वशीकुर्वतां कालोहं च पुन :
मृगाणां मध्ये मृगेंद्रो सिंहोहं च पुनः पक्षिणां मध्ये वैनतेयो गरुडोहं ३०

शणवीरसमिहोथिनी॥

प्रह्लाद इति दैत्यादितिपुत्रास्तेषां मध्ये प्रह्लादोस्मि तस्य हि भग
वद्भक्तत्वादिति काल इति कलयंतः कलसंख्याने इति धातोर्ग
णयंतो यत्नादिगणकास्तेषां कलनात्मकः कालः संवत्सरात्मा
स्मि तथैवं सर्गादिप्रमाणकलनास्थितेरिति मृगाणां चेति मृगा
प्रशरणकास्तेषां राजा सिंहोस्मि तस्याधिमदंष्ट्रत्वादिति तथा पक्षि
णां पक्षघातानां च राजा वैनतेयो विनतासुतस्तत्वामास्मि मदाश्रभूत
त्वादिति ३०॥

मधुभाष्य

३०॥

भाषाअनुवादटीका ॥

दैत्यो मे प्रह्लाद मै हौं और वश करने वालो मे अथवा संख्याने कालमै हौ मृग जाति मे मृगेंद्र कहे सिंह मै तथा पक्षियों मे गरुड मै हौ ॥

दोहा

दैत्यन मांहि प्रहलाद हों गणकन मांहि अनेह मृगन मां
हि मृगराज हों गरुड हि पक्षिन मेंह ३०॥

103

पवनः पवतामस्मि रामः शस्त्रभृतामहं झ
षाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ३१

शंकरभाष्यटीका १

पवनो वायुः पवतां पावयितॄणां अस्मि रामः शस्त्रभृतामहं श
स्त्राणां धारयितॄणां दाशरथी रामोऽहं झषाणां मत्स्यादीनां मकरो
नाम जातिविशेषोऽहं स्रोतसां स्रवंतीनामस्मि जाह्नवी गंगा ३१ ॥

आनंदगिरिकृतटीका २ स्पष्टार्थं ३१

[illegible]

स्वामिकृतटीका ३ मध्ये

पवन इति पवतां पावयितॄणां वेगवतां वा वायुरस्मि शस्त्रभृतां वीरा
णां रामो दाशरथिः यद्वा परशुरामः झषाणां मत्स्यानां मध्ये मकरो
मत्स्यविशेषोऽहं स्रोतसां प्रवाहोदकानां मध्ये भागीरथी गंगाहमस्मि
३१ ॥

पिशाचभाष्यटीका ४

पवनो गच्छतां रामो दाशरथिरहं झषा हि स्वजलचराः ३१ ॥

रामानुजभाष्यटीका ५

पवनः पवनस्वभावानां वायुरहं शस्त्रभृतां रामोऽहं नतमः सौवि
भूतिविन्यस्थः अर्थांतराभावात् आदित्यादेः देवत्वेनावस्थितस्य
स्य भगवतः शरीरतया धर्मित्वमिति शस्त्रभृत्त्वमात्रमत्र नतस्यानी
यं ३१ ॥

अभिनवगुप्तकृतटीका ६

॥ ॥ ॥ ॥

स्पष्टार्थं ३१ ॥

परमार्थप्रपाटीका ७

श्री॰ गी॰ टी॰ द॰

१०५

पवन इति पवतां वेगवतां मध्ये पवनः शस्त्रभृतां वीराणां मध्ये रामो
दाशरथिरहं झषाणां मत्स्यानां मध्ये मकरो यादोविशेषः स्रोतसां प्र
वाहाणां मध्ये जाह्नवी मद्विभूतिः ३१ ॥

वनमाली टीका ८

पवतां पावयितॄणां वेगवतां वा पवनो वायुरहं शस्त्रभृतां शस्त्रका
रिणां युद्धकुशलानां मध्ये रामो दाशरथिरहं साक्षात्स्वरूपस्याप्य
नेन रूपेणाचिंतनार्थं हसीनां वा स्वदेवो स्मीं वदत्यपाठः झषाणां मत त्ति
स्यानां मकरो नाम जातिविशेषः सोहं स्रोतसां वेगेन चलनवतां ना वती
दीनां मध्ये जाह्नवी गंगाहं ३१ ॥

कुसुमवैजयंती टीका ९

किंच पवन इति पवतां वेगवतां पावयितॄणां वा मध्ये पवनो वायुरहमे
वास्मि शस्त्रभृतां शस्त्रधारिणां युद्धकुशलानां वीराणां मध्ये निरतिशा
ग्र यं शस्त्रधारी निरतिशययुद्धकुशलोऽतिवीरशिरोमणिः रघुकुलकमलप्र
द्यु रामो दाशरथिरहमेवास्मि अत्र शस्त्रभृत्स्वरूपायमेव विभूतिर्न तु स्व
रूपायत्तोस्यादित्यादिवज्जीवत्वाभावेन विभूतिमत्तान्यथ्य पवनाभावात्
यद्वा रामः परशुरामो बलरामो वा नयोः तेनजत्वाविशेषाद्विभूति
त्वसंभवन्येवं झषाणां मत्स्यानां मध्ये मकरो मत्स्यजातिविशेषो हमेवा
स्मि स्रोतसामतिवेगवज्जलानामतिपवित्रनीरवाहानां नदीनां मध्ये
जाह्नवी जह्नुपुत्री गंगाहमेवास्मि ३१ ॥

मधुसूदनी टीका १०

पवतां पावयितॄणां वेगवतां मध्ये पवनो वायुरहमस्मि शस्त्रभृतां शा
स्त्रधारिणां युद्धकुशलानां मध्ये रामो दाशरथिरखिलराक्षसकुलक्षय
करः परमवीरोहमस्मि साक्षात्स्वस्वरूपस्याप्यनेन रूपेणाचिंतनार्थं ह
सीनां वा स्वदेवो स्मीति वदत्यपाठ इति प्रागुक्तं झषाणां मत्स्यानां मध्ये
मकरो नाम मत्स्यजातिविशेषोस्मि स्रोतसां वेगेन चलज्जलानां मध्ये सर्वन
दीश्रेष्ठा जाह्नवी गंगाहमस्मि ३१ ॥

सदानंदी टीका ११

पवनः पावयितॄणां सर्वप्राणिकलेश्वरः शस्त्रास्त्रधारिणां मध्ये रा
मो दाशरथिर्विभुः १ सर्वरत्नः कुलध्वंसी महावीरो हमीश्वरः साक्षा
द्विष्णुस्वरूपस्थानेन रूपेणादेहितो २ चिंतनार्थं दाशरथिः पादोनेषो
विभूतिषु ३ यत्नः पाणीरत्नः कुलवनदवाग्निर्हि जगतिः प्रतापी सो
श्रिष्टाजनकतनयावाहूलनया शरच्चंद्राकारे स्मिन मधुरवक्रामृत
रुहृदयानो ध्येयो सौ रघुकुलरविर्लक्ष्मणसखः ४ कृतज्ञो मेधावी
स्मृतिधृतिनिधिः शांतिजलधिः कृपासिंधुर्वीरो निरवधिसुखागारच
दवः प्रभुर्लावण्याब्धिर्दशरथकुमारोऽभयदः सदाध्येयो हीश्वरघु
कुलहिमांशुः स हृदये ५ अनेकमत्स्यजातीनां मकराख्यो हमीश्वरः च
हि^ लजलानां वेगेन गंगाहं सरितां वरा ६ ३१ ॥

नीलकंठीटीका १९

पवतां पावयितॄणां वेगवतां वा रामो दाशरथिः रामादीनां परमेश्वा
राणामपि विभूतिमध्ये गणनं ध्यानार्थं झषाणां मत्स्यादीनां मकरो
जातिभेदः स्रोतसां नदीनां ३१ ॥

आनन्दीटीका

प्रवतां वेगवतां ३१

रामकंटीटीका सुगमं ३१ स्पष्टार्थम्

लासिकी [redacted]टीका

पवतां पावयितॄणां वेगवतां वाश्री रामो दाशरथिः झषाणां
मत्स्यानां मकरो मत्स्यविशेषः स्रोतसां प्रवहज्जलानाम् ३१

पंचोलीटीका

पवतां पावयितॄणां वेगवतां मध्ये पवनो वायुरहं शस्त्रभृतां
मध्ये रामो दाशरथिरहं च पुनः झषाणां मकरोहं स्रोतसां नदी
नां मध्ये गंगाहं ३१

पवनइति पवतांपावयितॄणां पवनः पावयितास्मि जगत्त्रा
णत्वादिति तथा शस्त्रभृतांधनुष्मतांमध्ये रामः परशुरामो
स्मि मद्रूपत्वादिति झषाणामिति झषास्तिमिंगिलादयस्ते
षांमध्येमकरोमकरनामामत्स्योस्मि प्रवतारमूर्तित्वादिति
तथास्रोतसांस्रवंतीनांमध्येजाह्नवीजह्नुकन्यागंगास्मिलो
कत्रयपावनत्वादिति ३१॥

मधुभाष

३१॥

औरपवित्र तथा वेगवानो मेपवन कहे वायु औशस्त्रधारियोमे रा
म दशरथके पुत्र हमको जानो तथा मछलियो मे मकर नाम मत्स्य
मैहो और स्रोत कहे प्रवाहरूप नदियों मे जान्हवी गंगा भीमैहो ३१

दोहा

पवन पवित्रन मांहिहों रामहि शस्त्रीन मेंह झषनमांहि
में मकरहों नदीमहिं गंगा पद ३१॥

108

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन अध्या
त्मविद्या विद्यानां वादः प्रवदतामहं ३२ ॥

शांकरभाष्यटीका १

सर्गाणामिति सर्गाणां सृष्टीनां आदिरन्तश्च मध्यं चैवाहमुत्प
त्तिस्थितिलयानां अहमर्जुन भूतानां जीवाधिष्ठितानामेवादिरन्तश्चेत्या
द्युक्तमुपक्रमे इह तु सर्वस्यैव सर्गमात्रस्येति विशेषः अध्यात्मविद्या वि
द्यानां मोक्षार्थत्वात् प्रधानमस्मि वादोर्थनिर्णयहेतुत्वात् प्रवदतां प्र
धानमतः सोहमस्मि प्रवक्तृद्वारेण वदनभेदानामेव वादजल्पवितं
डानामिह ग्रहणं प्रवदतामिति ३२ ॥

आनंदगिरिकृतटीका २ + अहमादिश्चेत्यादावुक्तमेव पुनरिहोच्यते तथाच पुनरुक्ति

[illegible] ३२ रित्याशंक्याह भूतानामिति सर्गशब्देन सृज्यंत इति सर्वाणि कार्याणि गृह्यंते अध्यात्मविद्येति
आत्मन्यंतःकरणपरिणतिरविद्यानिवर्तिका गृहीता प्रवदतां
संबंधी वादो वीतरागकथा तत्त्वनि
र्णयावसाना यदा प्रवदतामि
लक्षणया कथाभेदोपादानं त
दा निर्धारणे षष्ठीत्याह प्रवक्त्र
ति ३२ ॥

स्वामिकृतटीका ३

सर्गाणामिति सृज्यंत इति सर्गाः आकाशादयः तेषामादिरंतश्च
मध्यं चाहमस्मि अहमादिश्च मध्यं चेत्यत्र सृष्ट्यादिकर्तृत्वपारमेश्वर्य
के अत्र तूत्पत्तिप्रलयस्थितयो मद्विभूतित्वेन ध्येया इत्युच्यत इति विशे
षः अध्यात्मविद्या आत्मविद्या प्रवदतां वादिनां संबंधिनो वादजल्पवि
तंडाख्यास्तिस्रः कथाः प्रसिद्धास्तासां मध्ये वादोहं यत्र द्वाभ्यामपि प्रमाण
तस्तर्केण च स्वपक्षः स्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्य
ते स जल्पो नाम यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रह
स्थानैस्तत्पक्षं दूषयति न तु स्वपक्षं साधयति सा वितंडा नाम अत्र ज
ल्पवितंडे विजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले वाद
स्तु वीतरागयोः शिष्याचार्ययोरन्ययोर्वा तत्त्वनिर्णयफलः अतो
सौ श्रेष्ठत्वान्मद्विभूतिरित्यर्थः ३२ ॥

पैशाचभाष्यटीका ४

सर्गाणां सृष्टीनामादिरंतश्च मध्यं च सृष्टिस्थितिसंहारः प्रवदतां संबंधि
वादोहं प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः
पक्षप्रतिपक्षपरिग्रहो वादः ३२ ॥

श्री· गी· टी· द· (10)

रामानुजभाष्यटीका ५

सृज्यंत इति सर्गाः तेषामादिः कारणं सर्वदा सृज्यमानानां सर्वेषां स्रष्टा।
णांतोनंतकस्तस्रष्टाहमेवेत्यर्थः तथा सर्वदा संह्रियमाणानां संहर्ता अ-
हमेव मध्यं पालनं सर्वदा पाल्यमानानां पालयिता रक्षिताहमेवेत्यर्थः जल्प-
वितंडादिकुर्वतां तत्वनिर्णयप्रवृत्तो वादोयः सोहं ॥ अध्यात्मविद्या श्रेयः
साधनभूतानां विद्यानां मध्ये परनिःश्रेयससाधनभूता विद्याहमस्मि ३२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३२ ॥ ॥ ॥

परमार्थप्रपा टीका ७

सर्गाणामिति सृज्यंत इति सर्गा आकाशादयस्तेषामादिर्मूलमंतः पर्य-
तः मध्यं स्थितिरहमेव विद्यानां चतुर्दशानां मध्ये आत्मप्रतिपादिका अध्या-
त्मविद्याहं अध्यात्मविद्यायाः संसारासमताभिनिवेशेन ममत्वादिजनकत्वात् तदुक्तं
रे मनस्त्वं जीव वत्सरशांतं येन त्वया निर्जितं शास्त्राणामिदमूर्जितं तपनतः व
देशाविच्छिन्नये यस्मात्कुतज्ञामपास्य वक्तृक्याः संमायया स्वयमात्मासौ यस्मा
प्रविष्टं मतं परमतच्छेदं कथं कुर्वते किंत्व हंत्वत्तानं सद्रूपावरवमिव रवेःस्फु-
रदंकं वाग्वरं हंकाम्मुक्तो यादि यस्मादुपरमति शनैः ग्रीष्मकालात्मृदीव हृदि-
स्थो यप्रसादः तीमसमर्थियोस्याः कलानामिवेदोर्वक्ता ग्राप्यस्पहांदें जगति
विजयतेसेयमध्यात्मविद्येति अनपवाह वादः प्रवदतामिति प्रवदतां पर-
स्परं विवादजल्पवितंडारूपाः कथाः कुर्वतां मध्ये तत्वबुभुत्सोः कथा वादरूपो
वादोहं ३२ ॥

वनमालीटीका ८

सर्गाणामचेतनसृष्टीनामादिरंतश्च मध्ये चोत्पत्तिस्थितिलयस्थानमहमि-
त्यर्थः भूतानां जीवाविष्टानां चेतनसृष्टीनामेवादिरंतश्च मध्यं चेत्यु-
क्तमुपक्रमे इहत्वचेतनवर्गाणामिति न पौनरुक्त्यं विद्यानां मध्ये अध्यात्म-
विद्या मोक्षहेतुरात्मतत्वविद्याहं प्रवदतां संबंधिनां कथाभेदानां वादजल्प-
वितंडात्मकानां मध्ये वादोहं यद्वा प्रवदतां संबंधी वादोहमित्यर्थः सवा-
दी तत्वनिर्धारणेनोपयाकृतमेव साधु तयतत्वबुभुत्सोर्वीतरागयोः
सतोः शिष्ययोर्गुरुशिष्ययोर्वा प्रमाणेन तर्केण च साधनदूषणाभ्यां पक्षप्रति-
पक्षपरिग्रहस्तत्वनिर्णयपर्यंतो वादः वादफलस्य तत्वनिर्णयस्य रक्षे-

रूपत्वादिति तत्करणेन संरक्षणार्थं विजिगीषुकथैव जल्पवितंडे जयपरा।
जयपर्यंते तदुक्तं तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितंडे बीजप्ररोहसं
रक्षणार्थं कंटकशाखावरणवदिति छलजातिनिग्रहस्थानैः परप
क्षो दूष्यत इति जल्पवितंडयोः समानं तत्र वितंडायामेकेन स्वपक्षः स्था
प्योऽन्येन दूष्यः जल्पे तूभाभ्यां स्वपक्षः स्थाप्य उभाभ्यामेव परपक्षो दूष्य इति।
विशेषः तदुक्तं छलजातिनिग्रहस्थानसाधनोपालंभो जल्पः स प्रति।
पक्षस्थापनाहीनो वितंडेति ३२ ॥

कृष्णमवैजयंतीटीका ५

किंच सर्गाणामिति हे अर्जुन सृज्यन्त इति सर्गा महदादयस्तृणपर्यंता अचे
तनसृष्टिरूपास्तेषां सर्गाणामादिः कारणमहमेवास्मि मध्यं पालनं चा
हमेवास्मि अंतः संहाररूपश्चाहमेवास्मि तेषां सृष्टिस्थितिप्रलयरूपा
मैव विभूतय इति विजानीहीत्यर्थः अहमादिश्च मध्यं च भूतानामंत एव
चेत्यादौ चेतनाधिष्ठितानामेव भूतानामादिर्मध्यं चांतश्चाहमेवेत्युक्तमत्र
त्वचेतनमात्राणामेव सृष्ट्यादिहेतुरहमित्युक्तमतो न पुनरुक्तिदोषः अं
गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः धर्मशास्त्रं पुराणं च विद्या ह्येता
श्चतुर्दशेति स्मृत्युक्तानां चतुर्दशविद्यानां मध्ये ऽध्यात्मविद्या सपरिकरप
रमात्मतत्त्वनिर्णायी वेदांतविद्या मोक्षसाधनरूपाऽहमेवास्मि प्रवदतां वा
दजल्पवितंडाख्या लोकप्रसिद्धास्तिस्रः कथाः कुर्वतां मध्ये वादिनां सं
बंधी यो वादः सोऽप्यहमेवास्मि तत्र वादो नाम विवदमानयोर्वीतरागयो
र्गुरुशिष्ययोरन्ययोर्वा चेतनाचेतनतत्त्वस्वरूपनिर्णयात्मकः सिद्धांत
कथारूपकः यत्र च विवदमानाभ्यामुभाभ्यामपि प्रमाणेन तर्कयुक्त्यादि
ना च स्वपक्षः स्थाप्यते छलजातिनिग्रहस्थानैश्च परपक्षो दूष्यते सोऽभय
साधनवती विजिगीषुकथा जल्पो यत्र तु स्वपक्षं न साधयति अथ परस्यापि
तत्पक्षं छलजातिनिग्रहस्थानैर्दूषयति सा स्वपक्षस्थापनहीना परप
क्षदूषणावसाना कथा वितंडा तत्र प्रवृत्तो विजिगीषोर्जल्पवितंडारूप रू. जी
योरुभयोरपि शक्तिपरीक्षामात्रफलत्वेन निष्फलत्वान्न विभूतिस्वभा
वः वादस्तु तत्त्वस्वरूपनिर्णयफलकत्वेन तदुक्तेरात्मविभूतित्वमुपपन्न
मेवेत्यर्थः ३२॥

मधुसूदनी टीका ॥

सर्गाणामचेतनसृष्टीनामादिरंतश्चमध्यंचोत्पत्तिस्थितिलयाअहमेवा-
हमर्जुन अहमादिश्चमध्यंचभूतानामित्यत्र भूतानांजीवाविष्टानांचेत
नत्वेनप्रसिद्धानामेवादिरंतश्चमध्यंचोक्तमुपक्रमे इहत्वचेतनसर्गाणा
मितिनपौनरुक्त्यं विद्यानांमध्ये अध्यात्मविद्यामोक्षहेतुरात्मतत्वविद्याहं
प्रवदतांप्रवदनसंबंधिनांकथाभेदानांवादजल्पवितंडाख्यानांमध्येवा-
दोहंभूतानामस्मिचेतनेत्यत्रयथाभूतशब्देनतत्संबंधिनःपरिणामलक्षि
ताः तथैवप्रवदच्छब्देनतत्संबंधिनःकथाभेदालक्ष्यंतेअतोनिर्धारणोपप-
त्तिः यथाश्रुतेतुमयत्रापिसंबंधीषष्ठी तत्रतत्वबुभुत्सोःवीतरागयोः
सब्रह्मचारिणोः गुरुशिष्ययोर्वाप्रमाणेनतर्केणचसाधनदूषणात्मा
कप्रतिपक्षपरिग्रहस्तत्वनिर्णयपर्यंतोवादः तदुक्तं प्रमाणतर्कसाधनोपा
लंभः सिद्धांताविरुद्धःपंचावयवोपपन्नःपक्षप्रतिपक्षपरिग्रहोवादइ
तिवादफलस्यतत्वनिर्णयस्यउद्भूतकुवादिनिराकरणेनसंरक्षणार्थंवि
जिगीषुकथेजल्पवितंडेजयपराजयमात्रपर्यंते तदुक्तंतत्वाध्यवसाया-
संरक्षणार्थंजल्पवितंडेबीजप्ररोहसंरक्षणार्थंकंटकशाखावरण
वदिति छलजातिनिग्रहस्थानैःपरपक्षोदूष्यतेइति इतिजल्पवितंड
योःसमानेतत्रवितंडायामेकेनस्वपक्षःस्थापितएवअन्येनचसदूष्यते-
एव जल्पेतुउभाभ्यामपिस्वपक्षःस्थाप्यते उभाभ्यामपिपरपक्षोदूष्य-
तइतिविशेषः तदुक्तं यथोक्तोपपन्नछलजातिनिग्रहस्थानसाधनोपा
लंभोजल्पःसप्रतिपक्षस्थापनाहीनोवितंडाइति अतोवितंडाद्वयश
रीरवाजल्पोनामैकाकथा किंतुशक्त्यतिशयज्ञानार्थंसमयबंधमा
त्रेणप्रवर्ततइतिविद्वत्काराः तत्वाध्यवसायपर्यवसायित्वेनतुवादा-
स्यश्रेष्ठत्वमुक्तमेव ३२ ॥

सदानंदी टीका ॥

जन्मस्थितिलयाः सर्वसृष्टीनामहमर्जुन जीवाधिष्ठितभूतानांपूर्व
मुक्तमुपक्रमे १ अध्यात्मविद्याविद्यानांमोक्षहेतुरहंहरिः वादजल्प
वितंडानांमध्येवादोहमीश्वरः २ तत्वनत्वबुभुत्सोर्वाशिष्यदेशिकयोः ।

स्तर्था प्रमाणेनवतर्केणा साधनैर्हूषणैंतथा तत्वनिर्णयपर्यंतः पक्ष
हयपरिग्रहः वादः स्वाछ्यास्वसिद्धांतविर्णीपेहेतरत्नमः ४ विजिगीषु
कथेजल्पवितंडेभ्यांतिशालिनां मयाजयफलेलोकप्रतिष्ठा हेत
के ५ यत्रैकेनस्वकः पक्षः स्थाप्यतेहूष्यतेपतः सावितंडाकथालोया
लौकिकीचान्तरीफला ६ सपक्षःस्थाप्यतेजल्पउभाभ्यामेवयुक्तिभिः
हूष्यतेपरपक्षश्चविशेषोयंतयोर्द्वयोः ७ ३२॥

नीलकंठी टीका ९

सर्गाणांभौतिकानांमूतानामादिरंतश्तिप्रागेवोक्तत्वात् विद्यानांवा
त्त: देशसंख्यानांमध्येअध्यात्मविद्यावंधच्छेदहेतत्वात् प्रव
दतांप्रवक्तृहारेणावदनभेदाएववादजल्पवितंडाश्चहगृह्यंते तेषांमध्ये
वादस्तत्वनिर्णयार्थत्वादहं ३२ ॥

आनंदीटीका

सर्गाणांसृष्टिक्रमाणाम् पक्ष हमादिरित्यादिसार्धकंतस्यतनानांपुरु
षाणामेवलयाश्चहन्तक्रियांमवेतनामपेक्षेत्यपोनरुक्त्यम् प्रव
दतांवादप्रकर्षप्रतिपादयतांवाक्यानांवादजल्पवितं डारूपाणांमध्ये
वादोवादलक्षणांवाक्यमस्मितयाचप्रशस्तम् वादोनामवीतरागयोःपर
वादेवादलक्षणांवाक्यमस्मितयाचप्रशस्तम्
तप्रतिपक्षपरिग्रहपूर्वकः प्रमाणतर्कपूर्वकसाधनोपालंभप्रयोगक्रि
प्रमाणेएकतरपक्षनिर्णयावसानोवाक्यसमूहः ३२॥

रामकंठीटीका उपक्रमं ३२ स्पष्टार्थम्

लासिकी [redacted]टीका

सर्गाणांस्थूलदेहपरिग्रहाणामादिः संकुचितरूपाप्रागवस्था अ
न्तः संकुचद्रूपामरणावस्था मध्यंप्रसरद्रूपाजीवदवस्थाहमेवेश्वरो
हंतालक्षणविभूतित्वेनस्थितः अध्यात्मविद्यात्मनिर्णयाधिकारि
णीविद्या प्रवदतांजल्पवितंडादिप्रयोक्तृणांवादस्तत्वनिर्णयमात्र
फलः ३२

पंचोलीटी का

गी॰
टी॰
८

हेअर्जुनसर्गाणांसृष्टीनांआदिरंतेंमध्यउत्पतिनाशस्थितयः
अहेविद्यानांमध्येअध्यात्मविद्याअहंप्रवदतांवचनानांकथानां
मध्येवादोहंवीतरागकथावादः विजिगीषुकथाजल्पः सजल्प
पवस्वपक्षस्थापनाहीनोवितंडा ३२

रणवीरसमिद्धोधिनी ।।

सर्गानामिति सर्गाणांभूतभौतिकादीनामादिमध्यमंतश्चास्मि
विश्वंभरत्वादिति अध्यात्मविद्येति विद्यास्वष्टदशानांतासांमध्ये
अध्यात्मविद्यातत्त्वविवेकोस्मि मोक्षसिद्धेःसाधनत्वादिति त
था प्रवदतां प्रकर्षेणान्योन्यवितर्कस्थापनकृतप्रयासानां
वितर्कवादिनांवादः प्रधानभूतनिश्चितार्थनिर्णीतोस्मिभुक्तोह
मिति निश्चयादिति ३२।।

मधुभाष्य

३२।।

109

भाषाअनुवादटीका ३२

सर्ग कहे आकाशादि पदार्थोमे आकाश जो आदि मध्य अंतमे स
दा वर्तमान सो मै हो अथवा सृष्टिमे आदि मध्य अंत मै हूं तथा हे
अर्जुन विद्यो मे अध्यात्म विद्या औ अवाद करने वालो के वीच वादरू
पमै हो जिससे सिद्धांत पदा थिर होता है ३२ ॥

दोहा

आदित्य मध्यओ अंत यह सृष्ट मांहि नरहौंहु विद्यामांहि
अध्यात्म हो वादहि वादिन कोंहु ३२॥

110

अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च अ
हमेवाक्षयः कालो धाताहं विश्वतोमुखः ३३

शंकरभाष्यटीका १

अक्षराणामिति अक्षराणां वर्णानामकारोवर्णोस्मि द्वंद्वः समासो
स्मि सामासिकस्य समाससमूहस्य किंच अहमेवाक्षयोऽक्षीणः का
लः प्रसिद्धः क्षणलवाख्यः अथवा परमेश्वरः कालस्यापि कालोस्मि धाता
हं कर्मफलस्य विधाता सर्वजगतो विश्वतोमुखः सर्वतोमुखः ३३ ॥

आनंदगिरिकृतटीका २ स्पष्टार्थं ३३

[illegible]

स्वामिकृतटीका ३

अक्षराणामिति अक्षराणां मध्ये अकारोस्मि तस्य सर्ववाङ्मयत्वेन श्रेष्ठत्वात् त वह्नी
था च श्रुतिः अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भव
तीति सामासिकस्य समाससमूहस्य मध्ये द्वंद्वः रामकृष्णावित्यादिसमा
सोस्मि उभयपदप्रधानत्वेन श्रेष्ठत्वात् अक्षयः प्रवाहरूपः कालोहमेव का
लः कलयतामित्यत्रायुर्गणनात्मकः संवत्सरशतायाद्यरूपः काल उक्तः
सवतस्मितायुर्विक्षीणोस्मतिक्षयितेत्रप्रवाहात्मकः अक्षयः काल उच्यते
इति विशेषः कर्मविधातॄणां मध्ये विश्वतोमुखो धाता सर्वकर्मफलधा
ताहमित्यर्थः ३३ ॥

पिशाचभाष्य टीका ४

समासेभवस्सामासिकः द्वंद्वः धाता कर्मफलभावनादिः ईश्वरो विश्व
तोमुखः विश्वरूपः ३३ ॥

रामानुजभाष्यटीका ५

अक्षराणां च मध्ये अकारः अकारो वै सर्वा वागिति श्रुतेः सर्ववर्णानां प्रकृति
रकारश्चाहं समासानां समूहः सामासिकः तस्य मध्ये द्वंद्वसमासोहं सह्युभ
यपदप्रधानत्वेनोत्कृष्टः कालः कलामुहूर्तादिमयोयः सोहं सर्वस्य प्राणि
मात्रस्य धातानामन्तीहमेव ३३ ॥

अभिनवगुप्तकृतटीका ८

स्पष्टार्थं ३३ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अक्षराणां मध्ये वर्णानां मध्ये अकारः प्रथमस्वरत्वस्य सर्वेमातृभूतत्वा
त् स चाहं सामासिकस्य तत्पुरुषादिसमाससमूहस्य द्वंद्वो नामक समासो वि
प१ उभयपदप्रधानोहं अक्षयोऽनादिनन्त्यादित्यपरिस्पंदोत्पन्नमुहूर्तादिमहाप्र
लयान्तः कालोहमेव विश्वतोमुखो विराड्धाता कर्मफलदाता ३३

वनमाली टीका ८

अक्षराणां अकारोहं अकारो वै सर्वा वागिति श्रुतेः सामासिकस्य समास
समूहस्य मध्ये द्वंद्वः उभयपदप्रधानोहं त्रुटिकालाभिमानी अक्षयः
परमेश्वराख्यः कालोन्तः कालोऽसगुणी सर्वविद्य इत्यादिश्रुतिप्रसिद्धो
काल: हं कल यतामित्यक्षयीकाल उक्तः कर्मफल विधातॄणां मध्ये वि
श्वतोमुखः सर्वतोमुखो धाता सर्वकर्मफलदानेश्वरोहं ३३ ॥

उत्तमवैजयंती टीका ९

किंच अक्षराणामिति अक्षराणां सर्वेषां वर्णानां मध्ये सर्ववर्णात्मको
र योऽकारः सोऽहमेवास्मि तस्य सर्ववाङ्मयत्वात् तथा च अकारो वै सर्वा वाक् से
षा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति समासानां समूहस्सा
स१ मासिकस्तस्य सामासिकस्य समाससमूहस्य मध्ये यो द्वंद्वसमासः सोऽह
मेवास्मि अव्ययीभावतत्पुरुषबहुव्रीहिषूभयपदप्रधानाद्द्वंद्वस्य मध्ये ना
स्येवोभयपदप्रधानत्वेन श्रेष्ठत्वात् अक्षयो विनाशरहितः कालो मुहूर्ता
दिमयोयः सर्वेषां संहर्तॄणां मध्ये कालः समयस्सोऽप्यहमेवास्मि कालः कल म
यतामहमित्यत्रगसंवत्सरादिपरिमितः काल उक्तः तन्त्वयं सततस्था
पित्वाय स्यात् इत्यत्र प्रवाहात्मकोऽखंडदण्डायमानरूप उच्यते दायत्ववि

शेषणादनेन पुनरुक्तिदोषः यद्वा सर्वसंहर्तॄणां मध्ये यः संकर्षणा।
ख्यो ब्रह्मणि लयो निवासो यस्मात्सावक्षयः नास्ति क्षयो यस्येति वाऽक्षय
रूपसंकर्षणोऽस्मि तत्वेन तस्याप्यक्षयत्वं संभवत्येव सर्वेषां स्रष्टॄणां मध्ये।
विश्वतोमुखस्सर्वतोमुखो यो धाता ब्रह्मा सोप्यहमेवास्मि अन्योयः कश्चि
द्धातृनामा तस्य व्यावृत्यर्थं विश्वतोमुख इति विशेषणं ३३ ॥

मधुसूदनी टीका ९

अक्षराणां सर्वेषां वर्णानां मध्ये अकारोऽहमस्मि अकारो वै सर्वा वागिति
श्रुतेः तस्य श्रेष्ठत्वं प्रसिद्धं द्वंद्वः समास उभयपदार्थप्रधानः सामासिक
स्य समाससमूहस्य मध्येऽहमस्मि पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरप
ॱर्थ दार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिरिति तेषामुभयपदा
र्थसामर्थ्याभावेनापकृष्टत्वात् क्षयीकालाभिमानी अक्षयः परमेश्वराख्यः
[illegible] कालोऽक्षः कालकालो गुणी सर्वविद्यादिश्रुतिप्रसि। ॱविश्व
द्धोहमेव कालः कलयितामित्यत्र क्षयीकाल उक्त इति भेदः कर्मफलवि
धातॄणां मध्ये विश्वतोमुखः धाता सर्वकर्मफलदाने ईश्वरः सर्वतोमुखोऽह
मित्यर्थः ३३॥

सदानंदी टीका ११

वर्णानां सर्ववाग्रूपतयाकारः श्रुतेर्मतः समासस्य समूहे द्वंद्वो द्वंद्वोऽस्मु
भयतो वरः १ कालोऽहं परमेशाख्यः कालकालोऽक्षयः परः क्षयीकाला
भिमानी यः पूर्वोक्तः स विलक्षणः २ धाताहं सर्वतः पूर्णप्राणिकर्मा।
फलप्रदः ३३ ॥

नीलकंठी टीका १२

अक्षराणां मध्ये अकारः अकारो वै सर्वा वागिति श्रुतेः सामासिकस्य स
मासस्समुदायस्य मध्ये द्वंद्वोऽस्मि उभयपदार्थप्रधानत्वादिति प्राचः सं
नं१ एकवाक्स्समासो विदुषां वा गुरुशिष्याणां वा मेयार्थकथनार्थं वा एकत्रा
वस्थानं तत्र विदितमर्थं ज्ञातं सामासिकं चान्तरार्थिकमुक्तकूटस्यैकत्वेनैकादे
शः यस्येति वेत्यलोपः तस्य मध्ये द्वंद्वो रहस्यार्थोऽहं द्वंद्वरहस्यमिति स्हेरो।
द्वंॱ हं शाब्दस्य रहस्यवाचित्वं शाब्दिकप्रसिद्धं अक्षयः क्षयहीनः कालः क्ष

श्री॰ गी॰ टी॰ द॰

क्षणादिः परो वा ईश्वरः कालस्यापि कालोऽस्मि धाता कर्मफलप्रदः विश्वतोमुखः
सर्वत्राणितत्वात्सर्वत्यामीत्यर्थः ३३ ॥

ग्यानेरीटीका

सर्वेषामक्षराणामकारोऽस्मि तेप्रथमाप्रकृतिरकारपर्वव्यंजनानां तथाग्रा
प्रदः स्वरहीनानामनुच्चार्यत्वात् सामासिकस्य समासस्य समूहस्य मध्ये
द्वंद्वः उभयपदप्रधानत्वात् अक्षयः कालः सर्गप्रलययोर्गणयिताल
त्रि॰ वितां आकथाता सर्वकर्मफलानां सर्वतोमुखो विधाता सर्वेषु कर्म
फलदातृत्वमरवंसोम्माख्येयस्मेहशः सर्वेषां कर्मफलदातृणां मध्ये हं
मुख्यो धाता ३३

रामकंठीटीका अपक्रमे ३३ स्पष्टार्थम्

लासिकी टीका

अकारस्य सर्ववर्णेषु व्यापकत्वमाह श्रुतिः अकारो वै सर्वा वाग् एषा
स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति अक्षयः प्रवाहरूपे
णकालो ब्रह्मसूचकसूर्यवंशाद्यनपेक्षकः अक्षयत्वव्याप्तिहेतुः कालो
हम् अतीतानां भाविनां वा परमेष्ठिनां धातृत्वव्याप्तिहेतुरहम् विश्व
तोमुखश्चतुर्मुखो द्योतनो धाता विभूतित्वेन स्थितः ३३

पंचोलीटीका

अक्षराणां वर्णानां मध्ये अकारोऽहं च पुनः सामासिकस्य समा
ससमुदायस्य द्वंद्वोऽहं अक्षयः अक्षीणः कालः क्षणादिः परमे
श्वरो वा अहमेव विश्वतोमुखो चतुर्मुखः धाता ब्रह्माहम् ३३

रणवीरसिंहोद्योतिनी ॥

अक्षराणामिति अक्षराणि नक्षरंति तेभ्यः वंते स्वरूपादिति व्युत्पत्त्या
वर्णाः अक्षररूपाणि मंत्राणि तेषां मध्ये अकार मंत्रोऽस्मि सर्वमं
त्रमूलत्वादिति द्वंद्व इति समासिकस्य समासकृतानां यथा समुदा
यः सामासिकं तस्य समासगणस्य मध्ये द्वंद्वनाम समासोऽस्मि

तथैवमक्षयसिद्धेरिति अहमेवेति अहमेवाक्षयः कालोस्मिका
लातीतत्वात् संवत्सरात्मकोथ कलनात्मकोहं वा निष्कलइतिभा
वः धातेति दधाति अदधानेभ्यः फलं धारयति पोषयति तानि
तिवाधाता फलधाता सोस्मि योहि विश्वतोमुखो विश्वतोस्मिन् विश्व॰
स्थावरजंगमात्मके लोके मुखं व्याप्तिरस्यास्तीति यावदिति वि
श्वतोमुखः सर्वस्य प्राणिजातस्यांतर्यामितया तत्तत्कर्मफलस्य
दातेत्यर्थः ३३॥

मधुभाष्य

३३॥

और अक्षरो के मध्यमे अकार अक्षर मै हूं और समासो के विषे उभ
य पद प्रधान द्वंद्व समास और अक्षय प्रवाह रूप काल जो सो ह
महै और फल प्रदान करनेवालो मे विश्वतो मुख कहे सर्व फलवि
धात कर्ता मैं हौ ३३ ॥

दोहा

अक्षरमांहि अकारहौं द्वंद्व समासनमांहि मैं अविनाशी
कालहौं धाता सन्मुखआहि ३३ ॥

113

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां की-
र्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ३४

शंकरभाष्यटीका १

मृत्युरिति मृत्युर्द्विविधो धनादिहरः प्राणहरश्च तत्र यः प्राणहरः स स-
र्वहरः स उच्यते सोऽहमित्यर्थोऽथवा परईश्वरः प्रलये सर्वहरणात् स स-
र्वहरः सोऽहमुद्भवउत्कर्षोऽभ्युदयस्तत्प्राप्तिहेतुश्चाहं केषां भविष्यतां भा-
विकल्याणानामुत्कर्षप्राप्तियोग्यानामित्यर्थः कीर्तिः श्रीर्वाक्च नारीणां
स्मृतिर्मेधा धृतिः क्षमेत्येता उत्तमाः स्त्रीणामहमस्मि यासामाभासमा-
त्रसंबन्धेनापि लोकाः कृतार्थमात्मानं मन्यन्ते ३४ ॥

आनंदगिरिकृतटीका २ + सर्वहरस्य शाहस्य स्वरूपमर्थान्तरमाह अथवेति भाविकल्या-
णानामित्युत्कर्षमेव स्पष्टयति उत्कर्षेति कीर्तिर्धार्मिकत्वनिमित्ता ख्यातिः श्रीर्लक्ष्मीः कान्तिः शोभा
वाक्वाणी सर्वस्य प्रकाशिका स्मृतिश्चिराद्भूतस्मरणशक्तिः मेधा ग्रन्थधारण-
शक्तिः धृतिर्धैर्यं क्षमा मानापमानयोरविकृतचित्तता स्त्रीषु कीर्त्यादीनाम्
उत्तमत्वमुपपादयति यासामिति ३४ ॥

स्वामिकृतटीका ३

मृत्युरिति संहारकाणां मध्ये सर्वसंहर्ता मृत्युरहं भविष्यतां भाविकल्या-
णानां प्राणिनामुद्भवोऽभ्युदयोऽहं नारीणां मध्ये कीर्त्याद्याः सप्त देवतारूपाः
स्त्रियोऽहं यासामाभासमात्रयोगेन प्राणिनः श्लाघ्या भवन्ति ताः कीर्त्याद्याः
स्त्रियो मद्विभूतयः ३४ ॥

पिशाचभाष्यटीका ४

परएवेश्वरः सर्वहरो मृत्युरुच्यते प्रलये सर्वहरणात् भविष्यतामु-
त्कृष्टतोद्भवश्चाभ्युदयोऽहं स्वरूपेण कथ्यते कीर्तिः श्रीर्लक्ष्मीः वाक्
रसना स्मृतिः स्मरणशक्तिः धृतिर्धैर्यं क्षुत्पिपासादिसहनं क्षमाक्रो-
शेनाभिहतो वा पिता क्रोशेनैव न ताडयेत् ग्रक्षेषा वा घ्रतः कार्यैः साक्षा-
त्कृतापकीर्तिता एता उत्तमास्त्रियोऽहं यासामाभासमात्रसंबंधेन लोकाः
कृतार्थमात्मानं मन्यन्ते ३४ ॥

रामानुजभाष्यटीका ५

[illegible] विधात्रेयः [illegible]
[illegible] सर्वप्राणहरो मृत्युश्चाहमुत्पाद्यमानानामुद्भवा-
ख्यं कर्म चाहं नारीणां कीर्तिश्च श्रीश्चाहं वाक्चाहं स्मृतिश्चाहं मेधा चाहं।

श्री॰
गी॰टी॰
द॰

114

धृतिश्चाहंक्षमाहमेव ३४॥

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं ३४ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका १

मृत्युरिति सर्वहरः सर्वसंहारको मृत्युरहं भविष्यतां भाविनां प्राणिनामुद्भवः वर्तमानकल्पानंतरमागामिकल्पेष्वप्युद्भवकर्ताहमेव नारीणां स्त्रीलिंगवाचकानां पदार्थानां कीर्त्यादयः सप्तदेवताः यदर्जनेन लोकः श्लाघ्यो भवति ता मद्विभूतयः तत्र कीर्तिर्नाम साधुयीगीयतेनेनतद्विदादिभिः श्रीः शोभा वाग्वाणी यया सर्वप्राणिनां व्यवहारश्चलति सा चतुर्विधा परा पश्यंती मध्यमा वैखरीति चत्वारि वाक्परिमिता पदानीति श्रुतेः तासां पृथक्स्वरूपं तु हृदयस्थेन प्रथमं वाचो ग्रग्रमिति क्रमादर्शिते तथा मंडलब्राह्मणेपि सैषा त्रय्येव विद्या तपतीति वा यत्त्वरूपमीव वातीति एवं ताल्वोष्ठपुटसंयोगाज्ज्ञाता वैखरी तदुक्तं शान्तश्लोके दैवर्णाख्या स्वहेतोर्याव्यक्तिरस्तामिति सा द्वेधा ब्राह्मी संस्कृता च तत्र ब्राह्मी संवर्धयाज्ञाता शाब्दादेशभाषेत्यर्थः संस्कृता मननगम्या वेदवाणी यद्वाग्वदंत्यविचेतनानीति श्रुतेः एवं सामति श्रास्मृ एतास्मद्विभूतिरित्यर्थः एताः स्तुतयः शातपाः शान्तश्लोकभाष्येः स्वामिभिः सम्यग्व्याख्याताः इत्यत्र विस्तरभयान्नात्र लिखिताः ३४ ॥

वनमालीटीका ८

संहर्तॄणां मध्ये मृत्युरहं भविष्यतां भाविकल्पानां य उद्भव उत्कर्षः सोऽहं नारीणां मध्ये कीर्त्याद्याः सप्तधर्मपत्न्योऽहं ३४ ॥ श्र

[illegible]वैजयंती टीका ५

किंच मृत्युरिति अत्रापि चकारः स्तुकसमुच्चयार्थकस्तेन सर्वेषामंतकानामिति संगृह्यते सर्वेषामंतकानां मध्ये सर्वहरः सर्वेषां ब्रह्मादिपिपीलिकांतानां प्राणिनां प्राणहरो यो मृत्युः सर्वस्मृतिहरणकर्ता सोऽहमेवास्मि भविष्यतां भाविकल्पानामवतीर्णानामुद्भवोऽभ्युदयस्सोऽप्यहमेवास्मि यद्वा भविष्यतां भाविनां च समानां तु गादिविकाराणां मध्ये य उद्भवो जन्माख्यः प्रथमविकारः सोऽहमेवास्मि यद्वा भविष्यतां मत्यादिप्रमा

नानांप्राणिनामुद्भवाख्यं यत्कर्म तदप्यहमेव नारीणां सर्वासां स्त्रीणां मध्ये
याः कीर्त्यादयः सप्त धर्मपत्न्यस्ता अप्यहमेवास्मि तत्र कीर्तिर्नाम नाना
दिग्देशीयजनेषु धार्मिकत्वौदार्यत्वैश्वर्यवत्त्वगुणवत्त्वज्ञानवत्त्ववैरा
ग्यवत्त्वादीनां ख्यातिः श्रीर्नाम सम्पद्देहद्युतिर्वा वाङ् नाम सर्वार्थप्रकाशिका ग्य
संस्कृतवाणीरूपा सरस्वती स्मृतिर्नाम स्वपूर्वानुभूतस्मरणशक्तिः मेधा
नामानेकशास्त्रार्थधारणशक्तिः धृतिर्नाम निरतिशयखेदेपि देहेन्द्रि
याद्युत्तम्भनशक्तिः केन विद्वेषेण वापत्प्राप्तौ न निवर्तनशक्तिर्वा क्ष
मा नाम हर्षविषादयोरपि निर्विकारचित्तता वकारात् मूर्त्यादयोपि ध
र्मपत्न्यो गृह्यंते एतासां लेशमात्रसंबंधेनापि सुरनरादयः सर्वजनश्ला
घनीया भवंति एताविनात्तु भाग्यहीना इत्यर्थः ३४ ॥

मधुसूदनीटीका ९

संहारकारिणां मध्ये सर्वहरः सर्वसंहारकारी मृत्युरहं भविष्यतां भा
विकल्याणानां य उद्भव उत्कर्षः स चाहमेव नारीणां मध्ये कीर्तिः श्रीर्वाक् नां
स्मृतिर्मेधा धृतिः क्षमेति च सप्त धर्मपत्न्योहमेव तत्र कीर्तिर्धार्मिकत्व
निमित्ता प्रशस्तत्वेन नानादिग्देशीयलोकज्ञानविषयतारूपा ख्यातिः
श्रीर्धर्मार्थकामसंपत् शरीरशोभा वा कांतिर्वा वाक् सरस्वती सर्वस्यार्थ
स्य प्रकाशिका संस्कृता वाणी चकारात् मूर्त्यादयोपि धर्मपत्न्यो गृह्यं
ते स्मृतिश्चिरानुभूतार्थस्मरणशक्तिः अनेकग्रंथार्थधारणशक्तिर्मे
धा धृतिरवसादेपि शरीरेंद्रियसंघातोत्तंभनशक्तिः उत्कूलप्रवृत्ति जन
कारणेन वापत्प्राप्तौ न निवर्तनमेव शक्तिर्वा क्षमा हर्षविषादयोरवि
कृतचित्तता यासामाभासमात्रसंबंधेनापि जनः सर्वलोकादरणीयो
भवति तासां सर्वस्त्र्युत्तमत्वमतिप्रसिद्धमेव ३४ ॥

सदानंदीटीका ॥

संहारकारिणां मध्ये मृत्युः सर्वहरो एवाहं भाविकल्याणरूपाणां समु
त्कर्षोहमेव च कीर्तिः सद्धर्मतः ख्यातिः श्रीर्धर्मार्थादिसंपदा वाग्वा
णी संस्कृता सर्वपदार्थानां प्रकाशिका २ स्मृतिश्चिरानुभूतार्थस्मरणश
क्तिरद्भुता मेधानेकग्रंथार्थधारणशक्तिरंतरी अवसादेपि देहादिसं
घातोत्तंभिका धृतिः क्षमा हर्षविषादादिहेतोपि निर्विकारता ४ धर्म

श्री· गी·टी· द·

पत्न्यइमास्तुख्यानारीणामहमेवच यासामाभासमात्रस्यसंबंधेनापि
जेनवः श्रादतैव्याः समस्तेषुसंतिलोकेषुमायकाः ३४ ॥

नीलकंठीटीका १२

सर्वहरः प्रलयकालिकोमृत्युरस्मि भविष्यतांभाविकल्याणानांउद्भवा
पेक्ष्यश्रीकर्षोहं कीर्त्यादिसप्तकमप्यहंयासांसंश्रयमात्रेणमनुष्यश्रा
कृतार्थताबुद्धिर्भवति ३४ ॥

आनंदीटीका

सर्वहरोमृत्युः प्रलयकर्ताकालः भविष्यतामुद्भवसर्गकर्ताकालोहं
नारीणांदत्तश्रीणांमध्येकीर्तिप्रभृतिरहम् ३४ ॥

रामकंठीटीका उपक्रमं ३४ स्पष्टार्थम्

लासिकी [redacted]टीका

भविष्यतांभाविकल्याणानामुद्भवोभ्युदयः स्मृतिरनुभूतार्थस्म
रणशक्तिः अनेकग्रंथार्थधारणाशक्तिर्मेधा धृतिर्दीप्तिम् ३४

पंचोलीटीका

चपुनः सर्वहरः मृत्युरहंमृत्युर्हिद्विविधः धनादिहरः प्राणहरश्चा
हंसर्वहरः धनप्राणहरश्चद्विविधोहंचपुनः भविष्यतांभावि
कल्याणांनांउत्कर्षप्राप्तियोग्यानामुद्भवोभ्युदयःतस्मात्विरहं
नारीणांमध्येकीर्तिःश्रीःवाक्तरस्वनीति स्त्रीउत्तमास्तथा· ण्णं
स्मृतिर्मेधाधृतिक्षमाहंयासामाभासमात्रेणापिनराश्चात्मानं
कृतार्थंमन्यंते ३४

रणवीरसमिह्लोपिनी ॥

मृत्युरिति सर्वहरो विश्वसंहारकालरूपोमृत्युसंज्ञकः सर्वप्रा
णिनांप्राणान्हरामीतिसोस्मि तथाभविष्यतांचभविष्यत्काल
वर्तिनांचसर्वप्राणिनामुद्भवउत्पत्तिकारणमस्मि कीर्त्यादि
नारीणामितिस्त्रीलिंगपदानिदृष्टानिइति तेषांमध्येकीर्त्यादिरूप
दात्मिकाविभूतिरस्मि मदात्मकत्वादिति ३४ ॥

मधुमाष

३४॥

115/2

संहार कारियों के मध्ये मे सर्व संहार कारी मृत्युरूप हमको जानो औ
र होनेवाली वस्तुवों मे उद्भव पदार्थ हम है और स्त्रियों मे समनारी
कहे कीर्ति श्री वाणी स्मृति मेधा धृति क्षमा ये रूप मेरे है ३४ ॥

दोहा

में हो मृत्यु सभनाशाकर भविष्यतकी उत्पति गिराकीर्ति
श्री नारीमे मेधा क्षमा स्मृति धृति ३४

116

बृहत्साम तथा साम्नां गायत्री छंदसामहं मासा
नां मार्गशीर्षोहमृतूनां कुसुमाकरः ३५ ॥

शंकरभाष्यटीका १

बृहत्सामेति बृहत्साम तथा साम्नां मोक्षप्रतिपादकसामवेदविशेषः
प्रधानमस्मि गायत्री छंदसामहं गायत्र्यादिछंदोविशिष्टानामृचां गाय
त्री ऋगहमित्यर्थः मासानामिति मासानां मार्गशीर्षोहं ऋतूनां कुसुमा
करो वसन्तः ३५ ॥

आनंदगिरिकृतटीका २

वेदानां सामवेदोस्मीत्युक्तं तत्रावान्तरविशेषमाह बृहदिति छंदसां मा
ध्ये गायत्री नाम यच्छंदस्तदहमित्युक्तं छंदसामृगभ्यातिरेकेण सद्रूपा
भावादित्याशंक्याह गायत्र्यादीति द्विजातेर्द्वितीयजन्मजननीत्वादित्यर्थः मा
र्गशीर्षो मृगशीर्षेण युक्ता पौर्णमास्यस्मिन्निति मार्गशीर्षो मासः सोहं
पक्वसस्याढ्यत्वादित्याह मासानामिति वसन्तो रमणीयत्वादिति शेषः ३५

स्वामिकृतटीका ३

बृहत्सामेति त्वामिद्धि हवामहे इत्यस्यामृचि गीयमानं बृहत्साम तेनेन्द्रः स
र्वेश्वरत्वेन स्तूयत इति श्रेष्ठत्वं छंदोविशिष्टानां मंत्राणां मध्ये गायत्री मंत्रोहं
द्विजत्वापादकत्वेन सोमाहरणेन च श्रेष्ठत्वात् कुसुमाकरः वसंतः ३५

पिशाचभाष्यटीका ४

बृहत्साम नाम साम्नां प्रधानं साम गायत्री छंदोविशिष्टानामृचां गायत्री ऋग
हं कुसुमाकरो वसंततुः ३५ ॥

रामानुजभाष्यटीका ५

स्पष्टार्थः ३५ ॥ ॥ ॥ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ३५ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

बृहदिति साम्नां चतुर्दशादिकाष्टसहस्रसंमितानां मध्ये ईश्वरस्तावका
निकानि विद्यासंमानि रथंतरादीनि सन्ति तेषु बृहत्साम मद्विभूतिः प

नि

117

तदग्रिमाख्यायेस्पष्टं निरूपयिष्यामः तथाछंदसामुष्णिगादीनांमध्ये
गायत्रीप्रथमागायंतंत्रायतेसागायत्रीचतुर्विंशत्यक्षरा ततश्चतुरक्षरवृद्ध्या
उष्णिगादिछंदसांनिष्पत्तिः सापिपरमेश्वरप्रतिपादिकेतिमद्विभूतिरिहा-
का तथाहि तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि धियोयोनः प्रचोद-
यात् प्रणवकस्वसंहिताभाष्यकारस्ता तत्सवितुरितिविश्वामित्रः सावित्री
गायत्रीतिषष्ठ्यापरिणाम्यतेतस्यसवितुः सर्वस्यप्रसवदातुरादित्यांतर्ग-
तपुरुषस्ययोसावादित्येपुरुषइतिश्रुतेः दिवस्यद्योतमानस्यहिरण्यगर्भोपा-
ध्यवच्छिन्नस्यविज्ञानानंदस्वभावस्यब्रह्मणः वरेण्यंसर्वोत्कृष्टंभर्गस्तेजःधी-
महिध्येयचिंतायांप्रत्यङ्गात्मत्वेनस्मरणाध्यायामश्चिंतयामः यद्वाकिंभूतं
भर्गः सवितुःसूर्यस्यापिवरेण्यंउपजीव्यंयदादित्यगतंतेजइत्युक्तत्वात्
तस्यकस्ययोनोस्माकंधियोधीः प्रचोदयात्बुद्धेर्गुणप्रकर्षाप्रेरयतितस्य
सवितुः सर्वयिवरेण्यंवीर्यंतेजोध्यायामइतिसंबंधः प्रत्येतडक्तंभवति सत्य-
ज्ञानानंदात्मकः सवितासर्वजगदुपासनाप्रयत्नयाजगत्कर्तासर्वोपायभि-
ज्ञकोविदः तत्रदुपायिपमोविजिगीषुः स्वकमनीयवारिमहिम्नोऽदृश्योपि नंदि
षुः स्वयंवशीकृतमायः सर्वात्मनामात्मभूतोंतर्यामीदेवोनोस्माकंधियो
धीः प्रचोदयात् ददामिबुद्धियोगंतमितिभगवदुक्तेः तस्यसवितुर्देवस्या-
त्मभूतंवरेण्यंप्रार्थनीयंसंसारक्लेशमूलमर्गकंभर्गस्तेजःपरंज्योतिः सत-
तंध्यायामइत्यर्थः तेषांमासानांद्वादशानांमध्येमार्गशीर्षोहं मासास्ताव-
च्चांद्रमानेनभवंतिचंद्रनक्षत्रनामकाश्चयष्या यस्यांपौर्णमास्यांचित्रानक्ष-
त्रंसचैत्रः तद्वद्विशाखादयोवैशाखादयः प्रकृतेतुमृगशिरः संबंधान्मार्ग-
शीर्षः एवंमृगशिरः स्वामीचंद्रस्तद्यासनामतत्त्वंसमानतायामासाइत्यु-
क्ताम्नायेशोपिसएव पूर्णिमास्वामीवसएव एवंमासनक्षत्रतिथीनामेकदे-
वतत्वेनपुण्यतमत्वमतोमद्विभूतिरित्यर्थः यद्वामृगशिरःपूर्णिमासंबंधे
वर्षो मिहितः तस्मिन्नेवाग्रहायणीत्यभिधानात् अग्रेहायनोयस्याः सा
तथार्थः अतएवाग्रहायणिकइतिमार्गशीर्षनामअतोस्यमासस्यपुण्यत्वा-
न्मद्विभूतित्वं तथाशिशिरादिषण्णामृतूनांमध्येकुसुमाकरोवसंतोस्मि स-
र्वेषामानंदकरत्वाद्विशेषाश्रयत्वात् ३५ ॥

वेदानांसामवेदोस्मीत्युक्तंतत्रापिमन्त्रोविशेषःसाम्नामक्षरारूढानां
गीतिविशेषाणांमध्येत्वामिद्धिहवामहइत्यस्यामृचिगीतिविशेषोबृह
त्सामतच्चातिरात्रेपृष्ठस्तोत्रेसर्वेश्वरत्वेनेंद्रस्तुतिरूपमत्वतःश्रेष्ठत्वाद
हमेव छंदसांनियताक्षरपादत्वरूपछंदोविशिष्टानामृचांमध्येत्रिपदा श्री
द्विजातीनांजन्महेतुर्गायत्र्यहंद्वादशमासानांमध्येभिनवशालिवा
स्तूकषाकादिशालीशीतातपशून्यत्वेनचसुखहेतुर्मार्गशीर्षोहंष
ण्णामृतूनांमध्येकुसुमाकरःसर्वसुगंधिकुसुमानामाकरोतिरमणी
योवसंतोहं ३५ ॥

क्रसमवैतन्यंतिटीका ९

किंचबृहत्सामेति साम्नामृगक्षरारूढानांगीतिविशेषाणांमध्येत्वामि
द्धिहवामहेइत्यस्यामृचिगीयमानेसर्वेश्वरत्वेनेंद्रस्तुतिरूपमतिरात्रेपृष्ठ
स्तोत्रंयद्बृहत्सामाख्यंगीतिविशेषरूपंसामोक्तंतदहमेवास्मिवेदा
नांसामवेदोस्मीत्यत्रसर्ववेदानांमध्येसाम्नःश्रैष्ठ्यमुक्तमिदंतुसाम्नामपि
प्रधानमुच्यतेऽतोनपुनरुक्तिः छंदसांनियताक्षरपादत्वरूपछंदोविशि
ष्टानामृचांमध्येगायत्रीछंदोविशिष्टायाऋगहंसाहमेवास्मिमासानांद्वादश
संख्यकानांमध्येमार्गशीर्षोमासोऽहमेवास्मितस्याभिनवधान्यादिसंपन्नत्वा न्या
येभ्यःश्रेष्ठत्वात् ऋतूनांषण्णांमध्येकुसुमाकरोवसंतःसोप्यहमेवास्मि
तस्यसमशीतातपत्वेनसर्वसुखहेतुभूतनानाविधविचित्रनवमंजरीप
लाशपुष्पफलाढ्यत्वेननिखिलजलस्थलाम्बरचरजीवनिकराह्लादक
त्वेनचसर्वेभ्यःश्रेष्ठत्वात् ३५ ॥

मधुसूदनीटीका ९

वेदानांसामवेदोस्मीत्युक्तं तत्रापिमन्त्रोविशेषःसाम्नामृगक्षरारूढा
नांगीतिविशेषाणांमध्येत्वामिद्धिहवामहइत्यस्यामृचिगीतिविशेषोबृह
हत्सामतच्चातिरात्रेपृष्ठस्तोत्रंसर्वेश्वरत्वेनेंद्रस्तुतिरूपमत्वतःश्रेष्ठत्वाद
हं छंदसांनियताक्षरपादत्वरूपछंदोविशिष्टानामृचांमध्येद्विजातेर्द्विती
यजन्महेतुत्वेनप्रातःसवनादिसवनत्रयव्यापित्वेनत्रिष्टुब्जगतीभ्यां

श्री॰
गी॰ टी॰
ह॰

त्री एपतदक्षराणि हित्वा जगाम ततस्त्रिष्टुप् सोममच्छायत सैकमक्षरं हित्वापतत्ततो गायत्री सोममच्छायतत्सा

118

वसन्ते ब्राह्मणमुपनयीत

सोमाहरणार्थं गताभ्यां सोमे अप्रतिलब्धमनागमनलब्धोः तदा गायत्री च हारि
तानि जगत्या त्रीणि त्रिष्टुभैकमिति द्वे वा विनेरत्नैः स हि सोमस्याहरणे
न च सर्वश्रेष्ठा गायत्री या हे च तेरक्षराणि हत्वा प्रत्येकं दशा सा ह्यत्ततो जग
ती सोममच्छायतन्ता अप्रतिलब्धमनागमना नानि चाक्षराणि हृत्वागाक्ष
त. सोमं च तस्मिन्नेष्टा हरा गायत्री स्वपक्षयन्तदाहुः गायत्र्याणि वै सवी
णि सवनानि गायत्री येनैतद्रूप सहस्रमानैर् इति शतपथश्रुतेः गायत्री
वा इदं सर्वं भूतमित्यादिच्छान्दोग्यश्रुतेश्च द्वादशानां मासानां मध्ये प्रभि
नवशालिवास्तुकशाकादिशालीशीतातपशून्यत्वेन च सुखहेतुर्मार्ग
शीर्षोहं ऋतूनां षण्णां मध्ये कुसुमाकरः सर्वसुगंधिकुसुमानामा
करोति रमणीयो वसंतः वसंते ब्राह्मणोः ग्नीनादधीत वसंते ज्योतिषा
यजेतेतहे वसंते एवाग्नीरभेत वसंतो वै ब्राह्मणस्येत्यादि शास्त्रप्रसि
द्धोहमस्मि ३५॥

सदानंदीटीका ११

वेदानां सामवेदोस्मीत्युक्तेनेत्यपराभित्या साम्नामृगात्तरारूपगीतिभे
दानामहं १ बृहत्साम तिरात्रेतत्पृष्ठस्तोत्रं महत्तरं सर्वेश्वरत्वेनेंद्रस्य
स्तुतिरूपमिति प्राप्यहं गायत्री वा इदं सर्वमित्यादौ ब्रह्मरूपतः छांदोग्य
संस्तुता सम्यक्स्थाशानयश्रुतौ २ मध्ये छंदोविशिष्टानां नियताक्ष
रभागृणां सर्वाभ्यवेन निर्णीता गायत्री छंदसामहं ३ मासानां मार्गशी
र्षोहं सस्यवेतनयावरः नातिशीतेन चात्युष्णयस्मिन्न्यानादिशालीति कु
सुमानामाकरो यस्मान्नानानामृत्रर्थेनः रमणीयवसंतो सावृतूनाम
हमितिमतः ३५॥

नीलकंठीटीका १२

बृहत्साम नामाभिस्त्वमिंद्र हवामह इत्यस्यामृचि गीयमानं साम पृष्ठस्तोत्रे वि
निगुक्तं इंद्रदेवत्यं तत साम्नां मध्ये ऽहमस्मि छंदसां मध्ये गायत्री द्विजत्वा
संपादकत्वात् सोमाहरणाच्च श्रेष्ठाहमस्मि ऋतुमाकरो वसंतः ३५॥

आनंदीटीका

मासानांमध्येमार्गशीर्षोहमग्रहायनत्वान्नवृत्तारंभकालत्वाच्च ३५

रामकंठीटीका [illegible] ३५ साह्यार्थमु

लासिकी [redacted]टीका

त्वामिंद्रहवामहेइत्यस्यामृचिगीयमानेबृहत्सामतेनचेंद्रःसर्वेश्वरत्वे
नस्तूयते छंदसांरहस्यमंत्राणांगायत्रीमंत्रोहम् ऋतूनांकुसुमाकरोवसंतः ३५

पंचोलीटीका

तथासाम्नांमध्येबृहत्सामाहंछंदसांमध्येगायत्रीछंदोहंमासा
नांमध्येमार्गशीर्षोहंऋतूनांमध्येकुसुमाकरोहं ३५

॥गीतावीरसमिद्धोधिनी॥

बृहत्सामेति साम्नां सामवेदप्रभेदानां मध्ये बृहद्रथंतरं ना
मसामप्रधानभेदोस्मि ग्रंथमेधाहेतुपयोग्यत्वादिति तथा छं
दसां छंदोमंत्राणां मध्ये गायत्रीमंत्रोस्मि ब्राह्मण्यप्रतिपादनेमुख्य
त्वादिति मासानामिति मासानां मार्गादीनां द्वादशानां म
ध्ये मार्गशीर्षमासोस्मि तस्यैवाग्रहायणिकत्वादितिऋतूनामिति
ऋतूनां मध्ये कुसुमाकरोस्मि
मार्गादीनांपुण्ये: क्रमात्वसंतो जीवनादिबीजभूतत्वादिति ३५॥

मधुभाष्य

३५॥

119

और साम वेद मे मंत्र ब्राह्मण गद्य पद्य भूत श्रुतियों के मध्य मे बृहत्साम नाम हम को जानो जिससे इंद्र गाये जाते है और छंद बंध युक्त मंत्रो के मध्यगायत्री हम है और मास महीनों मे मार्गशीर्ष कहे अग्रहन मास हम है औ ऋतवों मे वसंत ऋतु मे हो ३५ ॥

दोहा

बृहतसामत्यों साम मे हिं गायत्री छंदन मे हं मार्गशीर्ष हों

मासन मैं हिं ऋतन मांहि मधु राह ३५

120

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं ज।
योस्मि व्यवसायोस्मि सत्वं सत्ववतामहं ३६

शंकरभाष्यटीका १

~~द्यूतेनाविति~~ द्यूतमिति द्यूतमक्षदेवनादिलक्षणं छलयतां छल
स्य कर्तॄणामस्मि तेजस्विनां तेजोऽहं जयोस्मि जेतॄणां व्यवसायो
स्मि व्यवसायिनां सत्वं सत्ववतां सात्विकानामहं ३६ ॥

आनंदगिरिकृतटीका २

द्यूतमक्षलक्षणं सर्वस्वापहारकारणमन्यायापदेशेन पराभिप्रेत
सिद्धिर्वा स्वाभिप्रेतं वा संपादयतामित्याह छलस्येति तेजोऽप्रतिह
ताज्ञा उत्कर्षोजयः व्यवसायः फलहेतुरुद्यमः धर्मज्ञानवैराग्यादि स
त्वकार्यं सत्वं उशनाः शुक्रः कविशब्दोत्र यौगिको न रूढः पौनरुक्त्यात ३६

स्वामिकृतटीका ३

द्यूतमिति छलयतामन्योन्यवंचनपराणां संबंधि द्यूतमस्मि तेजस्विनां
प्रभाववतां तेजः प्रभावोस्मि जेतॄणां जयोस्मि व्यवसायिनामुद्यमवतां
व्यवसायोस्मि सत्ववतां सात्विकानां च सत्वमहं ३६ ॥

पिशाचभाष्यटीका ४

छलयतां छद्मगतिनां द्यूतमस्मि जेतॄणां जयोस्मि व्यवसायिनां व्यवसा
योस्मि सत्ववतां सात्विकानां सत्वमहमस्मि ३६ ॥

रामानुजभाष्यटीका ५

छलं कुर्वतां छलास्पदेषु अक्षादिलक्षणो द्यूतमहं जेतॄणां जयोस्मि व्य
वसायिनां व्यवसायोस्मि सत्ववतां सत्वमहं ३६ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३६ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

द्यूतमिति छलयतामन्योन्यवंचनपराणां कूटमोहनशक्तिरूपं द्यूतं
जेतॄणां
येन धर्मादयोपि मोहिताः संतः किंचित्त्विङ्ःसामद्धिभूतिः

श्री० गी० टी० द० जयोस्मि व्यवसायिनामुद्यमवतां व्यवसायोहं सात्विकानां सत्त्वगुणोहं ३६

वनमाली टीका ८

छलयतां परवंचकानां संबंधि द्यूतमक्षदेवनादिरूपं सर्वस्वापहारकमहं तेजस्विनामत्युग्रप्रभावानां संबंधि तेजोहं जेतॄणां पराजितापेक्षयोत्कर्षरूपो जयोहं व्यवसायिनां व्यवसायसफलोद्यमोहं सत्त्ववतां सात्विकानां धर्मज्ञानवैराग्यैश्वर्यरूपं सत्त्वमेवाहं सत्त्वमहं ३६ ॥

अथ सर्वैजयंतीटीका ९

किंच द्यूतमिति छलयतां मिथ्यावचनकर्तॄणामन्यं पराभूय स्वजयमि-

छ० च्छतां सापराणां संबन्धि द्यूतं सर्वस्वहरमक्षदेवनादिरूपमहमेवास्मि ते-
जस्विनां प्रभाववतां संबंधि तेजः प्रभावोऽहमेवास्मि जेतॄणामपराजिता-
नां संबंधी पराजयापेक्षयोत्कृष्टो जयोऽपराजयरूपः सोहमेवास्मि व्यवसा-
यिनामुद्यमकर्तॄणां संबंधी यो व्यवसायः फलवानुद्यमः सोप्यहमेवास्मि स-
त्ववतां बलवतां संबंधि यत्सत्त्वं बलं तदप्यहमेवास्मि ३६ ॥

मधुसूदनी टीका १०

छलयतां छलस्य परवंचनस्य कर्तॄणां संबंधि द्यूतमक्षदेवनादिलक्ष-
णं सर्वस्वापहारकारणमस्मि तेजस्विनामत्युग्रप्रभावानां संबंधि तेजो-
ति अप्रतिहताज्ञत्वमहमस्मि जेतॄणां पराजितापेक्षयोत्कर्षलक्षणो जयोस्मि व्यवसायिनां
द्य व्यवसायः फलाव्यभिचारी उद्यमो ऽहमस्मि सत्त्ववतां सात्विकानां धार्मि-
कानां धर्मज्ञानवैराग्यैश्वर्यलक्षणं सत्त्वं सत्त्वकार्यमेवाहं सत्त्वमहं ३६

सदानंदी टीका ११

द्यूतं छलस्य कर्तॄणां यत्सर्वस्वापहारकं तत् अतीवोग्रप्रभावाणां तेजस्वि-
नां तेजस्विनामहं १ जेतॄणामहमुत्कर्षलक्षणो जय एव च स्वयान्फलोद्यमो
हं यतमानानां व्यवसायिनां २ सात्विकानामहं सत्त्वं धर्मज्ञानादिलक्षणं
३६ ॥

नीलकंठी टीका १२

व्यवसायो निश्चय उद्यमो वा ३६ ॥

आनंदीटीका

छलयतां परवंचनप्रकाराणां मध्ये द्यूतमस्मि तेजस्विनां परप्रकाशकारिणां सूर्यादीनां मध्ये तेजोस्मि सूर्यादीनामपि प्रकाशकारणमहमेवेत्यर्थः एवं जयकारिणां मध्ये जयोस्मि उद्योगकारिणां मध्ये उद्योगोस्मि सत्वं धैर्यं धैर्यकारिणां मध्ये धैर्यमस्मि ३६ ॥

रामकंठीटीका उपरमें ३६ सत्तार्थम्

लाषिकी वसमभीटीका

तेजस्विनां प्रभाववतां तेजः प्रभावः जेतॄणां जयोस्मि उद्यमवतां व्यवसायोस्मि सत्ववतां धैर्ययुक्तानां सत्वं धैर्यम् ३६ ॥

पंचोलीटीका

छलयतां छलकर्तॄणां मध्ये द्यूतोहं तेजस्विनां प्रभूतानां मध्ये प्रभावोहं जेतॄणां मध्ये जयोस्मि व्यवसायवतां उद्यमवतां उद्यमोहं सत्ववतां सात्विकानां सत्वमहं ३६

भगवानीरसमिद्बोधिनी ॥

द्यूतमिति छलयतां परवंचकानां मध्ये द्यूतमस्मि तद्धनं हि स्याद्द्यूतमिति प्रसिद्धत्वादिति तेज इति तेजस्विनां राज्ञां दिग्गुप्रप्रासमिति प्रास्ते प्रसक्तत्वादिति तेज इति तेजस्विनां यत्तेजः कोपादं उजं तत्स्तनाप: प्रभावश्चास्मि जयोस्मीति सत्ववतां सत्वं नामधीरत्वं मंत्रश्चान्हृतां योजय: प्रभावो यश्च व्यवसायः उत्साहो यश्च सत्वं मंत्रसात्तदात्मिका शक्तिरहमेवास्मीत्यर्थः ३६ ॥

मधुभाष्य

३६ ॥

छल वस्तुवों मे द्यूत कहे जुआ मै ही और तेजस्वियोंमे तेज जो प्र-
ताप सो मै तथा जय और व्यवसाय कहे उद्यम भीमै और सतो गुणी
जितने है उन मे सतो गुण हम है ३८ ॥

दोहा

वंचकके महिं द्यूतहों तेजवंतमहिं तेज उदम जय अरुस
त्वहों सत्ववंतमे सेंज ३८

123

वृष्णीनांवासुदेवोस्मिपांडवानांधनंजयः मु
नीनामप्यहंव्यासः कवीनामुशनाकविः ३७

शंकरभाष्यटीका १

वृष्णीनामिति वृष्णीनां यादवानां वासुदेवोस्मि अयमेवाहं त्वत्सखा पांडवानां धनंजयस्त्वमेव मुनीनां मननशीलानां सर्वपदार्थज्ञानिनामप्यहंव्या
सः कवीनां क्रांतदर्शिनामुशनाः कविरस्मि ३७ ॥

आनंदगिरिकृतटीका २

स्पष्टार्थं ३७ ॥ ॥ ॥

स्वामिकृतटीका ३

वृष्णीनामिति वासुदेवो योहं त्वामुपदिशामि धनंजयस्त्वमेव मद्विभूतिः
मुनीनां वेदार्थमननशीलानां वेदव्यासोहमस्मि कवीनां क्रांतदर्शिनां म
ध्ये उशनानामकविः शुक्रः ३७ ॥

पिशाचभाष्यटीका ४

वृष्णीनां वासुदेवोस्मि मुनीनां मननशीलानां सकलपदार्थतत्त्वज्ञानीनां
कवीनां क्रांतदर्शीनां ३७ ॥

रामानुजभाष्यटीका ५

वृष्णीनां वासुदेव सूनुरहमेवनतत्र विभूतिरर्थोनराभावादेव सूनुमायाका वसुदेव
रेण आविर्भावानुगुणयत्नामरूर्पेणमदाविनाभूतमित्यर्थः पांडवानामा
ध्ये त्वमेवास्मि मुनयो मननेनात्मयाथात्म्यदर्शिनः तेषां मध्ये व्यासोहं कव
योविपश्चितः तेषां मध्ये उशना भार्गवोहं ३७ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३७ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

वृष्णीणामिति यथा रुद्राणां शंकरस्तथाहं रामः शास्त्रभृतामहमिति नोयेन
वृष्णीनां यादवानां मध्ये वसुदेवस्यापत्यं वासुदेवः बलभद्रोस्मि भगवतो हि
देवक्यामाविर्भावविभावेन नवपत्नीत्वं य मे न तस्य मत्मायत्वं मा स्म यशो विचक्षणा पंत
त्वेनं भवति किंचे कस्येव मुख्येन विभूतित्वं चनो पपद्यते पांडवानां मध्ये

श्री· गी·टी· १०·

धनंजयस्त्वमद्विभूतिः मुनीनांवेदार्थमननशीलानांमध्येवेदव्यासोस्मि
कवीनांक्रांतदर्शिनांमध्येउशनाभृगुपुत्रःकविःशुक्रः ३७ ॥

वनमालीटीका ८

साक्षादीश्वरस्यापिविभूतिमध्येपाठस्तेनरूपेणचिंतनार्थः वृष्णीनां
मध्येवासुदेवोवसुदेवपुत्रोहंपांडवानांधनंजयस्त्वमहं मुनीनांमन
नशीलानांमध्येव्यासोहं कवीनांक्रांतदर्शिनांसूक्ष्मार्थविवेकिनांमध्येउ
शनाकविरितिख्यातःशुक्रोहं ३७ ॥

उत्तमवैजयंतीटीका ९

किंच वृष्णीनामिति वृष्णीनांवृष्णिवंश्यानां वासुदेवोवसुदेवपुत्रस्त्वदुप
देष्टाऽहमेवास्मि अत्राप्यर्थांतराभावान्नमद्विभूतिः किंतुसाक्षाद्विभू
तिर्वान्यस्मेश्वरोऽहमेव वसुदेवपुत्राकारत्वेनाविर्भूतत्वात्तदनुपप
त्तिर्वलपौरुषसौंदर्यादिकंमदविनाभूतत्वान्ममविभूतिरूपमित्यर्थः
ह॰१ यद्वावृष्णीनांवासुदेवो जीवलभद्रोऽहमेवतस्यशेषावतारत्वेनजीवत्वावि
शेषान्मद्विभूतित्वंघटतएवपांडवानांपांडुतनयानांमध्येधनंजयस्त्वम
जीव॰ हमेवास्मिनवमदवतारत्वेनतुविशेषान्मद्विभूतित्वंघटते सर्वेभ्यः
पांडुपुत्रेभ्यःश्रेष्ठत्वात् मुनीनांवेदार्थमननशीलानांव्यासोवेदविभाग
कर्ताकृष्णद्वैपायनोऽहमेवास्मि तस्यमदवतारत्वेनसर्वेभ्योमुनिभ्यःश्रे
ष्ठत्वात् कवीनांसूक्ष्मार्थविवेचनपराणांविपश्चितांमध्येउशनाशुक्रा
चार्योहमेवास्मि ३७ ॥

मधुसूदनीटीका १०

साक्षादीश्वरस्यापिविभूतिमध्येपाठस्तेनरूपेणचिंतनार्थइतिप्रागेवो
क्तंवृष्णीनांवासुदेवः वसुदेवपुत्रत्वेनप्रसिद्धस्त्वदुपदेष्टायमहं तथापांड
वानांमध्येधनंजयस्त्वमेवाहं मुनीनांमननशीलानामपिमध्येवेदव्या।
सोहं कवीनांक्रांतदर्शिनांसूक्ष्मार्थविवेकिनांमध्येउशनाकविरिति।
ख्यातःशुक्रोहं ३७ ॥

सदानंदीटीका ११

वृष्णीनांतत्रत्वोसोसाक्षाद्वासुदेवोहमव्ययः साक्षात्कीवासुदेवस्यमहामाया
विनाकृतः विभूतिमध्येश्रीशस्यपाठोध्यानार्थइष्यते वसुदेवसुतत्वेन

विदानंदघनात्मनः २ सरसार्थोद्भूतिर्यदुकुलपयोधौरसमयः समाह्ला
दाह्लादोभ्रमतिमिरविध्वंसिकरजः भूशंभ्रृंगाराद्भौपरिमितगतिः स्वच्छ
वलयोऽस्दाकाशेऽध्येयोद्भवनवपुरयंकुलउडुपः ३ पांडवानांतमेवास्मि
द्विभूतिर्धनंजयः मुनीनांसर्ववेदार्थाभिज्ञानांवादरायणः कवीणाम।
स्यहंशुक्रः सूक्ष्मार्थविवेकिनां ३७ ॥

नीलकंठीटीका २

वृष्णीनांयादवानां उशनाशुक्रः ३७ ॥

आनंदीटीका

कवीनांसूक्ष्मार्थोल्लेखिनाम् ३७ ॥

रामकंठीटीका उपक्रमं ३७ सप्तार्थम्

लासिकी [redacted]टीका

मुनीनामात्ममननशीलानाम् कवीनांक्रांतदर्शिनांशुक्रः ३७

पंचोलीटीका

वृष्णीनांवृष्णिकुलोत्पन्नानांमध्येवासुदेवोस्मिपांडवानांयुधि
ष्ठिरादीनांमध्येधनंजयःअर्जुनोहंमुनीनांमध्येव्यासवेदव्यासो
हंकवीनांमध्ये उशनाःशुक्राचार्यःकविरहं ३७

रणवीरसमिद्धोधिनी॥

वृष्णीनामिति वृष्णयोयादवविशेषास्तेवतत्कुलेभवास्ते
षांमध्ये वासुदेवो वसुदेवस्य पुत्रः सोस्मि तत्कुलदेवतावादि
ति पांडवानामिति पांडवाः पांडुसुता युधिष्ठिरादयोभगव
द्भक्तास्तेषांमध्याद्धनंजयोर्जुनस्त्वमेवाहमस्मि मदुपदिष्टत्वा
दिति मुनीनामिति मननंनामसर्वोपास्योपासनंतदेवशीलम
भ्यसनं येषांते मुनयस्तेषामपि व्यासोस्मि सकलवेदशास्त्रादि
पारंगमत्वादिति कवीनामिति कवयःक्रांतदर्शिनाः मनतस्तेषां
वमध्ये उशनानामकविरस्मि इत्युक्तत्वादितिभावः ३७

मधुमाथ

३०॥

ग्रौर वृष्णि वंशियो मे वासुदेव कृष्ण हम है जोतम को उपदेश कर
तेहै ग्रौर पांडवो मे ग्रर्जुन जो तुम सो मै हूं ग्रौ मुनियो मे व्यासदेव त
था कवियो मे उसना शुक्र हम है ३७ ॥

दोहा

वासुदेव हो वृष्णि मंहि ग्रर्जुन पांडव मांहि मुनिनं मांहि हों
व्यास हों कविन मांहि कवि ग्राहि ३७॥

126

दंडोदमयतामस्मिनीतिरस्मिजिगीषतां मौ
नंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहं ३८ ॥

शंकरभाष्यटीका १

दंडइति दंडोदमयतां दमयितॄणामस्मि अदांतानां दमनकरणं
नीतिरस्मि जिगीषतां जेतुमिच्छतां मौनंचैवास्मि गुह्यानां गोप्या
नां ज्ञानंज्ञानवतामहं ३८ ॥

आनंदगिरिकृतटीका २

अदांतानुत्पथात् पथि प्रवर्तयतां दंडोनुमथग्रहणी निग्रहे हेतुरि
त्यर्थः नीतिर्न्यायोयमीस्य जयः पायस्य प्रकाशकः मौनं वाचः संय
मनस्मतमा वा वनर्थीश्रमहात्मिः श्रवणादिद्वारा परिपक्वसमाधि
जंबंसम्यग्ज्ञानं ३८ ॥

स्वामिकृतटीका ३

दंडइति दमयतांदमकर्तॄणांसंबंधीदंडोस्मि येनासंयताअपिसंयता
भवंति सदंडोमद्विभूतिः जेतुमिच्छतांसंबंधिनीसामायकपायनूपानी
तिरस्मिगुह्यानांगोप्यानांगोपनहेतुर्मौनमवचनमहमस्मिनहितूष्णींस्थि
तस्याभिप्रायोज्ञायतेज्ञानवतांतत्वज्ञानिनांयत्ज्ञानंतदहं ३८ ॥

पिशाचभाष्यटीका ४

दमयितॄणांसंबंधिदंडोस्मि अदांतानांदमनकारणं जिगीषतां जिगी
षतांजिगीषूणांनीतिरस्मिनीतिः गुह्यानांगोप्यानांगुप्तहेतुर्मौ
नमस्मि ३८ ॥

रामानुजभाष्यटीका ५

नियमातिक्रमे दंडःकर्वतांदंडोहं विजिगीषूणांजयोपायोनीतिर
स्मिगुह्यानांसंबंधिषुगोपकेषुमौनमस्मि ज्ञानवतांज्ञानंचाहं ३८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ३८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥:

परमार्थप्रपाटी टीका ७

दंडइति दमनकर्तॄणांसंबंधीदंडोस्मि येनअसंयता संयताभवंति।
जेतुमिच्छतांसंबंधिनीनीतिरस्मिगुह्यानांगोपनीयानांमौनमवच।

नमस्मि तथा ज्ञानवतां ज्ञानमस्मि ३८ ॥

श्री॰ गी॰टी॰ ह॰

वनमालीटीका ८

दमयतामदांतानुत्पथात्पथि प्रवर्तयितामुत्पथप्रवृत्तानां निग्रहहेतुर्दंडो
ऽहं जिगीषतां जेतुमिच्छतां नीतिर्न्यायोऽहं गुह्यानां गोप्यानां गोपनहे
तुर्मौनमहं न हि तूष्णीं स्थितस्याशयो ज्ञायते गोप्यानां मध्ये श्रवणम
ननपूर्वकमात्मनो निदिध्यासनरूपं मौनं वाहं ज्ञानवतां श्रवणम
ज्ञानं ननिदिध्यासनपरिपाकप्रभवं सर्वेश्वरस्य साक्षात्काररूपमविद्या
निवर्तकमहं ३८ ॥

ॐसमवैजयंतीटीका ९

किंच दंडइति दमयतां मर्यादातिक्रमे सति दंडकर्तॄणां संबंधी यो
दंडो ताडनपीडाविशेषः येनोत्पथगामिनः पथि वर्तंते सोऽप्यहमेवास्मि जि
गीषतां जेतुमिच्छतां संबंधिनी नीतिर्जयोपायस्तस्य प्रकाशकरूपो मा
योऽहमेवास्मि च पुनः गुह्यानां श्रवणमनननिदिध्यासनरूपाणां गोप्यानां
मध्ये मौनं निदिध्यासनाख्यमहमेवास्मि तस्य श्रवणमननाभ्यामुत्कृष्ट
त्वात् ज्ञानवतां परापरस्वरूपविदां यत्नात्पशास्त्रज्ञानानां संबंधि यत्
ज्ञानं यथात्म्यात्मतत्त्ववेदनं तदहमेवास्मि ३८ ॥

मधुसूदनीटीका १०

दमयतामदांतानुत्पथात्पथि प्रवर्तयतामुत्पथप्रवृत्तौ निग्रहहेतुर्दंडो
ऽस्मि जिगीषतां जेतुमिच्छतां नीतिः न्यायो जयोपायस्य प्रकाशकोऽहमा रि
स्मि गुह्यानां गोप्यानां गोपनहेतुः मौनं वाचंयमत्वमहमस्मि न हि तूष्णीं म
स्थितस्याभिप्रायो ज्ञायते गुह्यानां गोप्यानां मध्ये संन्यासश्रवणमन
नपूर्वकमात्मनो निदिध्यासनलक्षणं मौनं वाहमस्मि ज्ञानवतां ज्ञा
निनां यत् श्रवणमनननिदिध्यासनपरिपाकप्रभवमद्वितीयात्मसा
क्षात्काररूपं सर्वज्ञानविरोधि ज्ञानं तदहमस्मि ३८ ॥

सदानंदीटीका ११

दांतिहेतव दांतानां दंडो दमयितामहं नीतिरस्मि जयेच्छूनां जयोपायप्र
काशकः वाचंयमत्वं गोप्यानामभिप्रायस्य गूढता निदिध्यासनमेवाथ
मौनं वा गुह्यमस्म्यहं प्रज्ञानमनाशकं ब्रह्मज्ञानं ज्ञानवतामहं ३८ ॥

नीलकंठीटीका १२

दमयतां राज्ञादीनां दमनसाधनं दंडोहमस्मि जिगीषतां जेतु
मिच्छतां जयसाधनं नीतिरस्मि मौनं वाचो निग्रहः ३८ ॥

आनंदी टीका

दमयतां दमनकारणानां मध्ये दंडोस्मि जिगीषतामिति धर्मध
र्मिणोरभेदत्वात् जिगीषाकारणानां मध्ये नीतिरस्मि ज्ञानवतां मे
कस्मिन्नेव विषये नानाप्रकाराणि हिताहितादिग्रहणानि ज्ञाना
निविद्यंते इति नानाज्ञानानां मध्ये ज्ञानं परमार्थं तमस्मि गुह्यानां
गोपनाप्रकाराणां मौनं चैवास्मि ३८ ॥

रामकंठी टीका

स्पष्टार्थम् ३८ ॥

लासिकी टीका ॥

दमयतां दमकर्तॄणां दंडो येनासंयता अपि संयता भवंति नीति
सामाद्युपायरूपा गुह्यानां रहस्यानां गोप्यानां मौनमात्ममननं
ज्ञानवतामद्वैतज्ञानसंपन्नानां ज्ञानमद्वैतज्ञानम् ३८ ॥

पंचोली टीका

दमयितां दमयितॄणां दुर्दांतानां दमनकारणानां दंडः अहं जि
गीषतां जेतुमिच्छतां नीतिरहं च पुनः गुह्यानां गोप्यानां मौनम
स्मि ज्ञानवतां ज्ञानमहं ३८ ॥

रसवीरसमिद्धोधिनी ॥

दमयतामिति दमो दंडस्तं कुर्वतां दमयितां दंडयितॄणां राज्ञां दंडो दं
डप्राप्तिरस्मि साधनवर्गेषु मध्ये दंडस्यैव प्राधान्यादिति नीतिरिति
जिगीषतां जेतुमिच्छतां नीतिरस्मि नीत्यैव जयलाभादिति तथा गुह्या
नां गुह्यमंत्राणां मध्ये मौनं चैवास्मि स्वमंत्रमूलत्वादिति ज्ञानमिति
ज्ञानं नाम स्वरूपलाभस्तद्वतां लब्धस्वरूपलाभानां ज्ञानं स्वरूपस्थिति
रस्मि स्वरूपस्थित्यैव तत्पदसिद्धेरिति भावः ३८ ॥

ਮਧੁਮਾਲ

੨੮॥

128

दम करने वालोमे दंडरूप हम तथा जीतने वालों की नीति हमे मानो गुह्य पदार्थों मे मौन जो सो हम और ज्ञान वानो मे ज्ञानरूपभी हमीहे ३८ ॥

दोहा

दमनशील महिं दंड हैं जय इच्छा नय जान गुह्यन मां
हि मौन हौं ज्ञानवान में ज्ञान ३८॥

129

यच्चापि सर्वभूतानां बीजं तदहमर्जुन न त
दस्ति विना यत्स्यान्मया भूतं चराचरं ३९ ॥

शंकरभाष्यटीका १

यच्चापीति यच्चापि सर्वभूतानां बीजं प्ररोहकारणं तदहमर्जुन प्रकर
णोपसंहारार्थं विभूतिसंक्षेपमाह न तदस्ति भूतं चराचरं चरमचरं वा
मया विना यत् स्याद्भवेत् मयापकृष्टं परित्यक्तं निरात्मकं शून्यं हि तत् स्या
दतो मदात्मकं सर्वमित्यर्थः ३९ ॥

आनंदगिरिकृतटीका २

ज्ञातमात्रप्रतिबिम्बितं चैतन्यं बीजं किमिति स्थावरं जंगमं वा तदस्ति
रेकेण न भवति तथाहमयेति तस्यापि स्वरूपेण सत्त्वमाशंक्योक्तं शून्यं
हीति आत्मनोपकर्षादित्यर्थः मयैव सच्चिदानंदस्वरूपेण सर्वस्य स्थि
तेरित्यतः पाहार्थः ३९ ॥

स्वामिकृतटीका ३

यच्चापीति यदपि च सर्वभूतानां बीजं प्ररोहकारणं तदहं तत्र हेतुः मया
विना यस्मात् भवेत् तत्चरमचरं वा भूतं नास्त्येवेति ३९ ॥

पिशाचभाष्यटीका ४

यच्चापीति बीजं प्ररोहकारणं न तदिति संक्षेपमाह मया विना यत्स्याच्चरा
चरं चरमचरं वा न तदस्ति ३९ ॥

रामानुजभाष्यटीका ५

सर्वभूतानां सर्वावस्थावस्थितानां तदवस्थाबीजमहं प्रतीयमानं म
[illegible]प्रतीयमानं च यत्तदहमेव चराचर सर्वभूतजातं मयात्मतयावस्थि
तेन विना यत्स्यान्न तदस्ति अहमात्मा गुडाकेशेति प्रक्रमात् न तदस्ति
विना यत् स्यान्मया भूतं चराचरमिति तत्तयावस्थानमेव विवक्षितं स
र्वं वस्तुजातं सर्वं वस्तु मयात्मभूतेन युक्तमेव स्यादित्यर्थः ३९ ॥

अभिनवगुप्तकृतटीका ६

॥ ॥ ॥ ॥

स्पष्टार्थं ३९

परमार्थप्रपाटीका ७

२५

श्री· गी·टी· द·

यच्चापि सर्वभूतानां वीजं प्ररोहकारणं तदहमस्मि तदेवद्रढयति चराचरं नतदस्ति यन्मयाविनास्यात मद्व्यतिरेकेणाभवति यतो मत्रूपोहं अतनाद्धेतोरेनत: सर्व [illegible] ॥

130

वनमालीटीका ८

यदपिसर्वभूतानां प्ररोहकारणंवीजं सर्वनायलौकिकानंतगुणविशिष्टमेवाहमेवचरमचरंचयद्भूतजातंतन्मयासर्वस्वरेणविनानास्ति किंतु मयासर्वेस्वरेणाचिंत्यशक्तिना सर्वमेतद्व्याप्तसर्वमितिभावः ३९

ऊसमवैजयंतीटीका ९

किंच यच्चापीति सर्वभूतानां सर्वावस्थावस्थितानां चेतनाचेतनरूपाणां सर्वापियच्चापियत्किंचिदपिवीजमूलमस्यादिकारणं तत्सर्वमहमेवास्मि। तत्रहेतुमाह नतदिति हेऽर्जुन मयासर्वकारणेन सर्वात्मना सर्वेश्वरेण विनाव्यतिरिक्तेन चराचरंस्थावरजंगमरूपं भूतं चेतनाचेतनरूपया किंचित्स्यात् तत्सर्वं वस्तुमात्रमपृथक्तस्यात्किंतुमद्रूपमेवस्यात् यद्वा मयाप्रकृतविना यदस्तु स्तितदुच्छेवन स्यादित्यर्थः ३९ ॥

मधुसूदनीटीका १०

यदपिचसर्वभूतानां प्ररोहकारणंवीजं तन्मायोपाधिकं चैतन्यमहमेव हेअर्जुन मयाविनायत्स्याद्भवेत् चराचरंवाभूतं वस्तुतन्नास्त्येव। यतःसर्वमत्कार्यमेवेत्यर्थः [illegible] ३९ ॥

सदानंदीटीका ११

मायोपाधिकचैतन्यंवीजं यत्सर्वदेहिनां तदहं तत्पृथक्ज्ञान: किंचिदस्तिचराचरं। मदात्मनानतंसर्वंचराचरमिदंजगत् २ ३९ ॥

नीलकंठीटीका १२

सर्वभूतानांवीजमित्यनेन सर्वभूतानिमद्विभूतिरितिनिदर्शितं तदेवोपपादयति नतदस्तीति मयाविनाभूतंकिमपिनास्ति उपादेयस्य उपादानमंतरेणास्थित्यसंभवात् ३९ ॥

एतदुपसंहरति ॥

ज्ञानेदीटीका

सर्वेषांभूतानांवीजंयत्किमप्यस्ति तदहमेव चराचरभूतंममविनायत्स्यात् तन्नास्त्येव ३९

ततोनानात्वानमथैपकसत्ता रामकंठीटीका नस्पयथोक्तस्यप्राधान्येनप्रतिपादितं विभूतिप्रतिपादनमुपसंहरन्नाह ॥

किंवहुनाविभूतिविस्तरकथनेनसंग्रहादियंममपराविभूतिर्यतः सर्वभूता
नांशाकप्रतिपादितपरापरप्रकृतिभेदेनप्रस्तानांयद्वीजमुत्पत्तिकारणंतद
हमेव नहिवाप्येकारणंजगतांकिंचित्संभवतिमन्मायाशक्तिमात्रमेकंव
जीयित्वेत्यर्थः यतस्तादिहचेतनमचेतनंवानास्तिनसत्तांभजतेयन्मयावि
नोत्पद्यतेचराचरमतः सकलकारणाभासव्यतिरेकेणपारमार्थिकमहमे
वकारणंसर्वभूतानामिति
३९ ॥

लाक्ष्मी … टीका

अथवाकिंएथगएथुक्तिर्दैश्यो॥
न- सर्वेषांभूतानांयदपिचवीजंभूतत्वसमवायिकारणंतदहम् तत्रहेतुः।
नतदस्तीतिमयाहंताप्रत्ययेनविनायच्चराचरात्मकंभूतजातंस्यात्भवती
तिसंभाव्यतेतत्रास्यैव तदुक्तम् नसाजीवकलाकाचित्संतानहृदयवर्तिनी
व्याप्तीशिवकलायस्यासपिष्टाज्ञीनविद्यतइति

पंचोलीटीका

हेअर्जुनचभूतः सर्वभूतानांयदपिवीजंप्ररोहकारणंतदहंयच्चराचरं
भूतंमयाविनामयापरित्यक्तंस्यात्भवेत्तन्नास्ति ३९

रणवीरसमिद्धोधिनी॥

इदानीमुक्तमर्थमुपसंहरति यच्चापीति स्पष्टार्थमेतच्छ्लोकद्वयं ३९

मधुभाष्य

३९॥

131

ऋौर यावत जीवो मे जो वीज सो हे अर्जुन हम है ऋौर जो मेरे विना
है सो कुछ नही है अर्थात् चराचरमेरे विना कुछ वाकी नही है ३९

दोहा

अर्जुन जो सभ भूतमें निश्चयबीज सभमेंह मोविन होय सो ह
यनहि जीव चराचर पद ३९ ॥

132

नांतोस्मि मम दिव्यानां विभूतीनां परंतप एषा
तूद्देषतः प्रोक्तो विभूतेर्विस्तरो मया ४० ॥

शांकरभाष्यटीका १

नांतोस्तीति नांतोस्ति मम दिव्यानां विभूतीनां विस्तराणां परंतप न
हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनां इयत्ता शक्या वक्तुं ज्ञातुं वा के
नचित् एषस्तूद्देशत एकदेशेन प्रोक्तो विभूतेर्विस्तरो मया ४० ॥

आनंदगिरिकृतटीका २

दिव्यानां विभूतीनां परिमितत्वशंकां वारयति नांतोस्तीति तदेवोपपा
दयति नहीति कथं तर्हि विभूतिविस्तरो दर्शितस्तत्राह एषस्त्विति ४०

स्वामिकृतटीका ३

प्रकरणार्थमुपसंहरति नांतइति अंतस्त्वा विभूतीनां नास्ति साकल्येन व
क्तुं शक्यते एषस्तु विभूतेर्विस्तरउद्देशतः संक्षेपतउक्तः ४० ॥

पैशाचभाष्यटीका ४

स्पष्टार्थं ४० ॥ ॥ ॥ ॥ ॥ ॥

रामानुजभाष्यटीका ५

अनेन सर्वस्यास्य सामानाधिकरण्यनिर्देशस्यात्मतयावस्थितिरेव हेतुरि
ति प्रकटितं नांतोस्तीति मम दिव्यानां विभूतीनामंतो नास्ति एषस्तु विभूते
विस्तरो मया कैश्चिदुपाधिभिः संक्षेपतः प्रोक्तः ४० ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४० ॥ ॥ ॥

परमार्थप्रपा टीका ७

भो परंतप मम दिव्यानां विभूतीनामंतो नास्ति किं त्वेष विभूतीनां वि
स्तरो मया उद्देशतः संक्षेपतः प्रोक्तः अथ विभूतीनां साधारणलक्षणमा
ह यदिति यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा [illegible]
[illegible] तत्तदेवावगच्छ त्वं मम तेजोंशसंभवं
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ४० ॥

13

वनमालीटीका ८

प्रकरणार्थमुपसंहरन्विभूतीः संक्षेपेणाह नांतइति मम दिव्यानां विभू-
तीनामंतइयत्तानास्ति यतः सर्वज्ञेनापि सा न शक्यते ज्ञातुं वक्तुं वा स्वमा-
त्रविषयत्वात्सर्वज्ञतायाः एषतूद्देशतएकदेशेन प्रोक्तो विभूती
विस्तरो विस्तारोमया ४० ॥

उत्समवैजयंतीटीका ९

एवं पृष्टापीत्यनेन सर्वस्य स्वस्मर्ताधिकरणानिर्देशस्य येनतावतनात्मक
स्य विश्वस्यात्मनयावस्थानमुक्तमिदानीं प्रकरणमुपसंहरन्स्वविभूतीनामसं-
ख्यापरिच्छेदत्वमाह नांतोस्तीति हे परंतप अज्ञानशत्रुतापन मम अनं-
तशक्तेरनंतविभूतिमतः सर्वेश्वरस्य हि दिव्यानामनंतानां विभूतीनामंत
संख्यापरिच्छेदो नास्ति यतोनं तासु नोद्देशतः स्थाने सत्येपनएकदेशेन-
र्थः मया सर्वेश्वरेणापि विभूतेर्महाभूतेर्विस्तरो विस्तारः प्रोक्तः प्रक
र्षेण कथितः तथाहं न यदि मयापि महाभूतैर्वक्तुं न शक्यते तर्हि का नेः अन्येषां
वंतेति सूचितं ४० ॥

मधुसूदनीटीका १०

प्रकरणार्थमुपसंहरन्विभूति संक्षिपति ॥ हे परंतप परेषां शत्रूणां कामक्रोधलोभादीनां तापजनक मम दिव्यानां वि-
भूतीनामंतः इयत्ता नास्ति यतः सर्वज्ञेनापि सा न शक्यते ज्ञातुं वक्तुं वा स्व
मात्रविषयत्वात्सर्वज्ञतायाः एषतूद्देशतः एकदेशेन प्रोक्तो विभूते विस्तरो
विस्तारो मया ४० ॥

सदानंदीटीका ११

इयत्ता नास्ति दिव्यानां विभूतीनां मम मे शितुः सर्वज्ञेनापि वक्तुं ज्ञातुं वाने
वशक्यते १ इयत्ता महाविभूतीनामनंतानां कथंचन विभूतेरेष विस्ता-
रः प्रोक्तस्त्वेकदेशतः २ ४० ॥

नीलकंठीटीका १२

नांतोस्तीति उद्देशतः एकदेशेन विभूतेर्विस्तरो विस्तारो मया प्रोक्तः ४०

आनंदीटीका

अंतइयत्तावधिर्नास्ति उद्देशतः किंचिन्मात्रनामकीर्तनात् [illegible]
[illegible] ४०

रामकंठीटीका

मयाच पुरम कारणेन सततूस्म मो यामहिमोद्भाविताभेदभावाश्रिताया विभूतयोममसंभवंति तासां ॥ ममसंबंधिनीनांदिवोमद्भुदयाकाशाद्भूतानामपर्यंतसर्वपदार्थ व्यवस्थितानांविभूतीनांनिजशक्तिविजृंभमाणानामंतोवधिर्नवि द्यते एषविस्तरप्रकरणो द्देशतः कस्यचिद्धर्मस्यकीर्तनाद्विभूतेः स्ववि भवस्यविस्तरः कस्यचिदेवभागस्यप्रसरः कथितः [illegible]

[illegible] ४० ॥

लाक्षिकी [illegible]टीका

प्रकरणार्थमुपसंहरति ॥ ४० यतोममविभूतीनांदिव्यानांलोकोद्धरणामंतोनास्ति [illegible]

[illegible] ४०

पंचोलीटीका

प्रकरणार्थंउपसंहरतिनांतइतिहेपरंतपममदिव्यानांविभूतीनां विस्ताराणांअंतः इयत्तानास्तियतः ईश्वरस्यसर्वात्मनः दिव्यानां विभूतीनांइयत्ताकेनचित्वक्तुंज्ञातुंनशक्याअतःमयाएषवि भूतिविस्तारउद्देशतः एकदेशेनप्रोक्तः ४०

रणवीरसमिद्धोधिनी ॥

स्पष्टार्थम् ४० ॥

मधुभाष्य

४०।

भाषाअनुवाद टीका ४०

जिस हेतु हे परंतप अर्जुन मेरी दिव्य विभूतियों का अंत नही है २
स से सम्पूर्ण कही नही जायसकती है इतनी जो कहा सो उद्देश
कहे संक्षेप से मैने लक्षित कराया है ४० ॥

दोहा

अंत न दिव्यविभूतिको मोरि परंतप यह कह्यो संक्षेपहि
मैं यह विस्तार विभूतिको भेद ४० ॥

135

यद्यद्विभूतिमत्सत्वंश्रीमदूर्जितमेववा तत
देवावगच्छत्वंममतेजोंशसंभवं ४१ ॥

शंकरभाष्यटीका १

यद्यदिति यत् यल्लोके विभूतिमद्विभूतियुक्तं सत्वं वस्तुजातं श्री
मदूर्जितमेववा श्रीः लक्ष्मीः तया सहितं उत्साहोपेतंवा तत्तदेवावग
च्छत्वं जानीहि ममेश्वरस्य तेजोंशसंभवं तेजसोंशः एकदेशः संभ
वोयस्य तत्तेजोंशसंभवमित्यवगच्छत्वं जानीहि ४१ ॥

आनंदगिरिकृतटीका २

उक्तानुक्तास्वपि परस्य विभूतीः संग्रहीतुं लक्षणमाह यद्यदिति व
स्तु प्राणिजातं श्रीमत् समृद्धिमद्वा शोभावद्वा कांतिमद्वा सत्वप्राणिव
लवदूर्जितं तदाह उत्साहेति संभवत्यस्मादिति संभवः तेजसश्चैतन्यस्ये
श्वरस्यांशोवांशस्तेजोंशः संभवोस्येति तेजोंशसंभवं तदाह तेजस इति ४१

स्वामिकृतटीका ३

प्रतस्यसाकल्यप्रतिकथंचित्साकल्येनकथयति यद्यदिति विभूतिमा
दैश्वर्ययुक्तं श्रीमत्संपत्तियुक्तं ऊर्जितंकेनचित्प्रभावबलादिनाग्र
णेनातिशयितं यद्यत्सत्ववस्तु मां तत्तदेव मम तेजसः प्रभावस्यांशेन
संभूतं जानीहि ४१ ॥

पिशाचभाष्यटीका ४

तेजसोंशस्तेजोंशः संभवः कारणं यस्य तत्तेजोंशसंभवं ४१ ॥

रामानुजभाष्यटीका ५

यद्यद्विभूतिमत्ईशितव्यसंपन्नंभूतजातंश्रीमत्कांतिमद्धनधान्यसमृद्धं
वाऊर्जितंकल्याणारंभेषूद्युक्तंतत्तन्ममतेजोंशसंभवमिति अवगच्छतेजः
पराभिभवसामर्थ्यंममाचिंत्यशक्तेर्नियमनशक्त्येकदेशसंभवमित्यर्थः

अभिनवगुप्तकृतटीका ६

४१ ॥ ॥ ॥ ॥

स्पष्टार्थं ४१ ॥

परमार्थप्रपाटीका ७

श्री·
गी·टी·
३·

136

अथ विभूतीनां साधारणलक्षणमाह यदिति यद्यद्विभूतिमदैश्वर्ययु
क्तं सत्त्वं प्राणिविशेषः श्रीमच्छोभासंपद्युक्ता लिऊर्जितं केनापि भावेनाति
शयितं तत्तन्ममैव तेजोंशसंभवं अवगच्छ [illegible]
[illegible] ॥

वनमालीटीका ८

अनुक्ता अपि भगवतो विभूतीः संगृहीतुमुपलक्षणमिदमुच्यते य
द्यत्सत्त्वं प्राणि विभूतिमदैश्वर्ययुक्तं तथा श्रीमच्छ्रीलक्ष्मीः संपत्शोभा
कीर्तिर्वा तया युक्तं तथोर्जितं बलातिशयेन युक्तं तत्तदेव मम तेजसः शा
क्तेरंशेन संभूतं त्वमनुगच्छ जानीहि ४१ ॥

ऊरुमवैजयंतीटीका ९

अनुक्तानां विभूतीनां संग्रहार्थमाह यद्यदिति विभूतिमत् नियम्यत्वसं
पन्नमैश्वर्ययुक्तं वा श्रीमत् धनादिसंपन्नं लावण्यसौंदर्यादिदेहकांत्या
वा युक्तं वा अथवा ऊर्जितं तेजः संभवमेव तेजसोंऽशः शक्तिलेशस्तेन वसं
भवसिद्धं त्वमवगच्छ जानीहि अन्यैः कालकर्मादिभिस्तत्सर्वं भवतीति
त्वं मा जानीहि एवकारेण सूचितं ४१ ॥

मधुसूदनीटीका १०

अनुक्ता अपि भगवतो विभूतीः संगृहीतुमुपलक्षणमिदमुच्यते य
द्यत्सत्त्वं प्राणि विभूतिमदैश्वर्ययुक्तं तथा श्रीमत् श्रीः लक्ष्मीः शोभा कां। संपत्
तिः वा तया युक्तं तथा ऊर्जितं बलाद्यतिशयेन युक्तं तत्तदेव मम तेजसः
शक्तेरंशेन संभूतं त्वमवगच्छ जानीहि [illegible]
[illegible] ४१ ॥ ॥ ॥

सदानंदीटीका ११

संग्रहीतुमनुक्ता हि विभूतीरीशितुर्हरेः समष्टवोपायतदिदमुपल
क्षणमुच्यते १ लोके विभूतियुक्तं यद्यत्प्राणि श्रीयुतं भवेत् बलाद्यै।
श्वर्ययुक्तं वा तत्तत्सर्वं मदंशजं २ जानीहि त्वं न मत्तोन्यत्किंचिदस्त्यस्ति
जागतं ४१ ॥

नीलकंठीटीका १२

सर्वभूतानां बीजमहमित्युक्तावास्यसर्वात्म्यात्केः सर्वस्य विभूतित्व

क्रमेवतथापिनक्कुह्रणाशंकंप्रतिशाह यद्यदिति यद्यत्सत्त्वंप्राणिविभू
तिमत्ऐश्वर्ययुक्तं श्रीर्लक्ष्मीःशोभावातद्युक्तं ऊर्जितंबलाद्यतिशययुक्तं
तत्तदेवममतेजसः चिच्छक्तेरंशसंभवंअंशात्संभूतंत्वमवगच्छजानीहि
लोकेयदतिरमणीयंतद्भगवतोरूपमितिध्यायेदित्यर्थः ४१ ॥

आनंदीटीका

विशिष्टाभूतिर्जन्मैश्वर्यंवातद्युक्तंविभूतिमत् ४१

संग्रहतत्विदंस्वविभूतिविज्ञानायब्र रामकंठीटीका
वीमि॥ इहसर्वलोकेषु यद्यत्सत्त्वंयत्किंचिद्वस्तुजातंचेतनमचेतनंवाविभू
तिमद्विभूतियुक्तंमतएवश्रीमच्छोभातिशययुक्तमूर्जितंतत्तदर्थ
क्रियासामर्थ्ययुक्तंतत्तत्सर्वंममसंबंधिनस्तेजसःपरमप्रकाशस्य
योलेशमात्रंतत्संभवंतत्समद्भूतंत्वमवगच्छेरवजानीयाः
४१

अतएवविभूतित्वेनभेदमभिधा लाभि[illegible]टीका य पुनर्भेदयति ॥
यद्यत्सत्त्वंचेतनाचेतनात्मकंवस्तुविभूतिकेनविज्ञुणेनमाहा ४४
त्म्ययुक्तं श्रीमच्छोभातिशययुक्तम् ऊर्जितंबलसंपन्नम् तत्तदे
वममेश्वरस्यतेजसःपरप्रकाशस्यांशेलेशमात्रेतत्समद्भूतमवा
गच्छजानीहि
४१

पंचोलीटीका

पुनस्सर्वसाकांतासाकल्येनकथयति यद्यदिति यद्यत्
लोकेविभूतिमदैश्वर्ययुक्तंश्रीमत्संपत्तियुक्तंऊर्जितंउत्सा
हादिगुणोपेतंवस्तुसर्वंतत्तत्ममतेजसःस्वभावस्यांशेन
संभवंसंभूतंजानीहि ४१

रागवीरसमिद्धोधिनी॥

किंच यद्यदि यद्यत्सत्त्वंप्राणिजातं श्रीमत्समृद्धिविशिष्ट
मूर्जितं प्राणबलयुतं तत्तदेववस्तुजातं चरमचरंवा ममते
जोंशसंभवमवगच्छजानीहीत्यर्थः ४१॥

137

ਸਪੁਮਾਬ

ਪ੧॥

यहस्तुति अधिक श्रवण करती अर्जुन से भगवान संक्षेप रूप आ
पनी सर्वरूपता कहै है कि ऐश्वर्ययुक्त अथवा बलयुक्त या प्रभा
वयुक्त तथा विद्या बुद्धि रूप गुण युक्त जो वस्तु मात्र है सोमेरा
अंश औ प्रभावसेजानो अर्थात् उसमे मेरा विशेष अंशाहै ४१ ॥

दोहा

जोजो जीव विभूतियुत अथवा श्रीयुत होय सोसो यह
समझान तुं मोरि अंशसंभव कोय ४१॥

138

अथवाबहुनैतेनकिंज्ञातेनतवार्जुन। विष्ट
भ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ४२
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां
योगशास्त्रेश्रीकृष्णार्जुनसंवादेविभूतियोगो
नामदशमोध्यायः १० ॥

शांकरभाष्यटीका २

अथवेति अथवा बहुनाएतेनैवमादिना किंज्ञातेन तवार्जुनस्यात् सा
वशेषेण। अशेषतस्त्वमिममुच्यमानमर्थं शृणु विष्टभ्य विशेषतस्तम्भ
नं दृढं कृत्वा इदंकृत्स्नं जगत् एकांशेन एकावयवेनैकपादेन सर्वभू
तस्वरूपेणेत्येतत्तथाच मंत्रवर्णः पादोस्य सर्वाभूतानीति स्थितोहं
इति ४२ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे
श्रीकृष्णार्जुनसंवादेविभूतियोगोनामदशमोध्यायः १० ॥

आनंदगिरिकृतटीका २

सर्वेषां स्वगमतायावयवस्य विभूतिमुक्त्वा भक्तानुग्रहार्थं साकल्येन
तामाह अथवेति। पक्षांतरपरिग्रहार्थमथवेत्युक्तं बहुना विस्तीर्णेने
न ग्रंथेन संज्ञातेन सावशेषेण तव शक्यस्य नकिंचित् फलंस्यादित्याह
बहुनेति नहि विभूतिप्रकारस्य ज्ञातस्य सर्वं ज्ञायते कासांचिदेव वि
भूतीनामुक्तत्वादित्यर्थः नहि केनोपदेशेनास्माकमेण सर्वार्थज्ञानं श
क्यते तत्राह अशेषत इति विशेषतस्तंभनं विधरणं सर्वभूतस्वरूपे
ण सर्वप्रपंचोपादानशक्त्यामायिकेनैकेन पादेन कृत्स्नं जगत् विष्टभ्य
स्थितोस्मीति संबंधः तत्रैव श्रुतिं प्रमाणयति तथाचेति तदनेन भग
वता नानाविधविभूत्युपदेशेन ज्ञेयत्वेनोपदिश्यते सर्वप्रपंचात्मकं
ज्ञेयरूपं दर्शयित्वा त्रिपादस्यामृतं दिवीति प्रपंचात्यिकं निरुपाधिकं
तत्त्वमुपदिशता परिपूर्णः सच्चिदानंदैकतानः तत्पदलक्ष्योऽर्थोनिर्धारि
तः ४२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्री।

श्री·
गी·टी·
द· ५८

139

कृष्णार्जुनसंवादेविभूतियोगोनामदशमोध्यायः १० ॥

स्वामिकृतटीका १

अथवाकिमनेनपरिछिन्नदर्शनेनसर्वमप्यहमेवेत्याह अथवेति
बहुनाएतेनपृथक्ज्ञानेनकिंकार्यंस्यात् इदंसर्वंजगत् एकांशेनैकदेशमा
त्रेणविष्टभ्यधृत्वाव्याप्यवास्थितोहं नमत्तोतिरिक्तंकिंचिदस्तिपादोस्य
विश्वाभूतानीतिश्रुतेः इंद्रियद्वारतश्चित्तेवहिर्धावति सत्यपि ईशादृष्टि
विधानायविभूतीर्दशमेब्रवीत् ४२ इतिश्रीभगवद्गीतास्वामिकृतटी
कासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविभूति
योगोनामदशमोध्यायः १० ॥

पै[illegible]भाष्यटीका ४

अथवाबहुनैतेनैवमादिनाकिंज्ञातेनतवार्जुनस्यात्त्वावशेषेणत्वमिदं
शृणु अहमेकेनसूक्ष्मांशेनइदंकृत्स्नंजगद्विष्टभ्यव्याप्यस्थितमितिमत
व्यं ४२ इतिश्रीभगवद्गीतापैशाचभाष्यटीकासूपनिषत्सुब्रह्मविद्या
यांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविभूतियोगोनामदशमोध्यायः १०

रा[illegible]नुजभाष्यटीका ५

अथवेति बहुनैतेनोच्यमानेनज्ञानेनकिंप्रयोजनं इदंचिदचिदात्मकंकृ
त्स्नंजगत्कार्यावस्थंकारणावस्थंस्थूलंसूक्ष्मंचस्वरूपसद्भावेस्थितौप्रवृ
त्तिभेदेचयथामत्संकल्पनातिवर्तेततथाममममहिम्नोऽयुतायुतांश
नविष्टभ्याहमवस्थितः यथोक्तंभगवतापराशरेणयस्यायुतायुतां
शांशेविश्वशक्तिरियंस्थितेति ४२ ॥ इतिश्रीभगवद्गीतारामानु
जभाष्यटीकासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवा
देविभूतियोगोनामदशमोध्यायः १० ॥

श्रीमनवगुप्तकृतटीका ६

अस्मन्मोहउन्मादः अहमात्मेत्यनेनव्यवच्छेदंनिवारयति अन्यथास्था
वराणांहिमालयइत्यादिवाक्येषुहिमालयएवभगवान्नान्यइति व्यवच्छे
देननिर्विभागत्वाभावाद्बहुलदर्शनेखंडितमभविष्यत् यतोयस्मात्खंडा
कारव्याप्तिः नथाचेतस्मिन्नोपारोहति नोचजितासनितस्यायमुपदेशा
ग्रंथः नथाह्युपसंहारेभेदाभेदवाद यद्यद्विभूतिमत्सत्वमित्यनेनाभिधा

यपश्चादभेदमेवोपसंहरति अथ किं बहुनैतेन विष्टभ्याहमेकांशेन ज
गत्स्थित इति उक्तं हि पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति अज्ञा
नात्सृष्टिहेतुः सर्वमिदं भगवतस्तवमेतेस्ते विविधैरूपैर्भाव्यमानं सकलमस्य
विषयतां यातीति शिवं इच्छायामिंद्रियेवापि यदेवा यातिगोचरम् इत्था।
हित्वा पर्येस्तत्तत्पर्यन्तं ब्रह्मभावयेत् संग्रहोयं ४२ ॥ इति श्रीभगवद्गी
यों ताअभिनवगुप्तकृतटीकासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा।
र्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः १० ॥
परमार्थप्रपाटीका २ नवनहृतन्यायेन समष्टिव्यष्ट्यात्मकोऽहमेवेत्याह ॥
अथवाकिमनेन परिच्छिन्नदर्शीने
अथवेति अथवा बहुनापार्थकोन ज्ञानेन तव किं कार्यं किं तु इदं कृत्स्नं समग्र
जगच्चराचरं एकांशेन एकदेशमात्रे विष्टभ्य अभिव्याप्य स्थितोऽहमेवास्मि पा
दोऽस्य विश्वा भूतानीति श्रुतेः ऋग्वेदे च किंस्विद्वनं क उ स वृक्ष आस यतो द्या।
वापृथिवी निष्टतक्षुः मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धार ६२ ६५
यन् भाष्यं पूर्वस्यामृच्युक्तं ब्रह्मैव भूम्यादिकारणमिति तद्दृष्टान्तपाश्रक
ष्ठनव्याजेनोच्यते लोके हि प्रौढप्रासादं निर्मिमाणः कस्मिंश्चित्प्रौढवने कं
चिन्महांतं वृक्षं छित्वा तत्काष्ठादिना स्तंभादिकं संपादयति इह तत्परमे
य श्वर शेविता जगत्स्रष्टारो यतोऽस्माद्वृक्षाद्यहत्तमाराय द्यावापृथिवी निष्ट
तक्षुः यावापृथिव्यौ निष्पादितवंतस्तद्वनं किंस्वित्किं नामकं स्यात् तया।
उ इति निर्धारणे कः स वृक्ष आस कस्तादृशो महान् वृक्षोऽभूत् मनीषिणो
मनसईश्वरात्तउ अयं मनसाहत जिज्ञासाउक्तेन पृच्छतेउ पृच्छतैव किंचे
घरो भवनानि धारयन् यद्यत्स्यान मध्यतिष्ठदपि पृच्छत न तस्य सर्वस्या
पुनरं ब्रह्मवनं ब्रह्मसहेतुः समष्टिव्यष्टिरूपेण ब्रह्मैवासीदित्यादिकं अनेना
ग्रिमाध्यायसंगतिरपि दर्शिता अथाध्यायतात्पर्यं अस्यैतावक्षशालीनत्र
सननमिहाग्र सर्वानमीहवैकैकोकषिभाजः सुरमुनिमनुजस्यापदा।
यास्तपते ब्रह्मीरूपामदंशा इति विन्दु भवता पूजनीयाः क्रमेणानेनग्र
त्नस्यथो मामिहमपि दशमे प्राह पार्थं परात्मा ४२ ॥ इति श्रीभगवा।
गीता परमार्थप्रपाटीकासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जु
नसंवादे विभूतियोगो नाम दशमोऽध्यायः १० ॥

वनमालीटीका ८

श्री· गी· टी· ह· एवमवयवशो विभूतीरुक्त्वाधिकं विभूतेर्विस्तारमाह अथवेति अथवे।
ति पदं नरेव बहुनैतेन सावशेषेण ज्ञातेन किं तव स्यात् इदं कृत्स्नं जगदेकां
शेन ममानंतांशेन सामर्थ्यविशेषेकेनेदं सर्वं जगद्विष्टभ्याहं स्थित: प
140 रिच्छिन्नत्वानादपरिच्छिन्नत्वेनैवाथानमितिज्ञापयितुं किमित्यादो ननु प:
तस्य निष्फलत्वज्ञापनायैत उक्तिवैयर्थ्यापत्ते: तेन त्वमाधिकारी व्यापक
मनंतगुणालयं मां ज्ञात्वा योग्य इति ज्ञापयितुं न वेति किमिति चेत्स उक्तं पादो
स्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति श्रुते: तस्मात्वमुत्तमाधिकारी स
र्वत्र भूतेषु मामेव पश्यन्महंसीत्यभिप्राय: ४२ ॥ इति श्रीभगवद्गीतावन
मालीटीकासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवा।
दे विभूतियोगो नाम दशमोध्याय: १० ॥

नवैजयंतीटीका ९ ॥

ती· एवमेकैकत्वेन स्वविभूतिरुपदिश्येदानीं सकलत्वेन ता उपदिशति अथवे।
ति अथवा एतान् रेव बहुना केन पृथक् पृथक् स्वरूपनामादिकथनरूपेण वि हु·
भूतिविषयकेन ज्ञानेन वेदितेन तव प्रयोजनं किं स्यात् न किमपीत्यर्थ: हे।
अर्जुन यत: इदं स्थूलसूक्ष्मरूपकार्यकारणात्मकं चेतनात्मकं कृत्स्नं सम
ग्रमनियम्यरूपं जगत् एकांशेनैकेनैव चिदचिदंतर्यामिरूपेणांशेन स्वांशे।
न विष्टभ्य व्यापकत्वाद्धारकत्वाद्धृत्वा स्वरूपत्वात्पालकत्वाद्वाल
म्बित्वाद्वाहमेव स्थितोस्मि व्यापकत्वादिमत्स्वरूपशक्त्यनंतायुतांशेनाखि ईशां
लं जगद्विष्टभ्याहं स्थितोस्मीत्यर्थ: यस्यायुतायुतांशांशे विश्वशक्तिरियं।
स्थितेति पराशरेणाप्युक्तं यदियावतिमेचिंतन्वदिंद्रियमार्गत: सहि
यावत्कोदोष: क्रमस्यैषामीत्तन: ४२ ॥ इति श्रीभगवद्गीताकृष्णम
वैजयंतीटीकासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवा
दे विभूतियोगो नाम दशमोध्याय: १० ॥

वयवशो विभूतिरुक्त्वामाक् नवृत्तनमालीटीका १० ल्येनतामाह ॥
अथवेति एतान् बहुनैतेन सावशेषेण ज्ञानेन किं तव स्यात् हेअर्जुन इ
दं कृत्स्नं सर्वं जगत् एकांशेनैकदेशमात्रेण विष्टभ्य विधृत्य व्याप्य वा अहं।

मे एवस्थितो न मत्तोतिरिक्तं किंचिदस्ति पादोस्य विश्वा भूतानि त्रिपादस्या
मृतं दिवीति श्रुतेः तस्मात् किमनेन परिछिन्नदर्शनेन सर्वत्र मद्दृष्टिमेव
कुर्वित्यभिप्रायः कुर्वंतु केपि कृतिनः क्वचिदप्यनंते स्वांतं निधाय विष
यांतरशांतिमेव त्वत्पादपद्मविगलन्मकरंदबिंदुमास्वाद्य माद्यति मुहु
र्मधुभिन्मनो मे ४२ ॥ इति श्रीभगवद्गीता मधुसूदनीटीकासूप
निषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम
दशमोध्यायः १० ॥

सदानंदीटीका ११

श्रीभगवान्विभूतिं स्वां श्रुत्वावयवशोर्जुनात् साकल्येनैकतामाह करुणा
मृतसागरः १ ज्ञातेन सविशेषेण किं ते स्यादेवमादिना व्याप्यैकदेशमा
त्रेणाजगत्सर्वमहं स्थितः २ किमनेन परिछिन्नदर्शनेन तवार्जुन मद्द
ष्टिं कुरु सर्वत्र सर्वानर्थलयंकरी ३ पादोस्य विश्वाभूतानीत्यादिश्रुत्याहा
मीश्वरः एक एव विनिर्णीतेन त्वं मां विद्धि सर्वथा ४ यस्यैश्वर्यादिभावे
मृतिदिविजगणा नैव जानंति सर्वे यस्येत्तामात्रसिद्धं चरमचरमिदं सृज्य
जालं सहेशैः यस्यांतो नास्ति भूतेरति गहनगतेर्वशतो येन सर्वं विश्वव्या
प्तं तमीशं सकलसुरपतिं कृष्णमाद्यं नतोस्मि ५ यं योगिनो विगतभोग
भयाभिलाषाः शांताः समाधिनिरता विगतैषणाकाः प्राणान्नियम्य हृ
दि सौख्यपदं विशुद्धं ध्यायंति तं यदुपतिं हृदि चिंतयामि ६ ४२ ॥ इति
श्रीभगवद्गीता सदानंदीटीका सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोध्यायः १० ॥

नीलकंठीटीका १२

उत्तमाधिकारिणामुद्दिश्याह अथवेति मूढानामप्येतदुक्तं न त्वेता
वदेव विश्व एकांशेन एकदेशेनाहमिदं विश्वमाव्याप्य स्थितोस्मि पा
दोस्य विश्वा भूतानीति श्रुतेः तस्मात्परिछिन्नदर्शनं त्यक्त्वा सर्वत्र ब्रह्मबु
द्धिमेव कुर्वित्याशयः ४२ ॥ इति श्रीभगवद्गीता नीलकंठीटीकासू
पनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियो
गो नाम दशमोध्यायः १० ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आनंदटीका

अथवा एतेन यद्यद्विभूतिमदित्युक्तेन बहुना नानाभेदप्रतिपादकेन
ज्ञानेन तव किं स्यात् अहमेकांशेन कृत्स्नं जगद्विष्टभ्य व्याप्य विशेषेण
वस्थितश्चास्मि ॥ ४२ ॥ इति श्रीभगवद्गीता आनंदटीका दशमोध्यायः १० ॥

प्रचारान्तरापेक्षेण विभूतिनिष्ठांश रामकंठीटीका निपादयितुमाह ॥

अथैतेन तत्र तत्र वर्णितेन तद्वस्तु मद्विभूतिमत्त्वेन स्थितमवगच्छेरिति
पूर्वोक्तेन बहुना प्रभूतग्रन्थप्रतिपादितेन ज्ञानेन तथा प्रतिपन्नेन स
ता किं ते प्रयोजनं न किंचिदित्यर्थः यतः इदमनवयविचित्रं विविधविचित्रभा
वमयं कृत्स्नं समस्तं जगत् समस्तलोकीमिति विष्टभ्य एकेन सर्वदा सर्वथा
सर्वत्र विविधसामान्यसंविदात्मना वेद्यांशव्यतिरेकिणांशेन भागेना
वष्टभ्याक्रम्य व्याप्याहं स्थितः तदिदमनेनोक्तं भवति तत्र तत्र दर्शिते
तत्तत्प्रकारभेदेन प्रतिपादितस्य विश्वस्यास्य ह्यावेशोमं तेपतः स्वरूपे
एकोवेदकैकस्वभावः सर्वदा सर्वात्मना निर्विकारचिन्मात्रस्वरूपः ।
अपि नानारूपत्वेपि वेद्यैकस्वभावः तत्र वेद्यांशपरिहारेण तदाभा
सैककारणभूतवेदकांशविश्रांतं समेविदाभिव्यक्तेन भवितव्यं येन म
द्विभूतिः परमाधिगम्यते इत्याह विभूतीनां विस्तारे हि सकलसंगी
तिरायगाः परं ब्रह्म स्वयं च पि समधिगंतव्यं वसितैः इयं तावद्
किं भवति तद्विशुद्धैव विबुधैर्निपातव्यानि तस्मन्नस्ति दशमाध्यायवि
वृतिः ४२ इति श्रीभगवद्गीता रामकंठीटीकायां दशमोध्यायः १० ॥

अर्जुनमहावाक्यमिदं श्रीनेत्रसर्व लास्यिकी [illegible] टीका

था भेदमेदोपसंहरति ॥ अथवा किमनेन प्रभूतेन परिच्छिन्नदर्शितेन एकस्य विभूतिज्ञाने
न तव कार्यं सर्वत्र महदृष्टिमेव कुर्वित्याह इदं कृत्स्नं चेतनाचेतनात्
मकं जगदेकांशेन निरंशोपि सन् मायाकल्पितेनैकदेशमात्रेण
विष्टभ्य अहं तव व्याप्याधारत्वेन स्थितः स्वस्वभावादप्रच्युतत्वेन स
स्थितः तथाच श्रुतिः पादोस्य विश्वा भूतानीति ४२ वेष्यात्मलक्षः
सोपानभूताया स्वविभूतयः तदा मयेयस्माः प्राहतं चैदं सर्वं वेदितं
इति श्रीभगवद्गीता वसगोमीटीकायां दशमोध्यायः १० ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पंचोलीटीका

अथवाकिमनेनपरिछिन्नेनदर्शनेनसर्वत्रमपिदृष्टिंकुर्वित्याह अ॰
थवेति हेअर्जुनएतेनएवमादिनाबहुनापरिछिन्नेनज्ञानेनकिंअहंकृ
त्स्नंइदंजगत् एकावयवेनअंशेषतः अवष्टभ्यधृत्वाव्याप्यावस्थितो
स्मि ४२ इतिश्रीपंचोलीदशमोध्यायः १०

[illegible]वीरसमिद्धोधिनी॥

अथवा पूर्वंबहुनाबहुविस्तरेणानेनविभूतिवाक्यैः प्रतिपादितेनज्ञा
नेनकिंतवप्रयोजनंभवतीत्यलंविस्तरेणेतीदानींसिद्धांतंसंग्रहेणप्र
तिपादयितुमाह भगवान् विष्टभ्येतिश्लोकार्धेन इदंदृश्यकृत्स्नंस
कलंजगद्धिस्वमेकांशेनांशमात्रेणविष्टभ्यव्याप्यस्थितोहमस्मि पा
दोस्यविश्वाभूतानीति वेदोक्तेरिति अवगच्छेति एवंमदसंबंधादि
ति तदनेनविभूत्युपसंहारकवाक्येनविभूतिज्ञानप्रतिपादितं चात्र
वर्ण्यविषयंस्वधर्मादनपेतत्वंबोधितमितिस्वविभूतिवाक्यैः प्रतिबो
धितोतएवसंजातकुतूहलोभगवदनुगृहीतमन्यः प्रत्यक्षत ऐश्वरं
रूपंसाक्षात्जिज्ञासुरर्जुनोद्योवाच मदनुग्रहायेति ४२॥ इतिश्रीभग
वद्गीतासुरणवीरसमिद्धोधिन्यांविभूतियोगोनामदशमोध्यायः १०॥

मधुभाष्य

४२॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमद्भी
ताभाष्येदशमोध्यायः १०॥

भाषाअनुवादटीका ४२

अथवाहे अर्जुन इस सब बखेडे से तुमको क्याप्रयोजनहै सक
ल वस्तु मे हमको देखो यह कहते हैं कि यावत पदार्थ मे मै
व्यापर हा हो यहजगत मेरा रूपहै मोहि छोडि कुछ मात्रभी न
हीहै ४२ ॥ इतिश्रीभगवद्गीता भाषाअनुवाद दशमोध्यायः
१० समाप्तः ॥

दोहा

अर्जुन बहुक्या कथनसें जानहि तव वाहि व्याप रह
हों सभजगत एकहि अंशसें याहि ४२॥ इतिश्री ॥

143